नाम- शाश्वतधर्म दीपिका

लेखक - गंगाधर शास्त्री

त्तिकमित्यभिहितः काशीविद्यासुधानिधिनामकपत्रद्वारा प्रकाशितमपि तत्पत्रग्रहणाक्षमाणां संस्कृतरसिकानामुत्साहशीलानां परितोषायोपक्रमे क्रमेणामुं मुद्रयितुम् । प्रार्थये च महाशयान् कल्याणौपयिकप्रवृत्तिमन्मादृशाल्पज्ञजनहस्तावलम्बनधुरंधरान् पूरयितुममुं न्यूनांशबोधनेन संशोधनेन च बुद्ध्यपराधजनितानां दोषाणामनुग्रहीतुं च मामर्मुष्मिन्नयनार्पणाया-सेनेति ।

मानवल्ल्युपनामको गङ्गाधरशास्त्री

## ॥ शाश्वतधर्मदीपिका ॥

श्रीमानेकरदो देवः सिद्धिदोऽस्तु नमस्यताम् ।
लम्बोदरो नमद्विघ्नकबलीकरणादिव ॥ १[1] ॥
योगाञ्जनैरिव दृशौ विशदे विधाय
त्रैकालिकेक्षणविचक्षणतां तनोति ।
भक्त्यैकवारमपि या नमतां नृणां सा
वागीश्वरी मम धियं विदधातु शुद्धाम् ॥ २ ॥
अज्ञानसंतमसचन्द्रमसं विवेकं
ये चिन्त्यमानचरणा रचयन्ति चित्ते ।
श्रीमद्गुरून् सुरतरूपमितानुकम्पां-
स्तानानतोऽस्मि सकलेप्सितसिद्धिहेतोः ॥ ३ ॥
अस्ति स्वस्तटिनीसमीपवसतिः संकेतभूः श्रेयसां
काशी नाम पुरी श्रुतिस्तुतगुणा विश्वेश्वराधिष्ठिता ।
दुष्प्रापं विजितेन्द्रियैरपि पदं तद् ब्रह्मणः शंभुना
यस्यामेव सदा विनश्वरतनूमूल्येन विक्रीयते ॥ ४ ॥

१ अनेन प्रदर्शितमूल्येतरप्रतिबन्धकराहित्यं व्यज्यते ।

आसीत्तत्र महोत्सवो जनमनोनेत्रस्रुतिप्रीतिसू-
रागोपालनृपालमानवमुखोद्गीतस्तुतिर्जातु चित् ।
भाग्यैर्भारतराजराजपदवीमस्माकमद्योहते
श्वेतद्वीपनिकेतना विजयिनीत्यार्यैः सहर्षैर्भृतः ॥ ५ ॥
स्वस्वानुरूपमथ तत्र विचार्य कार्य-
मार्येषु मोदविवशेषु समाचरत्सु ।
काशीस्थसंस्कृतसमाजमवाप्य सभ्याः
संतन्वते स्म परमेश्वरसाधुवादान् ॥ ६ ॥
तत्रान्तरे सकलभारतवासिलोक-
संपत्तिकीर्त्युचितधर्मपथा कथाऽऽसीत् ।
प्रायेण सार्वजनिकोपकृतावयत्नं
शश्वत्प्रवृत्तिरिति येन सतां निसर्गः ॥ ७ ॥
अस्मास्वनुग्रहमवग्रहहीनमद्य
सा श्रीमती विजयिनी विदधात्यवश्यम् ।
नानान्तरीपनृपलालितशासनाऽपि
याऽऽर्येश्वरीति पदवीं बहुमन्यते स्म ॥ ८ ॥
एतादृशे सुसमये निरुपद्रवाणा-
मस्माकमुन्नतिविधावुचितः प्रयत्नः ।
आलस्यमानमदवैरमुखान्विहाय
दोषान्परस्परहिताय कृतोद्यमानाम् ॥ ९ ॥
प्राग्भारतीयमनुजैः सकलान्यलोक-
मान्याचतामुपगतैरपि दैवयोगात् ।
दोषैरमीभिरिदमुन्नतिहारि दैन्यं
संप्राप्यतेवमितिहासविदां प्रवादः ॥ १० ॥

सर्वे विदन्ति हि तृणैरपि रज्जुभावं
प्राप्तैः क्षणेन गजराडपि बध्यते यत् ।
तेनैकमत्यमथ नित्यमुपेत्य कृत्यं
कुर्मः परस्परहितावहमञ्जसेति ॥ ११ ॥

श्रुत्वेति प्रमदादासमित्रनामा महाशयः ।
व्यजिज्ञपद्दथोत्थाय विनयेन सभासदः ॥ १२ ॥

साध्विदं चिन्तितं प्राज्ञैर्धर्म्यं न्याय्यं च भाषितम् ।
न केवलमियं नीतिर्धर्मोऽप्येष महान्हि नः ॥ १३ ॥

धृतिक्षमादमास्तेयशौचेन्द्रियजयाक्रुधाम् ।
सत्यविद्याधियामाह धर्मलक्षणतां मनुः ॥ १४ ॥

इदमेव पुरस्कृत्य ग्रन्थ एको निबध्यताम् ।
बाला अपि यथा विद्युरक्षमा विस्तरेक्षणे ॥ १५ ॥

उत्सहेताच यः कार्ये धर्मकीर्त्तौ स विन्दतु ।
पारितोषिकसत्कारं मत्सकाशात्तदन्विति ॥ १६ ॥

श्रुत्वेति कौतूहलचापलाभ्यां मया महाभारतरत्नराशेः ।
समाहृताः काश्चन सूक्तिमुक्ता यथोपयोगं विनिवेशिताश्च ॥ १७ ॥

सूक्तानि रत्नानि च यु[१]क्त्यभावे विचित्रवर्णा[२]न्यपि नोल्लसन्ति ।
औचित्यमालोच्य तु योजितानि पुमांसमेतानि विभूषयन्ति ॥ १८ ॥

महानयं धर्मपथोऽस्य तत्वं वेदा गुहायां निहितं वदन्ति ।
अतो भवेद्च मम प्रवृत्तिर्महाधियां केवलहासहेतुः ॥ १९ ॥

---

१ योजना । उपपत्तिश्च ।
२ रूपाणि । अक्षराणि च ।

अख[1]ण्डरूपोऽपि निमि[2]त्तभेदाद्दशा[3]वतारैः सुधियोऽनुगृह्णन् ।
प्रकाश[4]शीलोऽपि निगूढत[5]त्त्वो विचिन्त्यते विष्णुरिवात्र धर्मः ॥ २० ॥

इह किल प्रायः सर्वे प्रेक्षावन्तो निःश्रेयसमभिलष्यन्तो विविधप्रकारमपि स्वस्वसमयभेदेन किंचन धर्म इति नितरामाद्रियन्ते । उद्यो॰अ॰४०

नित्यो धर्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्य इति१२।

पुरुषं त्रिविधानि धनधराधान्यादीन्यवशतया विमुच्यामुत्र प्रतिष्ठमानमेको धर्म एवानुगच्छति ।

अन्यो धनं प्रेतगतस्य भुङ्क्ते वयांसि चाग्निश्च शरीरधातून् ।
द्वाभ्यामयं सह गच्छत्यमुत्र पुण्येन पापेन च वेष्ट्यमानः ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छतीति च ॥
य एवैको नरस्य पश्वादिभ्यो विशेषमादधातीति ।
आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ॥
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समाना इति ।

यद्यपि संभवति धनकृतोऽपि विशेषस्तथापि केवलं स्वाम्यमात्रनिबन्धनोऽसौ प्रभूतसुवर्णादिविविधधातुनिचितेभ्यः पर्वतादिभ्योऽविशिष्ट एवेति नोत्कर्षहेतुः । अनुचितपात्रप्रतिपादनेन तु स एव प्रत्युत निन्दाहेतुतामावहतीति स्पष्टमेव । योग्यविनियोगे च स धर्मरूप एवेति युक्तं धर्म एव पुरुषस्य पश्वादिभ्यो विशेष इति ।

अर्थोऽपि धर्माचरणसुलभ इत्याहुः । उ॰अ॰३७

१ प्रदर्शयिष्यमाणवचनानुसारेण सर्वभूतहितकारितया ऐकरूप्येण धर्मत्वलाभात् । परब्रह्मणोप्यखण्डत्वाभ्युपगमाच्च ।

२ विषयभेदात् । रावणवधादिप्रयोजनभेदाच्च ।

३ घृत्यादिभिर्मत्स्यादिभिश्च ।

४ प्रकाशस्वभावः । शीलैकपर्यवसानश्च ।

५ श्रुतिर्विभिन्नेत्यादियतोवाचोनिवर्तन्तइत्यादिवचनात् ।

अर्थसिद्धिं परामिच्छन् धर्ममेवादितश्चरेत् ।
न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतमिति ॥ ४८

मोक्षश्च धर्मैकमूलक इति निश्चितमेव विपश्चिताम् । लोकेऽपि धार्मिकस्यैव स्वस्वसमयानुगुणाचरणशालिनस्तत्तत्सामयिकेषु प्रशंसा ऽधार्मिकस्य निन्दा च प्रसिद्धतमैवेति नासौ वचनादिप्रमाणसापेक्षो विषयः। स चायं धर्मः सर्वैरेव नितरामाद्रियमाणो न घटादिरिव नयनयोर्गोचरः, स्वस्वरूपविषये विविधानि दर्शनान्याश्रयद्भिः प्रमाणतया विपश्चिद्भिः परस्परं प्रशंसनेन स्वस्वमतानामधिक्षेपेण चेतरमतानां बहुधा विप्रतिपत्तिगोचरीक्रियमाणस्तमनुतिष्ठासतां केषां न चेतसि संशयकलुषिते ऽनिश्चीयमानः खेदमुत्पादयति, नवा सार्वकालिकीं स्वस्वरूपनिर्णये विशेषोत्सुकताम् । यद्यपि श्रुत्युक्त एव धर्मस्तद्विरुद्धश्चाधर्म इति निर्धारेण व्यवस्थाप्यैव प्राक्तनैरभियुक्तैर्मीमांसकतार्किकप्रभृतिभिः, तथाप्यसौ साम्प्रतिकानां तादृगूहापोहाप्रगल्भानामज्ञातश्रुतानां दुरवबोध एव, किं बहुना प्रमाणपारीणानामपि । तथा हि । न तावदिदं सुवचं श्रुत्युक्त एव धर्मो नान्योक्त इति । स्मृत्युक्तानामपि धर्माणां सत्वात् । अनुक्तानां च सदाचारबोधितानां तथाभावात् । यदाह भगवान् याज्ञवल्क्यः ।

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतमिति ॥

अथात्र भवान् सर्वेषामेषां श्रुत्युन्नायकतया श्रुतिबोधितत्वं धर्ममात्रे ऽव्याहतमिति ब्रूते तत्रेदमपि भवता निर्वचनीयं कोऽसौ सदाचारो नाम । सतां सत्त्वं हि वेदप्रामाण्यस्वीकर्तृत्वं तदुक्तकर्मानुष्ठातृत्वरूपं च तथाविधानां चैषां न क्रियामात्रं धर्मो ऽपि तु काचनैव क्रिया, तत्र का सा क्रियेति जिज्ञासितमेव । किंच तेषां सत्त्वमुत्पत्तिकालतः प्राप्तमिति कथमपि न शक्यते वक्तुमिति वेदोक्तधर्मानुष्ठातॄणामपि तेषां य एव श्रुतिष्वनुपलभ्यमान आचारः परिदृश्येत स एव संशयमुत्पादयेत्सत्त्वे

तेषाम् । साम्प्रतमपि चिरं स्वस्वसमयाचारं परिपाल्याचारान्तरमाचरतो ऽधार्मिकत्वव्यवहारदर्शनात् । मन्ये चेदमेव पर्यालोच्य भगवतः साक्षाद्धर्मस्य रूपान्तरप्रायेण महाराजयुधिष्ठिरेण सूक्तम् ।

श्रुतिर्विभिन्ना स्मृतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायामिति ।

एतदुत्तरमेव यदुक्तं महाजनो येन गतः स पन्था इति तदेव सदाचारप्रमापकमिति मा वोचस्तेनैव पितामहं शान्तनवं प्रति स्वानेकविधसंशयप्रकाशनस्य शान्तिपर्वणि करणात् । मो॰ अ॰ ८१

न धर्मः परिपाठेन शक्यो भारत वेदितुम् ।
अन्यो धर्मः समस्थस्य विषमस्थस्य चापरः ॥
आपदस्तु कथं शक्याः परिपाठेन वेदितुम् ।
सदाचारो मतो धर्मः सन्तस्त्वाचारलक्षणाः ॥
साध्यासाध्यं कथं शक्यं सदाचारो ह्यलक्षणः[1] ।
दृश्यते धर्मरूपेण अधर्मं प्राकृतश्चरन् ॥
धर्मं चाधर्मरूपेण कश्चिदप्राकृतश्चरन्[2] ।
पुनरस्य प्रमाणं हि निर्दिष्टं शास्त्रकोविदैः[3] ॥
वेदवादाश्चानुयुगं ह्रसन्तीतीह नः श्रुतम् ।
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥

---

१ साध्यं धर्मत्वमसाध्यमधर्मत्वं वा सत्त्वाज्ञाने कथं ज्ञातुं शक्यमित्यर्थः । अतश्च फलितमाह । सदाचार इति ।

२ मूलएव व्याख्यातम् ।

३ पूर्वान्वयि । एवमनियमेपि सदाचाराणां धर्मे प्रामाण्यं निर्दिष्टमित्ययुक्तमिदमिति भावः ।

अन्ये कलियुगे धर्मा यथाशक्ति कृता इव ।
आम्नायवचनं सत्यमित्ययं लोकसंग्रहः ॥
आम्नायेभ्यः पुनर्वेदाः[१] प्रसृताः सर्वतोमुखाः ।
ते चेत्सर्वं प्रमाणं वै प्रमाणं ह्यत्र विद्यते[२] ॥
प्रमाणेप्यप्रमाणेन विरुद्धे शास्त्रता कुतः ।
धर्मस्य क्रियमाणस्य बलवद्भिर्दुरात्मभिः ॥
याया विक्रियते संस्था ततः सापि प्रणश्यति ।
विद्म चैनं नवा विद्म शक्यं वा वेदितुं नवेति ॥

अनेन हि सन्दर्भेणोपक्रमे धर्मस्य परिपाठमात्रेण ज्ञानं दुःशकमित्युद्भाव्य विश्वामित्रादिकृतश्वजाघनीभक्षणादिभिर्दृष्टान्तैरापद्धर्माणां विचित्रत्वात्तदनवगमो हेतुरुक्तः । सदाचारस्य चान्योन्याश्रयत्वादलक्षणतोक्ता । प्राकृतानामपि शूद्रादीनां मुमुक्षूणां श्रुतिभ्यो वेदान्तादिश्रवणदर्शनादुपलम्भाच्च श्राद्धादावपि पात्रमविविच्यैव दानादेरेवंविधबहुलानाचारादगस्त्यादीनामपि महात्मनां बहुहिंसाक्रूरशापादिदानदर्शनाच्च । तेन चैषामाचारमात्रं न धर्म इति विशदमेव । अत एवोक्तम् ।

अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् ॥
नानुष्ठेयं मनुष्यैस्तदुक्तं कर्म समाचरेदिति ।

युगभेदेनापि धर्मभेदप्रतिपादनाल्लोकानुरोधिनीव स्मृतिरप्रमाणं स्यादित्याह । तथाच स्मृतिः ।

तपः परं कृतयुगे त्रेतायां सत्यमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे इति ॥

१ वेदयन्त्याम्नायार्थमिति वेदाःस्मृतयः ।

२ ते वेदाः अत्र स्मृतिषु प्रमाणं चेत्सर्वस्याः स्मृतेर्वैसर्जनीयवासोग्रहणादिबोधिकाया अपि प्रमाणत्वं विद्यते प्राप्नोतीत्यर्थः । अथ विरोधाच्च प्रमाणत्वं तर्हि तादृशैकदेशघटितत्वेन सर्वस्या अप्यप्रमाणत्वमेवानुमीयेतेति कथमनुष्ठापकत्वलक्षणं शास्त्रत्वमित्युत्तरार्द्धार्थः ।

ज्ञानिनां महर्षीणामनुयुगं ह्रासात्कलौ कृता इवेत्युच्यते । आम्नायवचनमेव सत्यमिति च नास्तीत्याह आम्नायेभ्य इत्यादि । अपि च तदुन्नायकृता स्मृतीनामप्यसिद्धा । वैसर्जनीयवासोग्रहणादीनां लोभमूलकतया धर्मत्वाभावेन तादृशैकदेशघटितस्य स्मृतिमात्रस्याप्तोक्तत्वानिश्चयात् ।

निह्नुते लिखितं नैकमेकदेशविभावितः ।

दाप्यः सर्वं नृपेणार्थं

इत्यस्य तुल्यन्यायत्वात् । एवमेव किल श्रुतीनां प्रामाण्यमसाध्यत भगवता गौतमेन मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति ।

धर्मस्य क्रियमाणस्येत्यादिना च केषु चित्सदाचारप्राप्तेषु क्रमेणोत्सवैकपर्यवसानेषु मूलधर्मोच्छेदस्तन्मूलकश्च कल्पितधर्मोच्छेद इत्युच्यते । अतश्चायं धर्मः स्वज्ञापकहेतूनां दुर्निर्णयत्वाद्दुरवबोध इति साधु शङ्कितम् । तदुत्तरं च तेनैव । मोक्ष· ८१

अणीयान् क्षुरधाराया गरीयानपि पर्वतात् ।

गन्धर्वनगराकारः प्रथमं संप्रदृश्यते ॥

अन्वीक्ष्यमाणः कविभिः पुनर्गच्छत्यदर्शनम् ।

इत्यनेन दुरवबोधतायां कारणमुक्तम् । एवं क्रमेण हानिं प्राप्यमाणो धर्मः कलेरन्ते सर्वथा हानिमाप्स्यति श्रुत्यादिविलयादित्याह । मो·क्ष· ८१

निपानानीव गोभ्योऽपि क्षेत्रे कुल्ये च भारत ।

स्मृतिर्हि शाश्वतो धर्मो विप्रहीणो न दृश्यते इति ॥

यथा गोभ्यः परिकल्पितानि जलाधारस्थानानि क्षेत्रकुल्यादिषु नीयमानजलानि शून्यतामापद्यन्ते तथैव धर्मोऽपि क्रमेण दुराचारेष्वेव पर्यवसाने नश्येदित्यर्थः ।

अत्रहेतुः । मो·अ· ८१

कामादन्येच्छया चान्ये कारणैरपरैस्तथा ।
असन्तो ऽपि वृथाचारं भजन्ते बहवोऽपरे इति ॥

श्रद्धाविहीना अपि धनादिलोभैर्यज्ञाध्यापनादीनि परबलात्काराच्च स्वस्वक्रमाप्राप्तानप्याचारान् परवञ्चनार्थं च बहून् स्वेनैव कल्पितान् वृथाचारानाचरन्तो दाम्भिकाः कथं धर्मं प्रमाणभावमाप्नुयुरित्यर्थः ।

तन्मूलकमेवाह । मो॰ अ॰ ८७

धर्मो भवति संक्षिप्रः[1] प्रलापस्त्वेव साधुषु ।
अथैतानाहुरुन्मत्तानपि चावहसन्त्युत[2] ॥
महाजना ह्युपा वृत्ता राजधर्मं समाश्रिताः ।
न हि सर्वहितः कश्चिदाचारः संप्रवर्त्तते ॥
तेनैवान्यः प्रभवति सोऽपरं बाधते पुनः ।
दृश्यते चैव स पुनस्तुल्यरूपो यदृच्छया ॥
येनैवान्यः स भवति सोऽपरानपि बाधते ।
आचाराणामनैकाग्र्यं[3] सर्वेषामुपलक्षये इति ॥

एवं च परस्परं विगानात्केषां प्रमाण्यमभ्युपेयमित्यत्र नियामकानुपलम्भाद्धर्मस्याप्रमाणत्वमाशङ्क्य स्वभाव एव सुखदुःखादिहेतुर्भविष्यतीत्याह । मो॰ अ॰ ८७

चिराभिन्नः कविभिः पूर्वं धर्म उदाहृतः ।
तेनाचारेण पूर्वेण संस्था भवति शाश्वतीति ॥

यश्चिरप्राप्तः स्वभावः स एव धर्मपदवाच्य इत्यर्थः ।

एवं परापरविदुषा ऽपि महाराजयुधिष्ठिरेण जनानुकम्पावशंवदचेतसानुयुक्तो भीष्मो यदुवाच स एव धर्मविषये सिद्धान्तः ।

तथा हि । मोक्ष॰ अ॰ ८६

१ स क्षिप्रमित्यपि पाठः। कल्पिताचारोऽपि धर्मत्वेन क्षिप्रमेव प्रसिद्धो भवतीत्यर्थः
२ स्वविहितधर्मविमुखाः । ३ एकरूपत्वाभावम् ।

युधिष्ठिर उवाच ।

इमे वै मानवाः सर्वे धर्मं प्रति विशङ्किताः ।
कोऽयं धर्मः कुतो धर्मस्तन्मे ब्रूहि पितामह ॥
धर्मस्त्वयमिहार्थः किममुत्रार्थोऽपि वा भवेत् ।
उभयार्थो हि वा धर्मस्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

सदाचारः स्मृतिर्वेदास्त्रिविधं धर्मलक्षणम् ।
चतुर्थम[1]र्थमित्याहुः कवयो धर्मलक्षणम् ॥
अपि ह्युक्तानि धर्म्याणि व्यवस्यन्त्युत्तरावरे ।
लोकयात्रार्थमेवेह धर्मस्य नियमः कृत[2]: ॥
उभयत्र सुखोदर्क इह चैवापरत्र च ।
अलब्ध्वा[3] निपुणं धर्मं पापः पापेन युज्यते ॥
न च पापकृतः पापान्मुच्यन्ते केचिदापदि[4] ।
अपापवादी भवति यथा भवति धर्मवित् ॥
धर्मस्य निष्ठा[5] त्वाचारस्तमेवाश्रित्य भोत्स्यसे ।
यथा ऽधर्मसमाविष्टो धनं गृह्णाति तस्करः ॥
रमते निर्हरंस्तेनः परवित्तमराजके ।
यदास्य तद्धरन्त्यन्ये तदा राजानमिच्छति ॥

---

१ उपकारम् । यथाहुः । परिनिर्मथ्य वाग्जालमिदमेव सुनिश्चितम् । नोपकारात्परं पुण्यं नापकारादघं परमिति । अतश्च परपीडाकरः स्वार्थोऽधर्मलक्षणमित्यप्यकारप्रश्लेषेण बोध्यम् ।

२ जनकादीनां गृहस्थानामपि मोक्षदर्शनेपि सर्वेषां यतमानानां चित्तविक्षेपादि मा भूदिति प्रव्रज्यादिनियमः कृत इत्यर्थः । लोकव्यवहारपरिरक्षणार्थमेव धर्मशास्त्रं प्रणीतमित्यन्ये ।

३ अज्ञात्वा । पापमाचरन् अधर्मेण युज्यतइत्यर्थः । ४ अनापदि पापशीला आपदि कृतैः पापैर्न मुच्यन्ते ऽन्ये त्वापन्मात्रे पापमाचरन्तो ऽपि मुच्यन्ते यथा विश्वामित्रादय इत्यर्थः । एतन्मूलकमेवाह । अपापवादीति । ५ अन्त्यं प्रमाणम् ।

तदा तेषां स्पृहयते ये वै तुष्टाः स्वकैर्धनैः ।
अभितः शुचिरभ्येति राजद्वारमशङ्कितः ॥
न हि दुश्चरितं किं चिदन्तरात्मनि पश्यति ।
सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम् ॥
अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक् पृथक् ।
अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥
ते चेन्मिथोऽधृ[1]तिं कुर्युर्विनश्येयुरसंशयम् ।
न हर्त्तव्यं परधनमिति धर्मः सनातनः ॥
मन्यन्ते बलवन्तस्तं दुर्बलैः संप्रवर्तितम् ।
यदा नियति[2]दौर्बल्यमथैषामेव रोचते ॥
न ह्यत्यन्तं बलवन्तो भवन्ति सुखिनोपि वा ।
तस्मादनार्जवे बुद्धिर्न ते कार्या कथंचन ॥
असाधुभ्योऽस्य न भयं न चौरेभ्यो न राजतः ।
अकिंचित्कस्य चित्कुर्वन् निर्भयः शुचिरावसेत् ॥
सर्वतः शङ्कितः स्तेनो मृगो ग्राममिवेयिवान् ।
बहुधा चरितं पापमन्यत्रैवानुपश्यति ॥
मुदितः शुचिरभ्येति सर्वतो निर्भयः सदा ।
न हि दुश्चरितं किं चिदात्मनोन्येषु पश्यति ॥
दातव्यमित्ययं धर्म उक्तो भूतहिते रतैः ।
तं मन्यन्ते धनयुताः कृपणैः संप्रवर्त्तितम् ॥
यदा नियति[3]कार्पण्यमथैषामेव रोचते ।

१ नियमपरित्यागम् । २ दैवप्रातिकूल्यम् । ३ दैवस्य कार्पण्यं तेनैव सर्वेषां धनप्राप्तेः ।

न ह्यत्यन्तं धनवन्तो भवन्ति सुखिनो ऽपि वा ॥
यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
न तत्परेषु कुर्वीत जानन्नप्रियमात्मनः ॥
योन्यस्य स्यादुपपतिः स कं किं वक्तुमर्हति ॥
यद[१]न्यस्य ततः कुर्यान्न मृष्येदिति मे मतिः ।
जीवितं यः स्वयं चेच्छेत्कथं सोन्यं प्रघातयेत् ॥
यद्यदात्मनि चेच्छेत तत्परस्यापि चिन्तयेत् ।
अ[२]तिरिक्तैः संविभजेद्भोगैरन्यानकिंचनान् ॥
एतस्मात्कारणाद्धात्रा कुसीदं संप्रवर्त्तितम् ।
यस्मिंस्तु देवाः समये संतिष्ठे[३]रंस्तथा भवेत् ॥
अथ[४] वा लाभसमये स्थितिर्धर्मेपि शोभना ।
सर्वं प्रियाभ्युपगतं धर्ममाहुर्मनीषिणः ॥
पश्यैतं लक्षणो[५]द्देशं धर्माधर्मे युधिष्ठिर ।
लोकसंग्रहसंयुक्तं विधात्रा विहितं पुरा ॥
सूक्ष्मं[६] धर्मार्थनियतं सतां चरितमुत्तमम् ।
धर्मलक्षणमाख्यातमेतत्ते कुरुसत्तम ॥
तस्मादनार्जवे बुद्धिर्न ते कार्या कथंचनेति ।

१ ततः तत्रोपपत्यविषये यत् यदि अन्यस्य अन्यं कुर्यात् प्रत्यक्षमिति शेषः तर्हि न सहेतेत्यर्थः । २ अधिकैर्धनैर्दरिद्रान् भागिनः कुर्यादित्यर्थः । दातुमसामर्थ्ये कुसीदार्थतयैव परानुपकुर्यादित्यर्थे हेतुमाह । एतस्मादिति । ३ संमुखा भवेयुः । ४ दानादिसामर्थ्येऽपि विहितमार्गेणैव दानादि युक्तं यज्ञादिद्वारा न तु यथाकथंचिदित्यर्थः । अलाभसमयश्चापद्यपि धर्मे स्थितिस्तदनुल्लङ्घनं शुभावहम् । सक्तुप्रस्थाद्याख्यानेन प्रदर्शयिष्यमाणेन विपद्यपि धर्मानतिक्रमस्य फलातिशयप्रदत्वलाभादित्यन्ये । ५ सामान्यतः स्वरूपम् । ६ सूक्ष्मं संक्षिप्तं धर्मार्थयोः नियतं अव्यभिचारि । सूक्ष्मधर्मार्थे सूक्ष्मधर्मलाभाय नियमितमिति टी० ।

अयं भावः ।

सुसूक्ष्मे हि धर्मपथे प्रथमं प्रमाणं श्रुतिरेवेति निर्विवादमेवास्ति-कानाम् । तदनुसारित्वाच्च स्मृतयो ऽपि प्रमाणमेव ।

यथाह ।

यः कश्चित्कस्य चिद्धर्मो मनुना परिकीर्तितः ।
स सर्वो ऽभिहितो वेदे सर्वज्ञानमयो हि स इति ॥

धर्म एव गगनकुसुमायते वैयर्थ्यात्स्वभावेनैव सुखदुःखादिभावोपपत्तेरिति तु निःसारमेव । कार्यवैलक्षण्येन कारणवैचित्र्यस्यावश्यमभ्युपेतव्यत्वादाकस्मिकत्ववादस्य दृश्यमानभावविपरीततताशङ्कया[1] दुर्वचत्वात् । यथा हि क्षित्यङ्कुरादिभिः कार्यैरस्मदादिभिरनुत्पाद्यैरीश्वरः सिध्यति तथैवास्मदादीनां सुखदुःखादिभिर्धर्माधर्मावपि सुसाधावेव । एतदेवोक्तं मोक्षधर्मोत्तरे । २९१

सौवर्णं राजतं वापि यथा भाण्डं निषिच्यते ।
तथा निषिच्यते जन्तुः पूर्वकर्मवशानुगः ॥
नाबीजाज्जायते किं चिन्नाकृत्वा सुखमेधते ।
सुकृतैर्विन्दते सौख्यं प्राप्य देहक्षयं[2] नरः ॥
दैवं तात न पश्या[3]मि नास्ति दैवस्य साधनम् ।
स्वभावतो हि संसिद्धा देवगन्धर्वदानवाः ॥
प्रेत्य[4] यान्त्यकृतं कर्म न स्मरन्ति सदा जनाः ।

१ "दृश्यमानेषु सर्व्वेषु भावेषु कार्य्यकारणभावनियमदर्शनाद् आकस्मिकवादस्तु दुर्वच एव" । इति प्रमदादासमहाशयः । २ देहक्षयेपीत्यर्थः । तेनात्युत्कटधर्माधर्मयोस्तादात्विकफलबोधकवचनेन न विरोधः ।

३ दैवमात्रस्य कर्मशून्यस्य भाग्यमात्रस्य सत्त्वे न प्रत्यक्षं नाप्यनुमानमित्यर्थः । स्वस्य भावात् कर्मणा सर्वे सुखिनः संपन्नाः कर्मदैवबोधकश्रुतिप्रामाण्यादर्पीत्यर्थः । उपपादनीयं चेदमग्रे । ४ प्रेत्य मरणोत्तरमकृतं कर्मफलं न प्राप्नुवन्ति । ते प्रसिद्धा महाजनाः फलप्राप्तौ चातुर्षादि चतुर्विधं कर्म तत्कारणत्वेन निश्चयेन स्मरन्तीत्यर्थः ।

ते वै तस्य फलप्राप्तौ कर्म चापि चतुर्विधम् ॥
चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
करोति यादृशं कर्म तादृशं प्रतिपद्यते ॥
निरन्तरं च मिश्रं च लभते कर्म पार्थिव ।
कल्याणं यदि वा पापं नतु नाशोऽस्य विद्यते ॥
कदा[१]चित्सुकृतं कर्म कूटस्थमिव तिष्ठति ।
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते ॥
ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते ।
सुकृतक्षयाच्च दुष्कृतं तद्विद्धि मनुजाधिप ॥
नायं परस्य सुकृतं दुष्कृतं चापि सेवते ।
करोति यादृशं कर्म तादृशं प्रतिपद्यतइति ॥

अत एव स्वकर्मणैव शुभेतरेणाल्पायुष्कता धर्मराजाय गौतमीदृष्टान्तमुखेन भीष्मेणोक्ता । आनुश्का चन गौतमी नाम ब्राह्मणी सर्पेण दष्टं पुत्रमपश्यत् । विलपन्ती च तत्क्षते सा लुब्धकेन केन चिद्बद्ध्वाऽऽनीतं दंशकं सर्पं जहीति मुहुरभिधीयमानापि तद्वधं नारोचयत् । लुब्धकस्य च स्ववधे नितान्तमाग्रहमालोक्य स सर्पो नाहं वधकर्त्ता खड्गइवास्वतन्त्रोहं मृत्युरेवात्र कारणमित्याह स्म । अथ मृत्युः प्रादुर्भूय नाहमपि स्वतन्त्रो ऽप्राप्ते काले हन्तुमसामर्थ्यादपि त्वावामुभावपि कालवशगावित्याह । अथ कालोप्यागत्य नाहमपि स्वातन्त्र्येण त्वत्पुत्रमरणे हेतुरपि त्वस्य कर्मैवेत्याह स्म ।

यदनेन कृतं कर्म तेनायं निधनं गतः ।
विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम् ॥
यथा मृत्पिण्डतः कर्त्ता कुरुते यद्यदिच्छति ।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते ।

१ तर्हि पूर्वदेहकृतधर्मादेर्यौगपद्येनैव सुखादिजनकत्वं कस्मान्नेत्यत आह ।

यथा छायातपौ नित्यं सुसंबद्धौ निरन्तरम् ।
तथा कर्म च कर्त्ता च संबद्धावात्मकर्मभिः ॥
एवं नाहं न वै मृत्युर्न सर्पो न तथा भवान् ।
न चेयं ब्राह्मणी वृद्धा शिशुरेवात्र कारणमिति ॥

श्रुत्वा चेदं तत्तथेति प्रतिपद्य व्याधस्सर्पं मुमोच विशोका च गौतमी समपद्यतेति[१] ।

एवं स्थिते ऽपि पूर्वकर्मणामल्पायुष्ट्वादिप्रयोजकत्वे धर्मस्य पूर्णायुःकारकताऽपि वर्त्ततएव । अत एव यदि मम पूर्वकर्माणि शुभानि तर्हि मे

---

१ "ननु पूर्व्वकर्म्मभिरेव मनुष्यः शुभाशुभं प्राप्नोत्ययालमिह पुरुषकारेणेति चेन्नैवम् । प्रारब्धस्यापि तत्तद्बुद्धिचेष्टादिभिः कारणसंघातैरेवान्तरालिकैः फलनिष्पादकत्वात् । न हीश्वरः सर्व्वकारणमिति सूर्य्येणानुदितेनाह्निकीं प्रभां वितरति नयनं विनैव वा रूपाणि दर्शयति इत्यादि मूर्खोऽपि प्रलपति ।

यस्य च सुकुमारमतेर्न्नैष्युदाहृतापीयं सुयुक्तिर्हृदयं न स्पृशति मन्ये तस्य दैवोपहतबुद्धिकर्म्मणो ऽशुभमेव प्राक्तनकर्म्मसञ्चयं येनानया विमूढबुद्ध्या संयोजितः कल्याणकर्म्मनिवृत्तोऽशुभोदर्काय निश्चेष्ट आस्ते पशुसामान्येन केवलेष्वाहारादिषु वा रमते । सर्वज्ञेनेश्वरेण यत्पूर्व्वमेव प्रकल्पितं तदेव चेष्टमानेष्वचेष्टमानेष्वपि वा नृषु भविष्यतीति पुरुषकारं निराकर्त्तुमिच्छन्ति ये संकोचयितुं सार्वज्ञ्यमेव वैश्वरं तेपि निराकृता एव । न हीदृशाः स्मरन्त्यहो परमेशेन नियतमपि तत्तदशेषकार्य्यजातं नाहं वेद्मीत्यवशमेव लौकिकानुभवानुसारेण स्वप्रकृतिनियोगाद् विचेष्टे । अथाकिञ्चिज्ज्ञानतो ऽपि प्रयत्नपरिहाणएव बुद्धिर्मे पर्य्यवतिष्ठेत प्रयत्नपरिहाणस्यैवानिष्टं फलं तत्तल्लोकानुभवसिद्धं ममाशुभधिय ईश्वरेण प्रायेण नियतं स्यात् इति । तथा हि प्रज्ञा हिताहितोत्प्रेक्षिणी देवदत्ता यदि दैवेन हता स्यात् किं नाम न हन्येत । प्रकृतिस्त्वां नियोक्ष्यतीति ।

ईश्वरः सर्व्वभूतानां हृद्देशे ऽर्ज्जुन तिष्ठति ।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया ॥

इत्यादीनि तु भगवद्वचनानि तेषुतेषु प्रकृतविचारावसरेष्वनुसन्धेयानि । यदि च कश्चित् सत्यमेव जानीयात् संवत्सरेण लक्षमुद्रा लप्स्यइति स तावन्निश्चेष्ट आस्तां लाभे विषये परन्तु तस्यापि मतिगतिचेष्टास्तादृशलाभानुकूला एवावशं भवेयुः प्रसह्य निश्चेष्टतामालिलम्बिषोरपि । इति पुरुषकारत्यागपक्षेऽपि प्रकृतिस्त्वां नियोक्ष्यतीत्यादिवचनाविरोधेन भाविनिश्चयस्थले तावत् स्वीक्रियतां न च विस्मर्य्यतां प्रकृतेर्बुद्धिनियन्तृत्वं येयं वचसि स्वीक्रियामपि ते क्रियायामपाकुर्य्यात् ।" इति प्रमदादासमहाशयः ।

शुभं स्यादेवान्यथा तु न किमपीति तत्रोदासितव्यमिति शङ्कायां नावकाशः । अत एव हैहयेन मृगयां गतेन मृगबुध्या ब्राह्मणं हत्वा पश्चात्तप्यमानेन प्रसादनार्थं तत्पितुः समीपं प्राप्य स्वेन हतं विप्रं पुनरुज्जीवितं दृष्ट्वा विस्मितेन पृष्टस्तार्क्ष्यनामा मुनिराह । वनपर्वणि । अ॰ १८ । श्लो ४

कारणं वः प्रवक्ष्यामि हेतुयोग[1]समासतः ।
सत्यमेवाभिजानीमो नानृते कुर्महे मनः ॥

स्वधर्ममनुतिष्ठामस्तस्मान्मृत्युभयं न नः ।
यद् ब्राह्मणानां कुशलं तदेषां कथयामहे ॥

नैषां दुश्चरितं ब्रूमस्तस्मान्मृत्युभयं न नः ।
अतिथीनन्नपानेन भृत्यानत्यशनेन च ॥

संभोज्य शेषमश्नीमस्तस्मान्मृत्युभयं न नः ।
शान्ता दान्ताः क्षमाशीलास्तीर्थदानपरायणाः ॥

पुण्यदेशनिवासाच्च तस्मान्मृत्युभयं न नः ।
तेजस्विदेशवासाच्च तस्मान्मृत्युभयं न नः ॥

तथा चोक्तं भीष्मेण । अनु १०४

आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात्कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ॥

दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
त्रस्यन्ति यस्माद्भूतानि तथा परिभवन्ति च ॥

तस्मात्कुर्यात्सदाचारं य इच्छेद्भूतिमात्मनः ।
अपि पाप[2]शरीरस्य आचारो हन्त्यलक्षणम् ॥

१ हेतुयोगः युक्तिसंबन्धः समासः संक्षेपस्ताभ्यमिति पञ्चम्यर्थे तसिः ।
२ पापभोगार्थं धृतशरीरस्यापीत्यर्थः ।

आचारलक्षणो धर्मः सन्तस्त्वाचारलक्षणाः ।
साधूनां च यथा वृत्तमेतदाचारलक्षणम् ॥
ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलङ्घिनः ।
अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः ॥
सर्वलक्षणहीनो ऽपि समुदाचारवान्नरः ।
श्रद्दधानो ऽनसूयुश्च शतं वर्षाणि जीवति ॥
अक्रोधनः सत्यवादी भूतानामविहिंसकः ।
अनसूयुरनीहश्च शतं वर्षाणि जीवति ॥

इत्यादिना विस्तरेण ।

न हीदृशमनायुष्यं लोके किं चन विद्यते ।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥

इत्यादिना च कार्याकार्ये निरूप्य ।

आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते ॥
आचारप्रभवो धर्मो धर्मादायुर्विवर्द्धते ।
एतद्यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ॥
अनुकम्प्य सर्ववर्णान् ब्रह्मणा समुदाहृतम् ।

इत्यन्तेन संदर्भेण ।

अत एव द्यूतनिर्जिते युधिष्ठिरे वनं गतवति तदनुरागादनुगच्छतः परःसहस्रान्ब्राह्मणादीन्भोजयितुमकिंचनतयाऽशक्नुवति तपसा त्वन्मनोरथसिद्धिर्भविष्यतीत्यर्थकं शौनकवचनम् । वनपर्वणि अध्याये २ श्लो ७४

इज्याध्ययनदानानि तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गोयं धर्मस्याष्टविधः स्मृतः ॥
अत्र पूर्वश्चतुर्वर्गः पितृयाण[1]पथे स्थितः ।

१ धूमादिमार्गे ।

कर्त्तव्यमिति यत्कार्ये नाभिमानात्समाचरेत् ॥
उत्तरो देवयानस्तु सद्भिराचरितः सदा ।
अष्टाङ्गेनैव मार्गेण विशुद्धात्मा समाचरेत् ॥
सम्यक् संकल्पसम्बन्धात्सम्यक् चेन्द्रियनिग्रहात् ।
सम्यग्व्रतविशेषाच्च सम्यक् च गुरुसेवनात् ॥
सम्यगाहारयोगाच्च सम्यक् चाध्ययनागमात् ।
सम्यक्कर्मोपसंन्यासात्सम्यक् चित्तनिरोधनात् ॥
एवं कर्माणि कुर्वन्ति संसारविजिगीषवः ।
रागद्वेषविनिर्मुक्ता ऐश्वर्यं देवता गताः ॥
रुद्राः साध्यास्तथाऽऽदित्या वसवो ऽथ तथा ऽश्विनौ ।
योगैश्वर्येण संयुक्ता धारयन्ति प्रजा इमाः ॥
तथा त्वमपि कौन्तेय शममास्थाय पुष्कलम् ।
तपसा सिद्धिमन्विच्छ योगसिद्धिं च भारत ॥
पितृमातृमयी सिद्धिः प्राप्ता कर्ममयी च ते ।
तपसा सिद्धिमन्विच्छ द्विजानां भरणाय वै ॥
सिद्धा हि यद्यदिच्छन्ति कुर्वते तदनुग्रहात् ।
तस्मात्तपः समास्थाय कुरुष्वात्ममनोरथम् ॥ इति ।

ततश्च सूर्याराधनेन लब्धपात्रीकः सर्वानेव यथेच्छमभोजयदिति कथा च ।

ननु अवश्यकल्पनीयेश्वरेच्छामात्रनिबन्धना एते भावा वन्हिजलादेरुष्णत्वशीतत्वादयइव । उक्तञ्च । वनप । अ ३० श्लो २२

धातैव खलु भूतानां सुखदुःखे प्रियाप्रिये ।
दधाति सर्वमीशानः पुरस्ताच्छु[1]क्रमुच्च[2]रन् । इति ।

१ प्राक्कर्मबीजम् ।　　२ अनुसरन् ।

इति चेन्न । तस्य वैषम्यनैर्घृण्यापातात् । अत एवोक्तं वैषम्यनैर्घृण्ये न सापेक्षत्वादिति । अत एवेमामाशङ्कां वनपर्वणि । अ ३० श्लो ४१

कर्मचेत्कृतमन्वेति कर्तारं नान्यमृच्छति ।
कर्मणा तेन पापेन लिप्यते[1] नूनमीश्वरः ॥
अथ कर्मकृतं पापं न चेत्कर्तारमृच्छति ।
कारणं बलमेवेह जनान् शोचा[2]मि दुर्बलान् ॥ इति ।

द्रौपद्या कृतां समादधे धर्मराजः । वनपर्वणि । ३१ श्लो २ ·

नाहं कर्मफलान्वेषी राजपुत्रि चराम्युत ।
ददानि देयमित्येव यजे यष्टव्यमित्युत ॥
अस्तु वात्र फलं मा वा कर्त्तव्यं पुरुषेण यत् ।
गृहे वा वसता कृष्णे यथाशक्ति करोमि तत् ॥
धर्मं चरामि सुश्रोणि न धर्मफलकारणात् ।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च[3] ॥
धर्मएव मनः कृष्णे स्वभावाच्चैव मे धृतम् ।
धर्मवाणिज्यको हीनो जघन्यो धर्मवादिनाम् ॥
न धर्मफलमाप्नोति यो धर्मं दोग्धुमिच्छति ।
यश्चैनं शङ्कते कृत्वा नास्तिक्यात्पापचेतनः ॥
अतिवा[4]दाद्वदाम्येष मा धर्ममभिशङ्किथाः ।
धर्माभिशङ्की पुरुषस्तिर्यग्गतिपरायणः ॥
धर्मो यस्याभिशङ्क्यः स्यादार्षं वा दुर्बलात्मनः ।
वेदाच्छूद्र इवापेयात्स लोकादजरामरात् ॥

---

१ प्रयोजकत्वात् २ लोकसिद्धप्रभुवदन्ततः प्रमादकल्पनावश्यकतयेश्वरत्वस्यैव भङ्गप्रसङ्ग इत्याशयः । ३ अबाधितनिश्चयजनकत्वेन शिष्टाचारेण चानुमाय । ४ वेदैकप्रामाण्यादिति टी·

वेदाध्यायी धर्मपरः कुले जातो मनस्विनि ।
स्थविरेषु स योक्तव्यो राजर्षिर्धर्मचारिभिः ॥
पापीयान्स हि शूद्रेभ्यस्तस्करेभ्यो विशिष्यते ।
शास्त्रातिगो मन्दबुद्धिर्यो धर्ममभिशङ्कते ॥
प्रत्यक्षं हि त्वया दृष्ट ऋषिर्गच्छन्महातपाः ।
मार्कण्डेयोऽप्रमेयात्मा धर्मेण चिरजी[1]विता ॥
व्यासो वसिष्ठो मैत्रेयो नारदो लोमशः शुकः ।
अन्ये च ऋषयः सर्वे धर्मेणैव सुचेतसः ॥
प्रत्यक्षं पश्यसि ह्येतान् दिव्ययोगसमन्वितान् ।
शापानुग्रहणे शक्तान्देवेभ्योऽपि गरीयसः ॥
एते हि धर्ममेवादौ वर्णयन्ति सदा ऽनघे ।
कर्त्तव्यममरप्रख्याः प्रत्यक्षागमबुद्धयः ॥
अतो नार्हसि कल्याणि धातारं धर्ममेव च ।
राज्ञि मूढेन मनसा क्षेप्तुं शङ्कितुमेव च ॥
उन्मतान्मन्यते बालः सर्वानागतनिश्चयान् ।
धर्माभिशङ्की नान्यस्मात्प्रमाणमधिग[2]च्छति ॥
आत्मप्रमाण उन्नद्धः श्रेयसो ह्यवमन्यकः ।
इन्द्रियप्रीतिसंबद्धं यदिदं लोकसाक्षिकम् ॥
एतावन्मन्यते बालो मोहमन्यत्र गच्छति ।
प्रायश्चित्तं न तस्यास्ति यो धर्ममभिशङ्कते ॥
ध्यायन्स कृपणः पापो न लोकान्प्रतिपद्यते ।
प्रमाणाद्विनिवृत्तो हि वेदशास्त्रार्थनिन्दकः ॥

---

१ चिरञ्जीवी । २ प्रामाण्यवैमुख्येन निश्चिनोति ।

कामलोभातिगो मूढो नरकं प्रतिपद्यते ।
यस्तु नित्यं कृतमतिर्धर्ममेवाभिपद्यते ॥
अशङ्कमानः कल्याणि सोऽमुत्रानन्त्यमश्नुते ।
आर्षं प्रमाणमुत्क्रम्य धर्मं न प्रतिपालयन् ॥
सर्वशास्त्रातिगो मूढः शं जन्मसु न विन्दति ।
यस्य नार्षं प्रमाणं स्याच्छिष्टाचारश्च भामिनि ॥
नैव तस्य परो लोको नायमस्तीति निश्चयः ।
शिष्टैराचरितं धर्मं कृष्णे मा स्माभिशङ्किथाः ॥
पुराणमृषिभिः प्रोक्तं सर्वज्ञैः सर्वदर्शिभिः ।
धर्म एव प्लवो नान्यः स्वर्गं द्रौपदि गच्छताम् ॥
सैव नौः सागरस्येव वणिजः पारमिच्छतः ।
अफलो यदि धर्मः स्याच्चरितो धर्मचारिभिः ॥
अप्रतिष्ठे तमस्येतज्जगन्मज्जेदनिन्दिते ।
निर्वाणं नाधिगच्छेयुर्जीवेयुः पशुजीविकाम् ॥
वि[1]द्यां ते नैव युज्येयुर्न सुखं के चिदाप्नुयुः ।
तपश्च ब्रह्मचर्यं च यज्ञः स्वाध्याय एव च ॥
दानमार्जवमेतानि यदि स्युरफलानि वै ।
नाचरिष्यन्परे धर्मं परे परतरे च ये ॥
विप्रलम्भोऽयमत्यन्तं यदि स्युरफलाः क्रियाः ।
ऋषयश्चैव देवाश्च गन्धर्वासुरराक्षसाः ॥
ईश्वराः कस्य हेतोस्ते चरेयुर्धर्ममादृताः ।
फलदं त्विह विज्ञाय धातारं श्रेयसि ध्रुवम् ।

१ विद्यया ।

धर्मं ते व्यचरन्कृष्णे तद्धि श्रेयः सनातनम् ॥
स नायमफलो धर्मो नाधर्मोऽफलवानपि ।
दृश्यन्तेऽपि हि विद्यानां फलानि तपसां तथा ॥
त्वमात्मनो विजानीहि जन्म कृष्णे यथा श्रुतम् ।
वेत्थ चाऽपि यथा जातो धृष्टद्युम्नः प्रतापवान् ॥
एतावदेव पर्याप्तमुपमानं शुचिस्मिते ।
कर्मणां फलमाप्नोति धीरोऽल्पेनापि तुष्यति ॥
बहुना ह्यप्यविद्वांसो नैव तुष्यन्त्यबुद्धयः ।
तेषां न धर्मजं किञ्चित्प्रेत्य शर्मास्ति वा पुनः ॥
कर्मणां श्रुतपुण्यानां[1] पापानां च फलोदयः ।
प्रभवश्चात्ययश्चैव देवगुह्यानि भाविनि ॥
एतानि वेद यः कश्चिन्मुह्यन्त्येऽच प्रजा इमाः ।
अपि कल्पसहस्रेण न स श्रेयोऽधिगच्छति ॥
रक्ष्याण्येतानि देवानां गूढमाया हि देवताः ।
कृता[2]शाश्च व्रता[3]शाश्च तपसा दग्धकिल्विषाः ॥
प्रसादैर्मानसैर्युक्ताः पश्यन्त्येतानि वै द्विजाः ।
न फलादर्शनाद्धर्मः शङ्कितव्यो न देवताः ॥
यष्टव्यं च प्रयत्नेन दातव्यं चानसूयता ।
कर्मणां फलमस्तीह तथैतद्धर्मशाश्वतम् ॥
ब्रह्मा प्रोवाच पुत्राणां यदृषिर्वेद कश्यपः ।
तस्मात्ते संशयः कृष्णे नीहारइव नश्यतु ॥

१ वेदोदितपुण्यकानामिति टी० । २ लिप्साविहीनाः । ३ व्रतरूपभोजनाश्च ।

व्यवस्य सर्वमस्तीति नास्तिक्यं भावमुत्सृज ।
ईश्वरं चापि भूतानां धातारं मा च वै क्षिप ॥
शिक्षस्वैनं नमस्वैनं मा ते भूद्बुद्धिरीदृशी ।
यस्य प्रसादात्तद्भक्तो मर्त्यो गच्छत्यमर्त्यताम् ॥
उत्तमां देवतां कृष्णे मावमंस्थाः कथं चन । इति ।

यद्यपि कर्मणैव वैचित्र्योपपत्तावलमीश्वरेणेति स्याद्विदुषामाक्षेपस्तथाप्यसौ कर्मणो जडत्वात्सुखदुःखादिदातृत्वासम्भवात्पराहतो वेदितव्यो लोके ऽपि चोरादेर्दण्डदानार्थं सुकृतकारिणश्च शोभनफलप्राप्तये प्रभोरपेक्षणाद् इत्यलमाकरेषु विचारिते विषये विशेषेण । अत एव दैवधर्माद्यावश्यकत्वं द्रौपद्या दर्शितम् । वनपर्वणि अ·३२ । श्लो ३

कर्म खल्विह कर्त्तव्यं जानता ऽमित्रकर्शन ।
अकर्माणो न जीवन्ति स्थावरा नेतरे जनाः ॥
सर्वे हि स्वं समुत्थानमुपजीवन्ति जन्तवः ।
अपि धाता विधाता च यथायमुदके बकः ॥
उत्सीदेरन्प्रजाः सर्वा न कुर्युः कर्म चेद्भुवि ।
तथा ह्येता न वर्द्धेरन् कर्म चेदफलं भवेत् ॥
यश्च दिष्टपरो लोके यश्चापि हठवा[1]दिकः ।
उभावपि शठावेतौ कर्मबुद्धिः प्रशस्यते ॥
यो हि दिष्टमुपासीनो निर्विचेष्टः सुखं शयेत् ।
अवसीदेत्स दुर्बुद्धिरामो घटइवोदके ॥
तथैव हठदुर्बुद्धिः शक्तः कर्मण्यकर्मकृत् ।
आसीत न चिरं जीवेदनाथइव दुर्बलः ॥

१ स्वभाववादी ।

अन्येषां कर्म सफलमस्माकमपि वा पुनः ।
विप्रकर्षेण बुध्येत कृतकर्मा यथाफलम् ॥
वृष्टिश्चेन्नानुगृह्णीयादनेनास्तत्र कर्षकः ।
यदन्यः पुरुषः कुर्यात्कृतं तत्सकलं मया[१] ॥
ब्राह्मणं मे पिता पूर्वं वासयामास पण्डितम् ।
सोऽपि सर्वामिमां प्राह पित्रे मे भरतर्षभ ॥
नीतिं बृहस्पतिप्रोक्तां भ्रातॄन्मे ऽग्राहयत्पुरा ।
तेषां सकाशादश्रौषमहमेतां तदा गृहे इति ॥

तत्सिद्धं प्राणिमात्रस्य सुखदुःखयोः साधने धर्माधर्माविति । तत्प्रमापकता च श्रुतिः स्मृतिश्चेति प्रसिद्धतमः सिद्धान्तः ।

यथाह मनुः ।

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ इति ।

इमे चामानयन्बहिष्कार्य इत्याह स एव ।

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ इति

ताश्च स्मृतयो याज्ञवल्क्येन प्रदर्शिताः ।

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ इति ।

इदं च दिक्प्रदर्शनमात्रं न तु परिगणनं नारदबौधायनादिप्रोक्तानामपि धर्मशास्त्रत्वस्येष्टत्वात् तेषामपि परस्मृत्यविरुद्धबहुलवचनोप-

---

१ इति वदचिति शेषः ।

लम्भेन स्थालीपुलाकन्यायेन प्रमातृत्वानुमानात् । व्यास इत्यनेन तत्स्मृतिः पुराणानां महाभारतस्य च प्रामाण्यं दर्शितम् । परस्परविरोधे तु श्रुतिवचसां स्मृतीनां च श्रुतिस्मृत्योश्च विकल्पो देशकालयोर्भेदेन व्यवस्थापनं तदंशे बाधो वा यथायथमिति तुण्णः पन्थाः । अत एव मनुः ।

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ।
उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिरिति ॥

जाबालोऽपि ।
श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सतेति ॥

भविष्यपुराणे ऽप्युक्तम् ।
श्रुत्या सह विरोधे तु बाध्यते विषयं विनेति ।
विषयान्तरलाभासंभवेपीत्यर्थः ॥

सदाचारप्रामाण्ये विशेषग्राहकश्चैव भीष्मोक्तो यथाधर्मसमाविष्ट इत्यादिः संदर्भः । स चास्तेयसत्यसाहसदानब्रह्मचर्याहिंसादिसहित एव सदाचारः प्रमाणमित्येवंतात्पर्यकः । वचनैकबोधितेषु यागादिषु संशयकाभावादास्तिकानां केवलमाचारविषये ये सामान्यधर्माविरोधिन आचारास्ते परिग्राह्या न तु तद्विरोधिन इति । तदेतत्सामान्यतो लक्षितम् । मो· अ ८६

यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
नतत्परेषु कुर्वीत जानन्नप्रियमात्मन इति ॥
तथा विदुरेणापि धृतराष्ट्रं प्रतीदमेवाभिहितम् ।
न तत्परस्य संदध्यात्प्रतिकूलं यदात्मनः ॥

एष सामासिको धर्मः कामादन्यः[1] प्रवर्तते । इति

अन्यो यागादिः कामात्प्रवर्तते काम्य इत्यर्थः । अतश्चासौ नित्य इति सूचितम् । अत एव श्येनयागादेर्वेदबोधितस्याप्यधर्मत्वमेव सिद्धान्तितमभियुक्तैः । तस्य परहिंसैकप्रयोजनकत्वात् ।

अधर्मस्य प्रतिबन्धकवशात्सद्यः फलाभावेऽपि कदाचित्फलमस्त्येवेत्याह । आदिपर्वणि ८० अध्याये ।

नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ।
शनैरावर्त्यमानो हि कर्तुर्मूलानि कृन्तति ॥ २ ॥
पुत्त्रेषु वा नप्तृषु वा न चेदात्मनि पश्यतीति ।

किं बहुना पश्वालम्भनादेरपि यागघटकस्य तदंशे ऽधर्मत्वमिष्यते सांख्यवृद्धैः । यदाहुः । स्वल्पः संकरः सपरिहारः सप्रत्यवमर्ष इति ।

रक्ष्यमाणश्च धर्मः कर्तारं रक्षतीति युधिष्ठिरं प्रति द्रौपदीवचनम् । वनपर्वणि ३० अध्याये ।

न हि ते ऽध्यगमन् जातु तदानीं नाद्य भारत ।
धर्मात्प्रियतरं किं चिदपि चेज्जीवितादिह ॥
धर्मार्थमेव ते राज्यं धर्मार्थं जीवितं च ते ।
ब्राह्मणा गुरवश्चैव जानन्त्यपि च देवताः ॥
भीमसेनार्जुनौ चेमौ माद्रेयौ च मया सह ।
त्यजेस्त्वमिति मे बुद्धिर्न तु धर्मं परित्यजेः ॥

१ अन्यो ऽधर्मः कामात् इच्छया । इति टी. । अन्यत् अत्मौपमित्या ऽनुसन्धीयमानेन लोकहितत्वलक्षणेन विरहितमनुष्ठितजातम् । कामात्, रागात् धर्म्मविरुद्धाद्रजोगुणादिति यावत् । प्रवर्त्तते सम्भवति । तत्सर्व्वमधर्म्यमिति भावः । इति प्रमदादासमहाशयः ।

राजानं धर्मगोप्तारं धर्मो रक्षति रक्षितः ।
इति मे श्रुतमार्याणां त्वां तु मन्ये न रक्षती[1]ति ॥

अत एव

धर्मार्थकामानां समं सेव्यताविषये भीमस्याक्षेपे वनपर्वणि ३३ अध्याये ।

कर्षणार्थो हि यो धर्मो मित्राणामात्मनस्तथा ।
व्यसनं नाम तद्राजन् न स धर्मः कु[2]धर्म तत् ॥
यस्य धर्मो हि धर्मार्थं क्लेशभाङ्‌ स पण्डितः ।
न स धर्मस्य वेदार्थं सूर्यस्यान्धः प्रभामिव ॥
यस्य चार्थार्थमेवार्थः स च नार्थस्य कोविदः ।
रक्षेत भृतको ऽरण्ये यथा गास्तादृगेव सः ॥
अतिवेलं हि यो ऽर्थार्थी नेतरावनुतिष्ठति ।
स वध्यः सर्वभूतानां ब्रह्महेव जुगुप्सितः ॥
सततं यश्च कामार्थी नेतरावनुतिष्ठति ।
मित्राणि तस्य नश्यन्ति धर्मार्थाभ्यां च हीयते ॥
तस्य धर्मार्थहीनस्य कामान्ते निधनं ध्रुवम् ।
कामतो रममाणस्य मीनस्येवाम्भसः क्षये ॥
तस्माद्धर्मार्थयोर्नित्यं न प्रमाद्यन्ति पण्डिताः ।
प्रकृतिः सा हि कामस्य पावकस्यारणिर्यथा ॥
सर्वथा धर्म[3]मूलोऽर्थो धर्मश्चार्थपरिग्रहः ।
इतरेतरयोनी तौ विद्धि मेघोदधी यथा ॥

---

१ युधिष्ठिरस्य वनवासदुःखेन दूयमानया भर्तृवत्सलया द्रौपद्या स्नेहातिशयाच्चतुर्थपाद उक्तः । २ कुत्सितकर्मबीजमित्यर्थः । ३ धर्मेणैवोत्पाद्यः ।

धर्मं पूर्वं धनं मध्ये जघन्ये काममाचरेत् ।
अहन्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥
कामं पूर्वं धनं मध्ये जघन्ये धर्ममाचरेत् ।
वयस्यनुचरेदेवमेष शास्त्रकृतो विधिः ॥
धर्मं चार्थं च कामं च यथावद्वदतां वर ।
विभज्य काले कालज्ञः सर्वान्सेवेत पण्डितः ॥
मोक्षो वा परमं श्रेय एषां राजन्सुखार्थिनाम् ।
प्राप्तिं वा बुद्धिमास्थाय सोपायां कुरुनन्दन ॥
तथा ऽऽशु क्रियतां[1] राजन् प्राप्तिं वाप्यधिगम्यताम् ।
जीवितं ह्यातुरस्येव दुःखमन्तरवर्त्तिनः ॥

इत्येवंरूपे धर्मस्यैव प्राबल्यात्तदनुरोधेनैवार्थादीनां संपादनं न्याय्यं न तु तद्विरोधेनेत्येवंतात्पर्यकं युधिष्ठिरस्योत्तरम् ।

तं सन्धिमास्थाय सतां सकाशे को नाम जह्यादिह राज्यहेतोः ।
आर्यस्य मन्ये मरणाद्गरीयो यद्धर्ममुत्क्रम्य महीं प्रशासेत् ॥
मम प्रतिज्ञां च निबोध सत्यां वृणे धर्ममममृताज्जीविताच्च ।
राज्यं च पुत्राश्च यशो धनं च सर्वं न सत्यस्य कलामुपैति । इति

यत्तु तदये कालप्रतीक्षणे प्राणिनां विनाशसंभवादयुक्तत्वबोधके

संधिं कृत्वैव कालेन ह्यन्तकेन पतत्रिणा ।
अनन्तेनाप्रमेयेण स्रोतसा सर्वहारिणा ॥
प्रत्यक्षं मन्यसे कालं मर्त्यः सन्कालबन्धनः ।
फेनधर्मा महाराज फलधर्मा तथैव च ॥

१ मोक्षाय यत्नो विधीयताम् । प्राप्तिं वेति । स्वप्राप्यं राज्यं वा शीघ्रमेवोपायैः शत्रुभ्यः प्रत्यर्ज्यताम् ।

निमेषादपि कौन्तेय यस्यायुरपचीयते।
सूच्येवाञ्जनचूर्णस्य किमिति प्रतिपालयेत्॥

यो नूनममितायुः स्यादथ वापि प्रमाणवित्[1]।
स वै कालं प्रतीक्षेत सर्वप्रत्यक्षदर्शिवान्॥

इत्याक्षेपे युधिष्ठिरस्योत्तरमदत्तवतस्तद्भीषणमात्रं तदभ्युपगमरूपं[2] बोध्यम्। इत्यलं प्रसक्तानुप्रसक्त्या।

यद्यपि युधिष्ठिरेण को धर्म इत्यादि प्रश्ने कृते शान्तनवेन प्रागुक्ते धर्मलक्षणे ऽभिहिते तदुत्तरमेव युधिष्ठिरेण न धर्मः परिपाठेन शक्यो भारत वेदितुमित्यादिः प्रश्नः कृतस्ततश्चास्मिन्धर्मलक्षणे तस्यापरितोष इव प्रतीयते तथापि स प्रश्नो धर्मसत्ताविषयएव संशयबोधको न तु तत्प्रमापकविषयइति बोध्यम्। तेनैवोपसंहारे चिराभिपन्नः कविभिः पूर्वं धर्म उदाहृत इत्यनेन स्वभाववादस्योपक्षिप्तत्वात्। ततश्चाविद्यमानो धर्मः कथं परिपाठमात्रेण प्रमीयेत। प्रमाणानां प्रमेयं प्रत्यनुत्पादकत्वात्। न हि प्रामाणिकेनापि वन्ध्यापुत्रो ऽस्तीत्युक्ते कश्चन विवेचकस्तद्वचसि श्रद्दधीतेति न धर्म इत्यादेरभिप्रायः। अत एव भीष्मेणापि धर्मप्रमापकविषये ऽनुक्त्वतैवोत्तरम्। मो॰ अ ८८

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
तुलाधारस्य वाक्यानि धर्मे जाजलिना सहेति॥

---

१ आयुष्प्रमाणवित्।

२ यस्तु प्राणिनां क्षणभङ्गुरत्वात् कालप्रतीक्षणमयुक्तम् इति भीमस्य पुनराक्षेपः स राज्यपुत्रादीन् नन्वमृतमपि दूरमतीत्य सत्यधर्मो मे प्रेयानित्यनेनैव प्रत्युक्तः। तथापि राज्यभोगायात्यर्थमुत्कण्ठमानस्य भीमस्य चेतसि मुहुस्तदुपेक्षणवचनैः खेदो माभूद् इति दयालुर्युधिष्ठिरो ऽपरया युक्त्या तमसत्याभिसन्धेर्निवर्त्तयितुमुपक्रमते। उत्तरयन्थे। अथवा रजोनिमीलितानां मनसि धर्मस्य परमो गरिमा मुहुरुपदिश्यमानो ऽपि न दधाति पदमित्युपेक्षिता ऽसौ रागकृता शङ्का इति। प्रमदादासमहाशयः।

धर्मसत्तायामेव प्रमाणमुक्तम् । कश्चिज्जाजलिनामा मुनिर्वने चिरं तपस्यन् स्थाणुभूतो निजाङ्गं नीडीकृतवतः शकुन्तांल्विलोक्य दयया तथैव तिष्ठंस्तेषामण्डादिक्रमेण संतत्यां वृद्धायामपि तदर्थमेव तथैव तिष्ठंस्ते-ष्वड्डीय स्वाभिमतं देशं गतेषु मया चिरं भूतानुकम्पया धर्मः प्राप्त इति गर्वितोऽन्तरिक्षवाण्या

धर्मेण न समस्त्वं वै तुलाधारस्य जाजले ।

इति अधिक्षिप्तो वाराणसीस्थं तुलाधारमुपसर्पंस्तेन बोधित इतीतिहासेन । अनेन हि धर्मस्य स्वरूपतोऽभावे तदर्थं महाप्रयासे प्रवृत्तिर्मुनीनामनुपपन्ना स्यादिति धर्मोऽस्तीति सूच्यते । तदुत्तरं च तुला-धारेण । मो॰ अ ८८

सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः ।
कर्मणा मनसा वाचा स धर्मं वेद जाजले ॥

यस्मादुद्विजते लोकः सर्वो मृत्युमुखादिव ।
वाक्क्रूराद्दण्डपरुषात्स प्राप्नोति महद्भयम् ॥

यथावद्वर्तमानानां वृद्धानां पुत्त्रपौत्त्रिणाम् ।
अनुवर्त्तामहे वृत्तिमहिंस्राणां महात्मनाम् ॥

प्रनष्टः शाश्वतो धर्मः सदाचारेण मोहितः ।
तेन वैद्यस्तपस्वी वा बलवान्वा विमुह्यते ॥

लोके यः सर्वभूतेभ्यो ददात्यभयदक्षिणाम् ।
स सर्वभूतैरीजानः प्राप्नोत्यभयदक्षिणाम् ॥

न भूतानामहिंसाया ज्यायान्धर्मोऽस्ति कश्चन ।

इत्यादिना सर्वभूतहितकारित्वमेव धर्म इत्युपसंहृतम् । इदमेव राजधर्मेष्वपि युधिष्ठिरं प्रति भीष्मेणोक्तम् । राजध॰ अ १०९ ॥

प्रभ[1]वार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः ॥
धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥
अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यादहिंसया युक्तः स धर्म इति निश्चय इति ॥

तत्रैव । रा० ध० अ० १९०

श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।
न च तत्प्रत्यसूयामो न हि सर्वं विधीयते ॥

इत्यनेन श्रुत्युक्तः सर्वोपि धर्म एवेति न श्येनयागादेश्चोदितस्यापि धर्मत्वाभावात् । श्रुत्युक्त एव धर्म इत्यपि न । अन्येषामपि सामान्यधर्माविरोधिनां धर्मत्वादित्यपि दर्शितम् । अत एवापद्धर्मेषु प्रदर्शिता अनुपपत्तीरनुसंधायैव वचनमाज्ञेया धर्मा दुर्ज्ञाना इति स्वयमूहितव्यः स इति प्रतिपादितम् । आप० अ० १२

न धर्मवचनं वाचा नैव बुध्येति नः श्रुतम् ।
इति बार्हस्पतं ज्ञानं प्रोवाच मघवा स्वयम् ॥
न[2]त्वेव वचनं किं चिदनिमित्तादिहोच्यते ।
सुविनीतेन शास्त्रेण न व्यवस्यन्त्यथापरे ॥
लो[3]कयात्रामिहैके तु धर्मं प्राहुर्मनीषिणः ।
समुद्दिष्टं सतां धर्मं स्वयमूहेत पण्डितः ॥ इति ।

---

१ प्रभवः कल्याणम् । धारणं रक्षणम् । अहिंसा ऽपीडनम् ।

२ अहेतुकं न किमप्युच्यते ऽश्रुतफलेषु विध्यन्यथानुपपत्त्या फलकल्पनादिति भावः । विध्याभासमात्रानाप्ततायिगुर्वाविहननमात्रे तृष्णया न प्रवर्तन्ते शिष्टा इत्यर्थः ।

३ लोकाविरोधं धर्मं बुधा आहुः । स चैर्यद्भिः प्रकारैरिति निरूपयितुमशक्यत्वात्तदात्वे लोकाविरुद्धत्वेनाभासमानस्याप्यायत्यां लोकविरुद्धत्वे त्यागावश्यकत्वेन विचार आवश्यक इति भावः ।

नैतच्छ्रुत्वागमादेव तव धर्मानुशासनम् ।
प्रज्ञासमवहारोयं कविभिः संभृतं मधु ॥

इति स्वस्यापि केवलागमेन धर्मज्ञानाभावं बुद्ध्वा कल्पनं च वदता लोकानां तु तस्तुतरां दुर्ज्ञानमिति दर्शितम् । आगमादेव श्रुत्वा तव धर्मानुशासनं न कृतमिति शेषः । अपि तु प्रज्ञासमवहारः बुद्धेर्निष्ठेत्यर्थः । एतत् यागादिवद्विधेयं न । अपि तु कविभिरकरणे महान्तं दोषं पश्यद्भिर्मध्विव सुखदं संभृतं कल्पितमित्यर्थः । अत एव । आ॰अ॰ १२

नैकशाखेन धर्मेण यात्रैषा संप्रवर्त्तते ।
बुद्धिसंजननो धर्म आचारश्च सतां सदा ॥
ज्ञेयो भवति कौरव्य सदा तद्विद्धि मे वचः ।

इत्यनेन केवलेनागमेन केवलया बुध्या वा धर्मनिर्णयः कर्त्तुं न शक्यतइत्यर्थकेनोक्तम् । अत एवैकदेशदर्शिभिरर्थशास्त्रं नादर्त्तव्यमिति वदद्भिः केवलार्थशास्त्रदर्शनेन धर्मशास्त्रं च दूषयद्भिरुक्तं न ग्राह्यमिति तन्निन्दामुखेनाह । आ॰अ॰ १२

परिमुष्णन्ति शास्त्राणि धर्मस्य परिपन्थिनः ।
वैषम्यमर्थविद्यानां नैरर्थ्यात्ख्यापयन्ति ते ॥
आजिजीविषवो विद्यां यशःकामो समन्ततः ।
ते सर्वे नृप पापिष्ठा धर्मस्य परिपन्थिनः ॥
अपक्वमतयो मन्दा न जानन्ति यथातथम् ।
यथा ह्यशास्त्रकुशलाः सर्वत्रायुक्तिनिष्ठिताः ॥
परिमुष्णन्ति शास्त्राणि शास्त्रदोषानुदर्शिनः ।
वि[1]ज्ञानमर्थं विद्यानां न सम्यगिति वर्त्तते ॥

---

१ शास्त्रप्रतिपाद्यं न साधुफलदमिति कश्चिच्चास्तिको वदन्वर्ततइत्यर्थं इति भाति ।

निन्दया परविद्यानां स्वविद्यां ख्यापयन्ति च ।
वागस्त्रा वाक्छुरीभूता दु[1]ग्धविद्याफला इव ॥
तान्विद्यावणिजो विद्धि राक्षसानिव भारतेति ।

वैषम्यम् । अप्रामाण्यमधर्मत्वं वा । यशो वचनैकवद्द्वादर इत्येवं-रूपम् । अत एव । मो॰ अ॰ ८६ ।

चतुर्थमर्थमित्याहुः कवयो धर्मलक्षणमिति ॥

धर्मज्ञापकत्वमर्थस्यापि दर्शितम् । एतदेव दृढीकर्तुं युधिष्ठिरभीष्मयोः प्रश्नोत्तरमुखेन क्रोधलोभाद्यनभिभूतोक्तेरेव धर्मे प्रमाणत्वं असतां दुर्गतिः सतां साधुगतिः तयोः संक्षेपतः स्वरूपं च कृतस्यापि ज्ञानादज्ञानाद्वा पापस्य प्रायश्चित्तनाश्यता ऽप्रच्छाद्यता च दर्शिता । अनु॰ अ॰ १६३ ।

नि[2]र्णये वा महाबुद्धे सर्वधर्मविदां वर ।
प्रत्यक्षमागमो वेति किं तयोः कार[3]णं भवेत् ॥

भीष्म उवाच ।

नास्त्यत्र संशयः कश्चिदिति मे वर्तते मतिः ।
शृणु वक्ष्यामि ते प्राज्ञ सम्यक् त्वं मेनुपृच्छसि ॥
संशयः सुगमस्तत्र दुर्गमस्तस्य निर्णयः ।
दृष्टं श्रुतमनन्तं हि यत्र[4] संशयदर्शनम् ॥
प्रत्यक्षं कारणं दृष्ट्वा हैतुकाः प्राज्ञमानिनः ।
नास्तीत्येवं व्यव[5]स्यन्ति सत्यं संशयमेव च ॥
तदयुक्तं व्यवस्यन्ति बालाः पण्डितमानिनः ।
अथ चेन्मन्यसे चैकं कारणं किं भवेदिति ॥

---

१ दुग्धं प्राप्तं विद्याफलं यैस्तथैवेत्यर्थः । २ धर्मनिर्णये कर्तव्ये । ३ प्रबलं ज्ञापकम् । ४ धर्मविषये संशयो बहुत्र लोकवेदयोर्दृष्ट इत्यर्थः ।

५ शुष्कतार्किकाः प्रत्यक्षमेव ज्ञापकं मन्यमानाः सत्यमपौरुषेयं वेदं नास्तीत्येव जानन्ति । अपरे त्वस्ति न वेति संशेरते ।

शक्यं दीर्घेण कालेन युक्तेनातन्द्रितेन च ।
प्राणयाचामनेकां च कल्पमानेन भारत ॥
तत्परेणैव नान्येन श[1]क्यं ह्येतस्य दर्शनम् ।
हे[2]तूनामन्तमासाद्य विपुलं ज्ञानमुत्तमम् ॥
ज्योतिः सर्वस्य लोकस्य विपुलं प्रतिपद्यते ।
न[3] त्वेव गमनं राजन् हेतुतो गमनं तथा ॥
अग्राह्यमनिबद्धुं च वाचा संपरिवर्जयेत् ।

युधिष्ठिर उवाच ।

प्रत्यक्षं लोकतः सिद्धिर्लोकश्चागमपूर्वकः ।
शिष्टाचारो बहुविधस्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
संस्था यत्नैरपि कृता कालेन प्रतिभिद्यते ॥
अधर्मो धर्मरूपेण तृणैः कूपइवावृतः ।
ततस्तैर्भिद्यते वृत्तं शृणु चैव युधिष्ठिर ॥
अवृ[4]त्ता ये तु भिन्दन्ति श्रुतित्यागपरायणाः ।
धर्मविद्वेषिणो मन्दा इत्युक्तस्तेषु संशयः ॥
अतृप्यन्तस्तु साधूनां यएवागमबुद्धयः ।
प[5]रमित्येव संतुष्टास्तानुपास्व च पृच्छ च ॥

---

१ दीर्घकालादरनैरन्तर्यसत्कारसेवितेनाभ्यासेनैकस्य परमकारणस्य दर्शनं शक्यमित्यर्थः । २ अन्त्यप्रमाणेन सम्यग्ज्ञाने सर्वप्रकाशकं ब्रह्मतत्त्वं स्फुरतीत्यर्थः । ३ केवलतर्केण ज्ञानं न सम्यक् इति तत्रादरणीयं यद्वाचा वेदेनानुक्तं तत्त्याज्यमित्यर्थः । ४ दुःशीला ये परमार्थतः श्रुतितात्पर्यमनवबुध्य मर्यादामुल्लङ्घयन्ति तदाचारः संशायक एवेत्यर्थः । ५ वेदजन्या एव धियः श्रेष्ठं प्रमाणमिति ये निश्चितास्ते शिष्टास्तदाचार एव ग्राह्य इत्यर्थः ।

कामार्थौ पृष्ठतः कृत्वा लोभमोहानुसारिणौ ।
धर्म इत्येव संबुद्धस्तानुपास्व च पृच्छ च ॥
न तेषां भिद्यते वृत्तं यज्ञाः स्वाध्यायकर्म च ।
आचारः कारणं चैव धर्मश्चैक[1]स्त्रयं पुनः ॥

युधिष्ठिर उवाच ।

पुनरेव हि मे बुद्धिः संशये परिमुह्यति ।
अपारे मार्गमाणस्य पारं तीरमपश्यतः ॥
वेदः[2] प्रत्यक्षमाचारः प्रमाणं तत्त्रयं यदि ।
पृथक्त्वं लभ्यते चैषां धर्मश्चैकस्त्रयं कथम् ॥

भीष्म उवाच ।

धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
यद्येवं मन्यसे राजंस्त्रिधा धर्मविचारणा ॥
एक एवेति जानीहि त्रिधा धर्मस्य दर्शनम् ।
पृथक्त्वेन च मे बुद्धिस्त्रयाणामपि वै तथा ॥
उक्तो मार्गस्त्रयाणां च तत्तथैव समाचरे[3]र ।
जिज्ञासा न तु कर्तव्या धर्मस्य परितर्कणात् ॥
सदैव भरतश्रेष्ठ मा ते भूदत्र संशयः ।
अन्धो जडइवाशङ्की यद्ब्रवीमि तदाचर ॥
अहिंसा सत्यमक्रोधो दानमेतच्चतुष्टयम् ।
अजातशत्रो सेवस्व धर्म एष सनातनः ॥

---

१ ज्ञापकत्वं समुदितानां वेदवृत्ताचाराणां प्रत्येकमपि धर्मादावित्यर्थः ।

२ प्रमाणभेदे प्रमेयभेदावश्यकत्वेन कथमेतदिति भावः ।

३ पृथक् प्रमाणत्वे निर्णयासंभवस्यातिप्रसङ्गस्य चोपपादितत्वात्सर्वाविरोधेन निर्णीत एव धर्मः । पृथक्त्वेन प्रमाणता च न मम संमता । तथापि श्रौतो मार्गो बलीयानिति पिण्डितार्थः । केवलतर्केण धर्मविचारश्चायुक्त इत्याह । जिज्ञासेति ।

ब्राह्मणेषु च वृत्तिर्या पितृपैतामहोचिता ।
तामन्वेहि महाबाहो धर्मस्यैते हि देशिकाः ॥

प्र[1]माणमप्रमाणं वै यः कुर्यादबुधो जनः ।
न स प्रमाणतामर्हो विवादजननो हि सः ॥

ब्राह्मणानेव सेवस्व सत्कृत्य बहुमन्य च ।
एतेष्वेव त्विमे लोकाः कृत्स्ना[2] इति निबोध तान् ॥

युधिष्ठिर उवाच ।

ये च धर्ममसूयन्ते ये चैनं पर्युपासते ।
ब्रवीतु मे भवानेतत् क्व ते गच्छन्ति तादृशाः ॥

भीष्म उवाच ।

रजसा तमसा चैव समवस्तीर्णचेतसः ।
नरकं प्रतिपद्यन्ते धर्मविद्वेषिणो जनाः ॥

ये तु धर्मं महाराज सततं पर्युपासते ।
सत्यार्जवपराः सन्तस्ते वै स्वर्गभुजो नराः ॥

धर्म एव गतिस्तेषामाचार्योपासनाद्भवेत् ।
देवलोकं प्रपद्यन्ते ये धर्मं पर्युपासते ॥

मनुष्या यदि वा देवाः शरीरमुपताप्य वै ।
धर्मिणः सुखमेधन्ते लोभद्वेषविवर्जिताः ॥

प्रथमं ब्रह्मणः पुत्रं धर्ममाहुर्मनीषिणः ।
धर्मिणः पर्युपासन्ते[3] फलं पक्वमिवाशयः ॥

युधिष्ठिर उवाच ।

असतां कीदृशं रूपं साधवः किं च कुर्वते ।
ब्रवीतु मे भवानेतत्सन्तोऽसन्तश्च कीदृशाः ॥

---

१ प्रमाणं श्रुत्यादि यः अप्रमाणं वदेदित्यर्थः ।

२ प्रतिष्ठिता इति शेषः ।

३ तस्मिन्निति शेषः । आशयो भोक्तुर्मन इति टी. ।

भीष्म उवाच ।

दुराचाराश्च दुर्धर्षा दुर्मुखाश्चाप्यसाधवः ।
साधवः शीलसंपन्नाः शिष्टाचारस्य लक्षणम् ॥
राजमार्गे गवां मध्ये धान्यमध्ये च धर्मिणः ।
नोपसेवन्ति राजेन्द्र सर्गं[1] मूत्रपुरीषयोरित्यादि ॥
न जातु त्वमिति ब्रूयादापन्नोऽपि महत्तरम् ।
त्वंकारो वा वधो वेति विद्वत्सु न विशिष्यते ॥
अवराणां समानानां शिष्याणां च समा[2]चरेत् ।
पापमाचक्ष[3]ते नित्यं हृदयं पापकर्मिणः ॥
ज्ञानपूर्वकृतं कर्म छादयन्ते ह्यसाधवः ।
ज्ञानपूर्वं विनश्यन्ति गूहमाना महाजने ॥
न मां मनुष्याः पश्यन्ति न मां पश्यन्ति देवताः ।
पापेनाभिहितः पापः पापमेवाभिजा[4]यते ॥
यथा वार्द्धुषिको वृद्धिं दिनभेदे प्रतीक्षते ।
धर्मेण पिहितं पापं धर्ममेवाभिवर्द्धयेत् ॥
यथा लवणमम्भोभिराप्लुतं प्रविलीयते ।
प्रायश्चित्तहतं पापं तथा सद्यः प्रणश्यति ॥
तस्मात्पापं न गूहेत गूहमानं विवर्द्धयेत् ।
कृत्वा तत्साधुष्वाख्येयं ते तत्प्रशमयन्त्युत ॥
आशया संचितं द्रव्यं कालेनैवोपभुज्यते ।
अन्ये चैतत्प्रपद्यन्ते वियोगे तस्य देहिनः ॥

१ सर्गमुत्सर्गम् ।
२ त्वंकारम् ।
३ पापकर्मणा मनसः पापिष्ठत्वमनुमीयतइत्यर्थः ।
४ न कश्चन पश्यतीत्यालोच्य पापमाचरन्पापान्तरमुत्पादयतीत्यर्थः ।

आनृशंसं सर्वभूतानां धर्ममाहुर्मनीषिणः ।
तस्मात्सर्वाणि भूतानि धर्ममेव समासते ॥
एक एव चरेद्धर्मं न धर्मध्वजिको भवेत् ।
धर्मवाणिजका ह्येते ये धर्ममुपभुञ्जते ॥
अर्चेद्देवानदम्भेन सेवेतामायया गुरून् ।
निधिं निदध्यात्पारत्र्यं यात्रार्थं दानशब्दितम् ॥ इति ।

अत्र चान्तिमेन श्लोकद्वयेन दम्भाद्धर्माचरणस्य फलाभिसंधिपूर्वकं च तस्य निषेधो दर्शितः । तदेवं वचनैर्बोधिते विषये सामान्यतो लक्षणे ज्ञातेऽपि के ते धर्मा इत्यपेक्षायां मनुराह ।

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणमिति ॥

एतेषां तुरीयाश्रमधर्मप्रकरणे मनुना पाठात्संन्यासिनामेवैते धर्मा इति तु न शङ्क्यम् ।

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥

इति प्रक्रम्यैतेषां पाठात् । तत्र द्विजैरिति द्विशब्दाभिप्रायमुपलक्षणं चेतरेषाम् । वक्ष्यमाणवचनैः

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥

इति स्वयमेव वक्ष्यमाणत्वाच्च तद्वचनस्य संकरजप्रकरणे पाठात्तत्त्वचातुर्वर्ण्यपदस्योपलक्षणतया क्षमादीनां द्विजतदितरसाधारण्यावगमात् । वेदार्थज्ञानपूर्वकात्मज्ञानमात्रस्येतरेषां निषेधात्पुराणाद्यर्थज्ञानपूर्वकात्मज्ञानस्य तेषामपि विधानाच्च । अत एव भक्तिशास्त्रेऽधि-

१ धर्मप्रकाशकः ।

कारी मनुष्यमात्रस्य शाण्डिल्यमुनिना प्रतिपादितः । भक्तेश्च ज्ञानादनतिरिक्तकालता ।

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैतित्रिक एककालः ।

इति भागवतवचनेन स्पष्टैव । एवं शैवेश्वरप्रत्यभिज्ञाशास्त्रे ऽप्यधिकारस्तेषां तच्छास्त्रे प्रतिपादितो ऽधिकारिनिरूपणावसरे जन इत्युक्त्वा जननमरणार्पितजीवमात्रस्य ग्रहणादिति तत्रैव विस्तरः । विष्णुरप्याह ।

क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आर्जवमलोभित्वं देवतानां च पूजनम् ।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते ॥ इति ।

बृहस्पतिरपि ।

दया क्षमा ऽनसूया च शौचानायासमङ्गलम् ।
अकार्पण्यास्पृहत्वं च सर्वसाधारणो विधिः ॥ इति ।

युधिष्ठिरं प्रति भगवता साक्षाद्धर्मेणाप्येतदेवोक्तम् । वनप॰ अ ३१२

यशः सत्यं दमः शौचं मार्दवं ह्रीरचापलम् ।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम ॥ ७ ॥
अहिंसा समता शान्तिस्तपः शान्तिरमत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियो ऽह्यसि सदा ममेति ॥ ८ ॥

एते चार्षधर्मा इत्याह । राजधर्मे । अ १२

शमो दमस्तथा धैर्यं सत्यं शौचमथार्जवम् ।
यज्ञो धृतिश्च धर्मश्च नित्यमार्षो विधिः स्मृतः ॥ १७ ॥ इति ।

एते च प्रधाना धर्मा इष्टाश्चेत्याह । राजधर्मे॰ अ २१

अद्रोहेणैव भूतानां यो धर्मः स सतां मतः ।
अद्रोहः सत्यवचनं संविभागो दया दमः ॥ ११ ॥

प्रजनः स्वेषु दारेषु मार्दवं ह्रीरचापलम् ।
एवं धर्मं प्रधानेष्टं मनुः स्वायंभुवो ऽब्रवीत् ॥ १२ ॥
तस्मादेतत्प्रयत्नेन कौन्तेय परिपालयेति ।

प्रधानश्चासाविष्टश्चेति समासः । एते च सार्ववर्णिका इत्याह । रा अ॰ ६०

अक्रोधः सत्यवचनं संविभागः क्षमा दया ।
प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ।
आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः ॥ ७ ॥ इति ।

तपसः स्वर्गसाधनत्वं प्रसिद्धतमं तपश्चैतदेवेत्याह । रा अ ७९

तपो यज्ञादपि श्रेष्ठमित्येषा परमा श्रुतिः ।
तत्ते तपः प्रवक्ष्यामि विद्वंस्तदपि मे शृणु ।
अहिंसा सत्यवचनमानृशंस्यं दमो घृणा ॥
एतत्तपो विदुर्धीरा न शरीरस्य शोषणमिति ॥ १८ ॥

शरीरशोषणाभावेऽपि सर्वविधं तपो ऽधिकारिभेदाद्भवतीति युधिष्ठिरं प्रति भीष्म आह । मोक्षध॰ अ॰ ५८

य[1]दिदं तप इत्याहुरुपवासं पृथग्जनाः ।
तपः स्यादेतदेवेह तपोन्यद्वापि किं भवेत् ॥

भीष्म उवाच ।

मासार्धमासोपवासाद्यत्तपो मन्यते जनः ।
आत्मतन्त्रोपघाती यो न तपस्वी न धर्मवित् ॥
त्यागस्यापि च संपत्तिः शिष्यते तप उत्तमम् ।
सदोपवासी च भवेद् ब्रह्मचारी तथैव च ॥

१ अनेनैव क्रमेणैते श्लोकाः आनुशासनिके ९३ अध्याये सन्ति ।

मुनिश्च स्यात्सदा विप्रो वेदांश्चैव सदा जपेत्।
कुटुम्बिको धर्मकामः सदाऽस्वप्नश्च मानवः॥
अमांसाशी सदा च स्यात्पवित्रं च सदा पठेत्।
ऋतवादी सदा च स्यान्नियतश्च सदा भवेत्॥
विघसाशी सदा च स्यात्सदा चैवातिथिप्रियः।
अमृताशी सदा च स्यात्पवित्री च सदा भवेत्॥

युधिष्ठिर उवाच।

कथं सदोपवासी स्याद् ब्रह्मचारी च पार्थिव।
विघसाशी कथं च स्यात्कथं चैवातिथिप्रियः॥

भीष्म उवाच।

अन्तरा सायमाशं च प्रातराशं च यो नरः।
सदोपवासी भवति यो न भुङ्क्ते ऽन्तरा पुनः॥
भार्यां गच्छन् ब्रह्मचारी ऋतौ भवति चैव हि।
ऋत[1]वादी सदा च स्याद्दानशीलश्च मानवः॥
अभक्षयन् वृथामांसममांसाशी भवत्युत।
दानं ददत्पवित्री स्यादस्वप्नश्च दिवाऽस्वपन्॥
भृत्यातिथिषु यो भुङ्क्ते भुक्तवत्सु नरः सदा।
अमृतं केवलं भुङ्क्तइति विद्धि युधिष्ठिर॥
अभुक्तवत्सु नाश्नाति ब्राह्मणेषु तु यो नरः।
अभोजनेन तेनास्य जितः स्वर्गो भवत्युत॥
देवेभ्यश्च पितृभ्यश्च सं[2]श्रितेभ्यस्तथैव च।
अवशिष्टानि यो भुङ्क्ते तमाहुर्विघसाशिनम्॥

---

१ ऋतवादी भवेन्नित्यं ज्ञाननित्यश्च यो नर इत्यपि पाठः।
२ भृत्येभ्योऽतिथिभिः सहेत्यपि पाठः।

तेषां लोका ह्यपर्यन्ताः सदने ब्रह्मणः स्मृताः ।
उपस्थिता ह्यप्सरसो गन्धर्वैश्च जनाधिप ॥
देवतातिथिभिः सार्धं पितृभिश्चोपभुज्जते ।
रमन्ते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा ॥ इति ।

अनेन हि प्रकरणेन गृहस्थस्य स्वकार्यमनुरुध्यापि तपः सर्वविधं भवतीति प्रतिपाद्यते । अत्र च ऋत्युक्तकालाधिकरणकभोजनादेः प्रवृत्तिमत्पुरुषविषयतया विहितस्य पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यतीति न्यायेन सदोपवासादिबोधकवचनसंकोचकतया संकुचितवाक्यार्थस्य यथावदनुष्ठानेन सिध्यत्येव यथोक्तफलसंपादकत्वमिति बोध्यम् ।

आतिदेशिकमेवैतत्सदोपवासादि मुख्यसंपाद्यफलमपेक्ष्य किं चिन्यूनं फलं ददातीति तु परे । इत्यलं प्रसक्तानुप्रसक्त्या । न केवलं नित्यत्वेनानुष्ठेया एते धर्मा अपि तु सुखसाधनतयापीत्याह । मोक्ष० अ ४२ ।

अहिंसा सत्यवचनं सर्वभूतेषु चार्जवम् ।
क्षमा चैव प्रसादश्च यस्यैते स सुखी भवेत् ॥ १ इति ।
दमः क्षमा धृतिस्तेजः संतोषः सत्यवादिता ।
ह्रीरहिंसाऽव्यसनिता दाक्ष्यं चेति सुखावहाः ॥ इति च ।

एतेषामेव वस्तुतो ब्राह्मण्य[1]प्रयोजकता ऽजगरयुधिष्ठिरसंवादे स्पष्टा । वनप० अ १८० ।

सर्प उवाच ।
ब्राह्मणः[1] को भवेद्राजन् वेद्यं किं च युधिष्ठिर ।
ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे ॥
युधिष्ठिर उवाच ।
सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा ।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतिः ॥

---

१ अपरोक्षब्रह्मानुभूतिमत्त्वमिह विवक्षितमुपसंहारानुगुण्यात्स्वारस्याच्च ।

वेद्यं सर्प परं ब्रह्म निर्दुःखमसुखं च यत् ।
यत्र गत्वा न शोचन्ति भवतः किं विवक्षितम् ॥

सर्प उवाच ।

चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि ।
शूद्रेष्वऽपि च सत्यं च दानमक्रोध एव च ॥
आनृशंस्यमहिंसा च घृणा चैव युधिष्ठिर ।
वेद्यं यच्चात्र निर्दुःखमसुखं च नराधिप ॥
ताभ्यां हीनं पदं चान्यन्न तदस्तीति लक्षये ॥

युधिष्ठिर उवाच ।

शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
नैव शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥
यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः ।
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत् ॥
यत्पुनर्भवता प्रोक्तं न वेद्यं विद्यतीति च ।
ताभ्यां हीनमतोन्यत्र पदं नास्तीति चेदपि ॥
एवमेतन्मतं सर्प ताभ्यां हीनं न विद्यते ।
यथा शीतोष्णयोर्मध्ये भवेन्नोष्णं न शीतता ॥
एवं वै सुखदुःखाभ्यां नास्ति हीनं पदं क्वचित् ।
एषा मम मतिः सर्प यथा वा मन्यते भवान् ॥

सर्प उवाच ।

यदि ते वृत्ततो राजन् ब्राह्मणः प्रसमीक्षितः ।
वृथा जातिस्तदाऽऽयुष्मन् कृतिर्यावन्न विद्यते ॥

१ जातिग्राहकं सत्यादिकं मत्वान माक्षिपति ।

युधिष्ठिर उवाच ।

जातिरत्र महासर्प मनुष्यत्वे महामते ।
संकरात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।
वाङ्मैथुनमथो जन्म मरणं च समं नृणाम् ॥
इदमार्षं प्रमाणं हि ये यजामह इत्यपि ।
तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्वदर्शिनः ॥
प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
तदास्य माता सावित्री पिता त्वाचार्य उच्यते ॥
तावच्छूद्रसमो ह्येष यावद्वेदे न जायते ।
तस्मिन्नेवं मतिद्वैधे मनुः स्वायंभुवोऽब्रवीत् ॥
कृतकृत्याः पुनर्वर्णा यदि वृत्तं न विद्यन्ते ।
संस्कारस्त्वत्र नागेन्द्र बलवान्प्रसमीक्षितः ॥
यत्रेदानीं महासर्प संस्कृतं वृत्तमिष्यते ।
तं ब्राह्मणमहं पूर्वमुक्तवान्भुजगोत्तम[4] ॥ इति

इमे च कदापि न त्याज्या इत्याह धृतराष्ट्रं प्रति विदुरः । उ॰ अ॰ ३३

षडेव तु गुणाः पुंसा न हातव्याः कदा चन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिरिति ॥ ८१ ॥

---

१ आचार एव जातौ प्रमाणमित्युपसंहरति ।

२ शूद्रतुल्यतापातेन । अत इति शेषः ।

३ अतश्च संस्कारतथाविधाचारवृत्तानामसाधनिश्चायकत्वा पर्यवस्यति ।

४ ब्राह्मणस्यैव चातुर्वर्ण्योपदेष्टृतया शीलशुद्धिर्विशेषेणापेक्षितेति तद्गुणाय गीयते अनयोर्ब्राह्मणस्यैव यद्वृत्तनिचयो महानित्यादि सर्व्वे च वेदा इत्यादि तस्मात् क्षत्रिय मा मंस्था इत्यादि ज्यायांसमपि शीलेनेत्यादि च । प्रमदादासमहाशयः ।

उ॰ अ॰ ३५।

अष्टौ नृपेमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि।
चत्वार्येषामन्ववेतानि[1] सद्भिश्चत्वारि चैषामनुयान्ति[2] सन्तः॥५४॥
यज्ञो दानमध्ययनं तपश्च चत्वार्येतान्यन्ववेतानि सद्भिः।
दमः सत्यमार्जवमानृशंस्यं चत्वार्येतान्यनुयान्ति सन्तः॥५५॥

इज्याध्ययनदानानि तपःसत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥५६॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥५७॥ इति च।

उ॰ अ॰ ३८।

धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः॥३८ इति च।

चातुराश्रम्यवासिनामेते धर्मा ययातिना ऽपि दर्शिताः। आदिप॰ अ॰ ९१।

आहूताध्यायी गुरुकर्मस्वचोद्यः[3] पूर्वोत्थायी चरमं चोपशायी।
मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी॥२
धर्मागतं प्राप्य धनं यजेत दद्यात्सदैवातिथीन्भोजयेच्च।
अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषत्[4] पुराणी॥३
स्ववीर्यजीवी वृजिनान्निवृत्तो दाता परेभ्यो न परोपतापी।
तादृङ्मुनिः सिद्धिमुपैति मुख्यां वसन्नरण्ये नियताहारचेष्टः॥४

---

१ नित्यसंबद्धानि। २ यत्नेन भजन्ति।
३ अनुक्त एव गुरुकार्यकर्ता।
४ गृहस्थधर्मरहस्यम्।

अशिल्पजीवी गुणवांश्चैव नित्यं जितेन्द्रियः सर्वतो विप्रयुक्तः ।
अनोक[1]शायी लघुरल्पप्रचारश्चरन्देशानेकचरः स भिक्षुः ॥ ५

राध्या यया वाभिजाताश्च लोका
भवन्ति कामाभिजिताः सुखाश्च ।
तामेव रात्रिं प्रयतेत विद्वा-
नरण्यसंस्थो भवितुं यतात्मा ६ इति ॥

अत्रेदं बोध्यम् । केषु चित्पुस्तकेषु पञ्चा केषु चिदष्टानां केषु चिद्दशानामित्यादि संख्यावैजात्यं केषां चित्तदन्येष्वन्तर्भावाभिप्रायेण । यथेज्याध्ययनेत्यादिवचने ऽक्रोधस्यानुक्तिस्तस्य क्षमायामन्तर्भावाभिप्रायेणेत्यादि केषु चिद् ब्राह्मणवसिष्ठन्यायेनादरार्थं प्रपञ्चार्थं वान्येषां पाठ इति । अयमेवार्थ आनुशासनिके पर्वण्युमामहेश्वरसंवादमुखेन विस्तरेण निरूपितः किं चिद्रूपदर्श्यते । आनु अ·१४४ ।

महेश्वर उवाच ।
देवि धर्मार्थतत्त्वज्ञे धर्मनित्ये दमे रते ।
सर्वप्राणिहितः प्रश्नः श्रूयतां बुद्धिवर्द्धनः ॥
सत्यधर्मरताः सन्तः सर्वलिङ्ग[2]विवर्जिताः ।
धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ॥
नाधर्मेण न धर्मेण बध्यन्ते छिन्नसंशयाः ।
प्रलयोत्पत्तितत्त्वज्ञाः सर्वज्ञाः सर्वदर्शिनः ॥
वीतरागा विमुच्यन्ते पुरुषाः कर्मबन्धनैः ।
कर्मणा मनसा वाचा ये न हिंसन्ति किं चन ॥
ये न सज्जन्ति कस्मिंश्चित्ते न बध्यन्ति कर्मभिः ।
प्राणातिपाताद्विरताः शीलवन्तो दयान्विताः ॥

१ तरुमूलादिनिकेतनः । २ आश्रमलिङ्गरहिताः ।

तुल्यद्वेष्यप्रिया दान्ता मुच्यन्ते कर्मबन्धनैः ।
सर्वभूतदयावन्तो विश्वास्याः सर्वजन्तुषु ॥
त्यक्तहिंसासमाचारास्ते नराः स्वर्गगामिनः ।
परस्वे निर्ममा नित्यं परदारविवर्जकाः ॥
धर्मलब्धान्नभोक्तारस्ते नराः स्वर्गगामिनः ।
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये ॥
परदारेषु वर्त्तन्ते ते नराः स्वर्गगामिनः ।
स्तैन्यान्निवृत्ताः सततं संतुष्टाः स्वधनेन च ॥
स्वभाग्यान्युपजीवन्ति ते नराः स्वर्गगामिनः ।
स्वदारनिरता ये च ऋतुकालाभिगामिनः ॥
अग्राम्यसुखभोगाश्च ते नराः स्वर्गगामिनः ।
परदारेषु ये नित्यं चरित्रावृतलोचनाः ॥
यतेन्द्रियाः शीलपरास्ते नराः स्वर्गगामिनः ।
एष देवकृतो मार्गः सेवितव्यः सदा नरैः ॥
अकषायकृतश्चैव मार्गः सेव्यः सदा बुधैः ।
दानधर्मतपोयुक्तः शीलशौचदयात्मकः ॥
वृत्त्यर्थं धर्महेतोर्वा सेवितव्यः सदा नरैः ।
स्वर्गवासमभीप्सद्भिर्न सेव्यस्त्वत उत्तरः ॥

उमोवाच ।

वाचा तु बध्यते येन मुच्यतेप्यथ वा पुनः ।
तानि कर्माणि मे देव वद भूतपतेनघ ॥

महेश्वर उवाच ।

आत्महेतोः परार्थे वा नर्महास्याश्रयात्तथा ।
ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥

१ यदृच्छालाभसंतुष्टाः ।

वृत्यर्थं धर्महेतोर्वा कामकारात्तथैव च ।
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः ॥
श्लक्ष्णां वाणीं निराबाधां मधुरां पापवर्जिताम् ।
स्वागतेनाभिभाषन्ते ते नराः स्वर्गगामिनः ॥
परुषं ये न भाषन्ते कटुकं निष्ठुरं तथा ।
अपैशुन्यरताः सन्तस्ते नराः स्वर्गगामिनः ॥
पिशुनां न प्रभाषन्ते मित्रभेदकरीं गिरम् ।
ऋतं मैत्रं तु भाषन्ते ते नराः स्वर्गगामिनः ॥
ये वर्जयन्ति परुषं परद्रोहं च मानवाः ।
सर्वभूतसमा दान्तास्ते नराः स्वर्गगामिनः ॥
शठप्रलापाद्विरता विरुद्धपरिवर्जकाः ।
सौम्यप्रलापिनो नित्यं ते नराः स्वर्गगामिनः ॥
न कोपाद्व्याहरन्ते ये वाचं हृदयदारणीम् ।
सान्त्वं वदन्ति क्रुद्धापि ते नराः स्वर्गगामिनः ॥
एष वाणीकृतो देवि धर्मः सेव्यः सदा नरैः ।
शुभः सत्यगुणो नित्यं वर्जनीयो मृषा बुधैः ॥

उमोवाच ।

मनसा बध्यते येन कर्मणा पुरुषः सदा ।
तन्मे ब्रूहि महाभाग देवदेव पिनाकधृक् ॥

महेश्वर उवाच ।

मानसेनेह धर्मेण संयुक्ताः पुरुषाः सदा ।
स्वर्गं गच्छन्ति कल्याणि तान्मे कीर्तयतः शृणु ॥
दुष्प्रणीतेन मनसा दुष्प्रणीततराकृतिः ।
मनो बध्यति येनेह शृणु वाक्यं शुभानने ॥

अरण्ये विजने न्यस्तं परस्वं दृश्यते यदा।
मनसापि न हिंसन्ति ते नराः स्वर्गगामिनः॥
ग्रामे गृहे वा ये द्रव्यं पारक्यं विजने स्थितम्।
नाभिनन्दन्ति वै नित्यं ते नराः स्वर्गगामिनः॥
तथैव परदारान् ये कामवृत्तान् रहोगतान्।
मनसापि न हिंसन्ति ते नराः स्वर्गगामिनः॥
शत्रुं मित्रं च ये नित्यं तुल्येन मनसा नराः।
भजन्ति मैत्राः संगम्य ते नराः स्वर्गगामिनः॥
श्रुतवन्तो दयावन्तः शुचयः सत्यसंगराः।
स्वैरर्थैः परिसन्तुष्टास्ते नराः स्वर्गगामिनः॥
अवैरा ये त्वनायासा मैत्रीचित्तरताः सदा।
सर्वभूतदयावन्तस्ते नराः स्वर्गगामिनः॥
श्रद्धावन्तो दयावन्तश्चोक्षा[१]श्चोक्षजनप्रियाः।
धर्माधर्मविदो नित्यं ते नराः स्वर्गगामिनः॥
शुभानामशुभानां च कर्मणां फलसंचये।
विपाकज्ञाश्च ये देवि ते नरः स्वर्गगामिनः॥
न्यायोपेता गुणोपता देवद्विजपराः सदा।
समुत्थानपरा भूयस्ते नराः स्वर्गगामिनः॥

इति प्रभृतिसंदर्भेण। अत्र हि महेश्वरेण भवानीं प्रति चातुर्वर्ण्यधर्मान्सामान्यधर्मांश्च वर्णयता शमादीनां स्वर्गसाधनत्वं मुहुरुपपादितम्।

एवमेतेषां स्वर्गफलकत्वं विपर्य्ययस्य च पापहेतुता संसरणक्रमश्च ययात्यष्टकसंवादे स्पष्टः। आदिप अ९०

१ चोराः।

ज्ञातिः सुहृत्स्वजनो वा यथेह क्षीणे वित्ते त्यज्यते मानवैर्हि ।
तथा तत्र क्षीणपुण्यं मनुष्यं त्यजन्ति सद्यः सेश्वरा देवसंघाः ८
यदेनसस्ते पततस्तुदन्ति भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ।
कथं भवन्ति कथमा[1]भवन्ति कथं भूता गर्भभूता[2] भवन्ति ॥ ९

ययातिरुवाच ।

अस्रं[3]रेतः पुष्पफलानुपृक्तमन्वेति तद्वै पुरुषेण सृष्टम् ।
स वै तस्या रज आपद्यते हि स गर्भभूतः समुपैति तत्र ॥ १०
वनस्पतीनोषधीश्चाविशन्ति अपो वायुं पृथिवीं चान्तरिक्षम् ।
चतुष्पदं द्विपदं चातिसर्व[4]मेवंभूता गर्भभूता भवन्ति ॥ ११ ॥

अष्टक उवाच ।

अन्यद्वपुर्विदधातीह गर्भमुताहो स्वित्स्वेन कायेन याति[5] ।
आपद्यमानो नरयोनिमेतामाचक्ष्व मे संशयात्प्रब्रवीमि ॥ १२
शरीरभेदादिसमुच्छ्रयं च चक्षुःश्रोत्रे लभते केन संज्ञाम्[6] ।
एतत्तत्त्वं सर्वमाचक्ष्व पृष्टः क्षेत्रज्ञं त्वां तात मन्याम सर्वे ॥

ययातिरुवाच ।

वायुः समुत्कर्षति गर्भयोनिमृतौ रेतः पुष्परसानुपृक्तम् ।
स तत्र तन्मात्र[7]कृताधिकारः क्रमेण संवर्धयतीह गर्भम् ॥
स जायमानो विगृहीतमात्रः संज्ञामधिष्ठाय ततो मनुष्यः ।
स श्रोत्राभ्यां वेदयतीह शब्दं स वै रूपं पश्यति चक्षुषा च ॥
घ्राणेन गन्धं जिह्वयाथो रसं च त्वचा स्पर्शं मनसा वेद भावम् ।
इत्यष्टकेहोपचितं हि विद्धि महात्मनः प्राणभृतां शरीरे ॥

१ इन्द्रियादिमन्तो भवन्ति । २ गर्भं प्राप्ताः । ३ सूक्ष्मभूतपञ्चकम् । पुष्पफलसंबद्धं पुरुषेण सृष्टं रेतः कर्म अनुसरति । ४ इदं सर्वमतिक्रम्य । ५ पाञ्चभौतिकमपरं कायमादत्ते ऽथवा ऽऽतिवाहिककायेन यातीत्यर्थः । ६ नाम । ७ अवयवान्तराकर्षणमात्रकृत् ।

अष्टक उवाच।

यस्मिंस्थितः पुरुषो दह्यते वा निखन्यते वापि निकृ[1]ष्यते वा।
अभावभूतः स विनाशमेत्य केनात्म[2]ना चेतयते परस्तात्॥

ययातिरुवाच।

हित्वा सोऽसून्त्सुप्रवन्निष्टनित्वा पुरोधाय सुकृतं दुष्कृतं वा।
अन्यां योनिं पवनाग्रानुसारी हित्वा देहं भजते राजसिंह॥

पुण्यां योनिं पुण्यकृतो व्रजन्ति पापां योनिं पापकृतो व्रजन्ति।
कीटाः पतङ्गाश्च भवन्ति पापा न मे विवक्षास्ति महानुभाव॥

चतुष्पदा द्विपदाः षट्पदाश्च तथाभूता गर्भभूता भवन्ति।
आख्यातमेतन्निखिलेन सर्वं भूयस्तु किं पृच्छसि राजसिंह॥

अष्टक उवाच।

किं स्वित्कृत्वा लभते तात लोकान्मर्त्यः श्रेष्ठांस्तपसा कर्मणा वा।
तन्मे पृष्टः शंस सर्वं यथावच्छुभांल्लोकान् येन गच्छेत्क्रमेण॥

ययातिरुवाच।

तपश्च दानं च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा।
स्वर्गस्य लोकस्य वदन्ति सन्तो द्वाराणि सप्तैव महान्ति पुंसाम्॥

नश्यन्ति मानेन तमोभिभूताः पुंसः सदैवेति वदन्ति सन्तः।
अधीयानः पण्डितं मन्यमानो यो विद्यया हन्ति यशः परेषाम्॥

तस्यान्तवन्तश्च भवन्ति लोका न चास्य तद् ब्रह्म फलं ददाति।[4]
चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छन्त्ययथा कृतानि॥[5]

मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः।
न मानमान्यो मुदमाददीत न संतापं प्राप्नुयाच्चावमानात्॥

---

१ भक्षणादिना निकृष्टतां प्राप्यते। २ किंशरीरावच्छेदेन। ३ जल्पव्यसनी।
४ ह्रियो भूतानुकम्पायाः शमस्य च विपर्य्ययात्। ५ आर्ज्जवविपर्य्ययात्।

सन्तः सतः पूजयन्तीह लोके नासाधवः साधुबुद्धिं लभन्ते ।[1]

इति दद्यामिति यजइत्यधीयइति व्रतम् ।
इत्येतानि भयान्याहुस्तानि वर्ज्यानि सर्वशः ॥[2]
ये चाश्रयं वेदयन्ते पुराणं मनीषिणो मानसमार्गरुद्धु[3]म् ।
तद्वः श्रेयस्तेन संयोगमेत्य परां शान्तिं प्राप्नुयुः प्रेत्य चेह ॥ इति ।

तत्र धृतिर्नामापत्काले ऽपि धर्मस्यात्यागः । सा च पण्डितलक्षणम् । यथाह विदुरः । उ॰ अ॰ ३३

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराःपण्डितबुद्धयः ॥ २३ इति ॥

विषमावस्थिते दैवे पौरुषे ऽफलतां गते ।
विषादयन्ति नात्मानं सत्वापाश्रयिणो नराः ॥ इति च ।

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ इति च ।

इदं च सर्वस्यैव धर्मस्य निदानभूतं धैर्याभावे लोभादीनां सर्वेषामनर्थानां सुलभत्वादिति स्पष्टमेव । यस्य चाश्रयणेन हरिश्चन्द्ररामचन्द्रयुधिष्ठिरादयः परमं क्लेशमापन्ना अपि धर्मं न जहुरिति सुप्रसिद्धमाख्यानविदाम् ।

पश्यत युधिष्ठिरस्य कीदृशं धैर्यं दुरात्मभिर्दुर्योधनादिभिर्द्यूते सर्वस्वमपहृत्य वनं प्रस्थापितस्य तत्र त्रयोदशवर्षाण्यतिवाहयतोऽन्तराऽन्तरा भीमेन द्वारकायाः समागतैः सात्यकिप्रमुखैर्महारथैः केवलं भवाननुमन्यतां वयं क्षणेन नाशयामः कुरूनित्यभिधीयमानस्य ।

---

१ परमः खलूत्कर्षो लभ्यते शमदमधर्म्मयोरीदृशचित्तवृत्तिना विरलेनैव केनचिन्महात्मना । २ आर्ज्जवस्य ह्रियश्च विरोधी खलु दम्भः सत्यस्य चेति दम्भस्य धार्मिकैः सदा त्याज्यता । हीयते हि धर्मः स्वरूपात् यश एव प्राधान्येनानुसन्धायानुष्ठीयमानः । प्रमदादासमहाशयः ३ मनसो ऽप्यगम्यम् ।

अनृतं नोत्सहे वक्तुं न ह्येतन्मम विद्यते ।

इति सर्वदा धर्मानुरोधि धैर्यपूरितं च वाक्यम् ।

अत एवोक्तम् ।

चलन्ति गिरयः कामं युगान्तपवनाहताः ।

कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥ इति ।

क्षमा तु सर्वभूतवशीकारफलिकाऽपराधं कृतवत्यपि वाक्यादण्डपारुष्याकरणरूपा । यथाह । उ० अ० ३३

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।

यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ४८ ॥

सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ।

क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ ४९ ॥

क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।

शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ ५० ॥

अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।

अक्षमावान् परं दोषैरात्मानं चैव योजयेत् ॥ ५१ ॥

एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।

विद्यैका परमा तृप्तिरहिंसैका सुखावहेति ॥ ५२ ॥

द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः ।

प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवन् ॥ ५८ ॥ इति च क्षमाकालश्च द्रौपद्या धर्मराजं प्रति दर्शितः । वनप० । अ २८

पूर्वोपकारी यस्ते स्यादपराधे गरीयसि ।

उपकारेण तत्तस्य क्षन्तव्यमपराधिनः ॥

अबुद्धिमाश्रितानां तु क्षन्तव्यमपराधिनाम् ।

न हि सर्वत्र पाण्डित्यं सुलभं पुरुषेण वै ॥

अथ ये बुद्धिजं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
पापान्स्वल्पेऽपि तान्हन्यादपराधे तथाऽनृजून् ॥
सर्वस्यैकोऽपराधस्ते क्षन्तव्यः प्राणिनो भवेत् ।
द्वितीये सति वध्यस्तु स्वल्पेऽप्यपकृते भवेत् ॥
अजानता भवेत्कश्चिदपराधः कृतो यदि ।
क्षन्तव्यमेव तस्याहुः सुपरीक्ष्य परीक्षया ॥
मृदुना दारुणं हन्ति मृदुना हन्त्यदारुणम् ।
नासाध्यं मृदुना किं चित्तस्मातीव्रतरं मृदु ॥
देशकालौ तु संप्रेक्ष्य बलाबलमथात्मनः ।
नादेशकाले किं चित्स्याद्देशकालौ प्रतीक्ष्यताम् ॥
तथा लोकभयाच्चैव क्षन्तव्यमपराधिनः ।
एतएवंविधाः कालाः क्षमायाः परिकीर्तिताः ॥ इति ।

इदं च राजधर्मप्रदर्शनं नीतिप्रदर्शनं वा वस्तुतस्तु सर्वथा क्षमैव कर्तव्येत्युत्तरत्र स्फुटी भविष्यति ।

दमश्च विकारहेतुविषयसंनिधानेऽपि मनसोऽविक्रियत्वम् । शीतातपादिद्वन्द्वसहिष्णुता दम इति के चित् । स चायं दमोऽतीव प्रशस्यते । यथाहुः । आप॰ अ॰ ३० ।

धर्मस्य विधयो नैके ये वै प्रोक्ता मनीषिभिः ।
स्वं स्वं विज्ञानमाश्रित्य[1] दमस्तेषां परायणम् ॥
दमं निःश्रेयसं प्राहुर्वृद्धा निश्चितदर्शिनः ।
ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥
दमात्तस्य क्रियासिद्धिर्यथावदुपलभ्यते ।
दमो दानं तथा यज्ञानधीतं चातिवर्[2]तते ॥

१ स्वस्वमतिविभवानुसारेण । २ सर्वेभ्यो ऽधिकमित्यर्थः ।

दमस्तेजो वर्धयति पवित्रं च दमः परम् ।
विपाप्मा तेजसा युक्तः पुरुषो विन्दते महत् ॥
दमेन सदृशं धर्मं नान्यं लोकेषु शुश्रुम ।
दमो हि परमो लोके प्रशस्तः सर्वधर्मिणाम् ॥
अदान्तः पुरुषः क्लेशमभीक्ष्णं प्रतिपद्यते ।
अनर्थांश्च बहूनन्यान् प्रसृज[1]त्यात्मदोषजान् ॥
आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतम् ।
तस्य लिङ्गानि वक्ष्यामि येषां समुदयो दमः ॥
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
इन्द्रियाभिजयो दाक्ष्यं मार्दवं ह्रीरचापलम् ॥
अकार्पण्यमसंरम्भः संतोषः प्रियवादिता ।
अविहिंसानसूया चाप्येषां समुदयो दमः ॥
गुरुपूजा च कौरव्य दया भूतेषु पैशुनम् ।
जनवादं मृषावादं स्तुतिनिन्दाऽविवर्जनम् ॥
कामं क्रोधं च लोभं च दर्पं[2] स्तम्भं[3] विकत्थनम् ।
रोष[4]मीर्ष्याभिमानं[5] च नैव दान्तो निषेवतइति ॥

पैशुनमित्युत्तरेणान्वेति । मोक्ष० अ० ५९

तपो निःश्रेयसं जन्तोस्तस्य मूलं शमो दमः ।
तेन सर्वानवाप्नोति यान्कामान् मनसेच्छतीति च ॥ २३ ॥

यथा[6] किलार्जुनस्य द्यूतजितेषु पाण्डवेषु वनं यातेषु व्यासवचसा शंकरमाराध्य पाशुपतास्त्रं लब्धुं प्रोषितवतः प्रीतेन शिवेन दत्तेऽस्त्रे महे-

१ विदधाति । २ गर्वम् । ३ अविनयम् । ४ कोपमप्रकटमपि । ५ परगुणेषु दोषारोपम् । अहं तपस्वीत्याकारकं मानसम् । ६ इयं कथा वनपर्वणि ४४ अध्याये ।

न्द्रेण दिव्यास्त्रशिक्षणार्थे स्वर्गं नीतस्य सुधर्मायामुर्वशीमनिमिषलोचनं वीक्षितवतो महेन्द्रेणोर्वश्यामर्जुनस्याभिलाषमनुमिन्वता चित्रसेनमुखेन संदिश्य प्रस्थापितां स्वयं च कामातुराम्

ततो ऽहं समनुज्ञाता तेन पित्रा च तेनघ ।
तवान्तिकमनुप्राप्ता शुश्रूषितुमरिंदम ॥
त्वद्गुणाकृष्टचित्ताहमनङ्गवशमागता ।
चिराभिलषितो वीर ममाप्येष मनोरथः ॥

इत्यभिदधानां प्रति वाक्यम् ।

गुरुदारैः समाना मे निश्चयेन वरानने ।
यथा कुन्ती महाभागा यथेन्द्राणी शची मम ॥
तथा त्वमपि कल्याणि नात्र कार्या विचारणा ।
यच्चेक्षितासि विस्पष्टं विशेषेण मया शुभे ॥
तच्च कारणपूर्वं हि शृणु सत्यं शुचिस्मिते ।
इयं पौरववंशस्य जननी मुदितेति ह ॥
त्वामहं दृष्टवांस्तत्र विज्ञायोत्फुल्ललोचनः ।
न मामर्हसि कल्याणि अन्यथा ध्यातुमप्सरः ॥
गुरोर्गुरुतरा मे त्वं मम वंशविवर्धिनीति ।

अथे चोर्वश्या ऽपि ।

गुरुस्थाने न मां वीर नियोक्तुं त्वमिहार्हसि ।
पूरोर्वंशेहि ये पुत्रा नप्तारो वा त्विहागताः ॥
तपसा रमयन्त्यस्मान्न च तेषां व्यतिक्रम इत्यादिना ।
स्वस्या वेश्यातया तत्र दोषाभावं वदन्त्या प्रलोभितस्यापि
शृणु सत्यं वरारोहे यत्त्वां वक्ष्याम्यनिन्दिते ।
शृण्वन्तु मे दिशश्चैव विदिशश्च सदेवताः ॥

यथा कुन्ती च माद्री च शची चेह ममानघे ।
तथा च वंशजननी त्वं हि मेद्य गरीयसी ॥

इत्यादिना प्रत्याख्यातवतः ।

यस्मान्मां नाभिनन्देयाः कामबाणवशं गताम् ।
तस्मात्त्वं नर्तनः पार्थ स्त्रीमध्ये मानवर्जितः ॥
अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि ।

इति शप्तस्या ऽपि विकाररहित्यम् । अत एव च सो ऽस्य शापो ऽपि त्रयोदशे वर्षे ऽज्ञातवासायोपयुक्त एवाभूदिति शापोऽप्यनुग्रहरूपतामेव प्रपेदइति सो ऽयं दमस्यैव प्रभावः ।

एवमेवाष्टावक्रस्य दमो ऽप्यत्र दृष्टान्तमौलिभूतः । पुरा किलाष्टावक्रो नाम महर्षिरासीत् । स च स्वस्य गार्हस्थ्यमीहमानः कां चन मुनिदारिकां स्वस्यानुरूपां गुणवतीमवेत्य तत्पितरमयाचत । तेन च तद्दमपरीक्षार्थमेवोत्तरां दिशं याहि तत्र परेण कैलासं नीलवने का चन वृद्धा तापसी वर्त्तते तामालोक्यागतवते तुभ्यं मया कन्या दास्यतइत्युक्तस्तयेत्युदचलत् । अथ क्रमेण विविधान् देशानतिक्रामंस्तमुद्देशमाप्य काञ्चनमयं प्रासादमवलोकयन् प्रविवेश ददर्श च वृद्धतापसीम् । तया च स्वागतेनाभिनन्दितस्तत्रोपविष्टासु कन्यकास्वन्यासु मुन्याज्ञया बहिर्यातासु तत्रैव स्थितो निशि पर्यङ्के स्वपन् शीतातिशयव्याजेन समुपागत्य वृद्धयाऽऽलिङ्गत । तथापि निर्विकारचेताः काष्ठोपमस्तया ऽहं कामार्त्ता तन्मां प्रत्यालिङ्गस्वेति मुहुर्र्थितोपि परदाराभिमर्शनं न करिष्यामीति वदन् तया भृशं प्रलोभ्यमानोऽप्यननुमन्यमानस्तद्वचसा कानि चिदहानि तत्रैवावसत् । अथ सा दिव्यैरुपचारैस्तं तोषयन्ती पुनर्निशि दिव्यरूपा कन्यका भूत्वा तमुपातिष्ठत । स च तया दृष्ट्वा विस्मितो ऽपि निर्विकारमनास्तया ऽहं स्वतन्त्रेति वदन्त्या स्वपाणिग्रहणाय प्रेरितो ऽपि

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थाविरे काले नास्ति स्त्रीणां स्वतन्त्रता ॥

इति वदन् दान्त एव प्रसन्नया तया विसृष्टः पुनरेत्य तामेव कन्यकां प्रीतात्पितुरलभतेति ।

अस्तेयं च अन्यायेन परधनग्रहणाभावरूपं तदपि चौर्यस्य ब्राह्मणसुवर्णादिविषयस्य ब्रह्महा मद्यपः स्तेनः, धान्यकुप्यपशुस्तेय,मित्यादिना महापापोपपापरूपत्वाभिधानात्तेषां च निषेधविषयत्वात्तत्परिपालनरूपतया धर्म एव । पापं कृत्वा प्रायश्चित्तमनुष्ठितवन्तमपेक्ष्य पापमकृतवतः फलभूयस्त्वावश्यकत्वादिति राद्धान्तितं तान्त्रिकैः ।

इदं च महतो दोषस्य सार्वजनिक्याश्च निन्दाया निरासकमिति प्रसिद्धमेवाबालमित्यलमत्र वचनोपन्यासेन ।

शौचं चोचितमृज्जलादिभिर्देहशोधनरूपं स्वस्ववर्णाश्रमादिषु नित्यतया चोदितानां सन्ध्योपासनादीनामाचरणरूपं च । एतस्यावश्यकत्वं च युधिष्ठिरादीन्प्रति मुनिवचनादवसीयते वनप०अ ९३ ।

आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरुपाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ॥

युधिष्ठिर यमौ भीम मनसा कुरुतार्जवम् ।
मनसा कृतशौचा हि शुद्धास्तीर्थानि यास्यथ ॥ २० ॥
शरीरनियमं प्राहुर्ब्राह्मणा मानुषं व्रतम् ।
मनोविशुद्धां बुद्धिं च दैवमाहुर्व्रतं द्विजाः ॥ २१ ॥
मनो ह्यदुष्टं शौचाय पर्याप्तं वै नराधिप ।
मैत्रीं बुद्धिं समास्थाय शुद्धास्तीर्थानि द्रक्ष्यथ ॥ २२ ॥
ते यूयं मानसैः शुद्धा शरीरनियमव्रतैः ।
दैवं व्रतं समास्थाय यथोक्तफलमाप्स्यथ ॥ २३ ॥ इदं च
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥

इत्यादिना एका लिङ्गे गुदे तिस्र इत्यादिना च प्रपञ्चितं स्मृतिषु निरूपितं च मान्यनिबन्धेष्विति तत एवावगन्तुं सुशकमिति विस्तरभीरुभिरस्माभिस्तत उपरम्यते। बाह्यशौचापेक्षयाऽऽन्तरस्य तस्य प्रशस्यताऽऽन्तराभावे बाह्यतद्वैयर्थ्यं चोपपादयति शान्तनवः। अनु० अ०१०८।

सर्वाणि खलु तीर्थानि गुणवन्ति मनीषिणः।
यत्तु तीर्थं च शौचं च तन्मे शृणु समाहितः॥
अगाधे विमले शुद्धे सत्यतोये धृतिह्रदे।
स्नातव्यं मानसे तीर्थे सत्वमालम्ब्य शाश्वतम्॥
तीर्थशौचमनर्थित्वमार्जवं सत्यमार्दवम्।
अहिंसा सर्वभूतानामानृशंस्यं दमः शमः॥
निर्ममा निरहंकारा निर्द्वन्द्वा निष्परिग्रहाः।
शुचयस्तीर्थभूतास्ते ये भैक्ष्यमुपभुञ्जते॥
तत्त्ववित्त्वनहंबुद्धिस्तीर्थप्रवरमुच्यते।
शौचलक्षणमेतत्ते सर्वत्रैवान्ववेक्षतः॥
रजस्तमः सत्वमथो येषां निर्धौतमात्मनः।
शौचाशौचसमायुक्ताः स्वकार्यपरिमार्गिणः॥
सर्वत्यागेष्वभिरताः सर्वज्ञाः समदर्शिनः।
शौचेन वृत्तशौचार्थास्ते तीर्थाः शुचयश्च ये॥
नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते।
स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः॥
अतीतेष्वनपेक्षा ये प्राप्तेष्वर्थेषु निर्ममाः।
शौचमेव परं तेषां येषां नोत्पद्यते स्पृहा॥
प्रज्ञानं शौचमेवेह शरीरस्य विशेषतः।
तथा निष्किञ्चनत्वं च मनसश्च प्रसन्नता॥

वृत्तशौचं मनःशौचं तीर्थशौचमतः परम् ।
ज्ञानोत्पन्नं च यच्छौचं तच्छौचं परमं स्मृतम् ॥

मनसा च प्रदीप्तेन ब्रह्मज्ञानजलेन च ।
स्नाति यो मानसे तीर्थे तत्स्नानं तत्त्वदर्शिनः ॥

समारोपितशौचस्तु नित्यं भावसमाहितः ।
केवलं गुणसंपन्नः शुचिरेव नरः सदा ॥

शरीरस्थानि तीर्थानि प्रोक्तान्येतानि भारत ।
पृथिव्यां यानि तीर्थानि पुण्यानि शृणु तान्यपि ॥

शरीरस्य यथोद्दिष्टाः शुचयः परिकीर्त्तिताः ।
तथा पृथिव्या भागाश्च पुण्यानि सलिलानि च ॥

कीर्तनाच्चैव तीर्थस्य स्नानाच्च पितृतर्पणात् ।
धुनन्ति पापं तीर्थेषु ते प्रयान्ति सुखं दिवम् ॥

परिग्रहाच्च साधूनां पृथिव्याश्चैव तेजसा ।
अतीव पुण्यभागास्ते सलिलस्य च तेजसा ॥

मनसश्च पृथिव्याश्च पुण्यास्तीर्थास्तथा परे ।
उभयोरेव यः स्नायात्स सिद्धिं शीघ्रमाप्नुयात् ॥

यथा बलं क्रियाहीनं क्रिया वा बलवर्जिता ।
नेह साधयते कार्यं समायुक्ता तु सिध्यति ।
एवं शरीरशौचेन तीर्थशौचेन चान्वितः ॥
शुचिः सिद्धिमवाप्नोति द्विविधं शौचमुत्तमम् ।

इत्यादिना च मानसशौचपूर्वकतीर्थशौचस्यैव तत्तत्तीर्थोपसेवनजनितफलदातृत्वमुक्तम् । अत एवान्यत्रोक्तम् ।

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ इति ।
कीकटेन समा काशी गङ्गाप्यङ्गारवाहिनी ।

इत्यादिनाऽपरिशुद्धचेतसस्तीर्थफलाभावो दर्शितः । यत्तु वन्ह्यादीनां बुद्धिपूर्वमबुद्ध्या वा स्पृष्टानां दाहजनकत्वमिव तीर्थानां साधुभिः पापिभिर्वा सेवितानां फलदातृत्वं पुराणादौ प्रदर्शितं तन्मनोमालिन्यनाशपूर्वकशौचापादनद्वारेणेति बोध्यम् । तत्तत्तीर्थप्रशंसार्थवादा एव तदिति के चित् । वनप· अ·८२

पुलस्त्येनापि युधिष्ठिरं प्रतीदमेवोक्तम् । यस्य हस्तौ च पादौ चेत्यादि ।

प्रतिग्रहादपावृत्तः संतुष्टो येन केन चित् ।
अहंकारनिवृत्तश्च स तीर्थफलमश्नुते ॥
अकल्कको[1] निरारम्भो लघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्वपापेभ्यः स तीर्थफलमश्नुते ॥
अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ इति ।

इन्द्रियनिग्रहश्च प्रशस्ततमस्तेनैव सर्वकार्याणां सुसाधत्वात् । एकस्यापीन्द्रियस्याजये संभवन्ति महान्तो ऽनर्थाः किमुत पञ्चानाम् । निदर्शयन्ति चात्र विपश्चितः ।

एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च ।
कुरङ्गमातङ्गपतङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्चेति ॥

उ· अ· ३३

पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम् ।
तेनास्य क्षरति प्रज्ञादृतेः पात्रादिवोदकम् ॥ ११ ॥

१ दम्भाविहीनः । कल्कः शाठ्ये च दम्भे चेति विश्वः ।

उ॰ अ॰ ३४

यो जितः पञ्चवर्गेण सहजेनात्मकर्षिणा ।
आपदस्तस्य वर्धन्ते शुक्लपक्षइवोडुराट् ॥ ५५ ॥
धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ६२ ॥
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ ६३ ॥
यः पञ्चाभ्यन्तरान् शत्रूनविजित्य मनोमयान् ।
जिगीषति रिपूनन्यान् रिपवोऽभिभवन्ति तम् ॥ ६८ ॥
दृश्यन्ते हि महात्मानो बध्यमानाः स्वकर्मभिः ।
इन्द्रियाणामनीशत्वाद्राजानो राज्यविभ्रमैः ॥ ६९ ॥
निजानुत्पततः शत्रून् पञ्च पञ्चप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरमिति ॥ ७१ ॥

अत एव ययातिना पूरोर्यौवनं गृहीत्वा चिरं सुखान्यनुभूयाप्यतृप्तेन पुनः पुत्राज्जरा जगृहे गीतं च । आदिप॰ अ॰ ७५

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥
पृथिवी रत्नसंपूर्णा हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥
यदा न कुरुते पापं सर्वभूतेषु कर्हि चित् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥

इत्यवेक्ष्य महाप्राज्ञः कामानां फल्गुतां नृप ।
समाधाय मनो बुध्या प्रत्यगृह्णाज्जरां सुतात् ॥

इति । निन्दन्ति च ।

या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥

प्रशंसन्ति च ।

वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥

उ॰ अ॰ ३४ ।

रथः शरीरं पुरुषस्य राज-
न्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशली सदश्वै-
र्दान्तैः सुखं याति रथीव धीरः । ५६ इति ।

अयं चेन्द्रियनिग्रहः पुंसामिव स्त्रीणामप्यावश्यकोऽन्ये चैतत्प्रकरणोक्ताः सामान्यधर्मा विशेषतो भर्तृशुश्रूषा च । अत एव दमयन्तीं प्रति नलवाक्यम् । वन॰ अ॰ ७४ ।

वैषम्यमपि संप्राप्ता गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः ॥ २५ ॥
रहिता भर्तृभिश्चैव न क्रुध्यन्ति कदा चन ।
प्राणांश्चारित्रकवचान्धारयन्ति वरस्त्रियः ॥ २६ ॥

तच्चासां नियमाः सुमनाशाण्डिलीसंवादे संक्षिप्य दर्शिताः । आनु॰ १२३ ।

युधिष्ठिर उवाच ।

सत्स्त्रीणां समुदाचारं सर्वधर्मविदां वर ।
श्रोतुमिच्छाम्यहं त्वत्तस्तन्मे ब्रूहि पितामह ॥

---

१ सतांभिरिति शेषः ।

भीष्म उवाच ।

सर्वज्ञां सर्वतत्वज्ञां देवलोके मनस्विनीम् ।
कैकेयी सुमना नाम शाण्डिलीं पर्यपृच्छत ॥
केन वृत्तेन कल्याणि समाचारेण केन वा ।
विधूय सर्वपापानि देवलोकं त्वमागता ॥
हुताशनशिखेव त्वं ज्वलमाना स्वतेजसा ।
सुता ताराधिपस्येव प्रभया दिवमागता ॥
अजरांसि च वस्त्राणि धारयन्ती गतक्लमा ।
विमानस्था शुभा भासि सहस्रगुणमोजसा ।
न त्वमल्पेन तपसा दानेन नियमेन वा ॥
इमं लोकमनुप्राप्ता त्वं हि तत्वं वदस्व मे ।
इति पृष्टा सुमनया मधुरं चारुहासिनी ।
शाण्डिली निभृतं वाक्यं सुमनामिदमब्रवीत् ॥
नाहं काषायवसना नापि वल्कलधारिणी ।
न च मुण्डा च जटिला भूत्वा देवत्वमागता ॥
अहितानि च वाक्यानि सर्वाणि परुषाणि च ।
अप्रमत्ता च भर्त्तारं कदा चिन्नाहमब्रुवम् ॥
देवतानां पितॄणां च ब्राह्मणानां च पूजने ।
अप्रमत्ता सदा युक्ता श्वश्रूश्वशुरवर्तिनी[१] ॥
पैशुन्ये न प्रवर्त्तामि न ममैतन्मनोगतम् ।
अद्वारे[२] न च तिष्ठामि चिरं न कथयामि च ॥
असद्वा हसितं किं चिदहितं वापि कर्मणा ।
रहस्यमरहस्यं वा न प्रवर्त्तामि सर्वथा ॥

---

१ वशगा । २ गवाक्षादौ ।

कार्यार्थे निर्गतं चापि भर्तारं गृहमागतम् ।
आसनेनोपसंयोज्य पूजयामि समाहिता ॥
यदन्नं नाभिजानाति यद्वाज्यं नाभिनन्दति ।
भक्ष्यं वा यदि वा लेह्यं तत्सर्वं वर्जयाम्यहम् ॥
कुटुम्बार्थे समानीतं यत्किं चित् कार्यमेव तु ।
प्रातरुत्थाय तत्सर्वं कारयामि करोमि च ॥
प्रवासं यदि मे याति भर्ता कार्येण केन चित् ।
मङ्गलैर्बहुभिर्युक्ता भवामि नियता तदा ॥
अञ्जनं रोचनां चैव स्नानं माल्यानुलेपनम् ।
प्रसाधनं च निष्क्रान्ते नाभिनन्दामि भर्तरि ॥
नोत्थापयामि भर्तारं सुखसुप्तमहं सदा ।
आ[1]न्तरेष्वपि कार्येषु तेन तुष्यति मे मनः ॥
नायासयामि भर्तारं कुटुम्बार्थेपि सर्वदा ।
गुप्तगुह्या सदा चास्मि सुसंमृष्ट[2]निवेशना ॥
इमं धर्मपथं नारी पालयन्ती समाहिता ।
अरुन्धतीव नारीणां स्वर्गलोके महीयते ॥

एवंविधैरन्यैश्च पत्यनुमोदितैर्व्रतोपवासनियमादिभिराचारैस्तपः साधयन्त्या न स्त्रिया केवलं स्वश्रेयः साधयितुं शक्यते मुनिवर्यैरप्यसाध्यं कर्मापि सुकरं भवति । यथा त्रैकालिकं ज्ञानं मुनीनामपि क्रोधेन दुःखाभावः । यथा वनप॰ अ॰ १॰५

आसीत्पुरा द्विजातिः कौशिकनामा । सोऽयं कदा चिद्वेदानुच्चारयन् कस्मिंश्चिद्वृक्षमूले स्थितो ऽभूत् । तस्मिन्वृक्षाग्रे कापि बलाका विलीयामेध्यं पुरीषादिकं तस्योपर्यसृजत् । ततस्तामवेक्ष्यातीव रुष्टो विप्रो

१ आवश्यकेष्वपि । २ सम्यक् पवित्रितगृहा ।

रोषारुणेन चक्षुषा प्रदहन्निव तां प्राणैर्वियोजयामास । तदनु तामचेतनां दृष्ट्वा कारुण्यात् रोषेणाकार्यमहं कृतवानस्मीति भृशं शुशोच । एवं संतप्तोऽयं भैक्ष्यार्थं शुचीनि द्विजकुलानि पर्यटन् किं चित्पतिव्रतागृहमवजगाहे। तत्र सा देहीति याचमानमेनं दृष्ट्वा तिष्ठेत्युक्त्वा क्षुधापीडितं पतिं चालोक्य पत्युरेव परिचरणपराऽभवत् । तस्मिंश्च तुष्टे सति भैक्ष्यकाङ्क्षिणमेनं निरीक्ष्य भिक्षामुपगृह्योपाजगाम । कौशिकस्तु रुष्टः सन् मां तिष्ठेति उक्त्वा उपरोधं मम कृत्वा न विसर्जितवतीत्युवाच । सा तं रुष्टं विज्ञायातिनम्राभिर्वाग्भिः प्रशस्य पतिशुश्रूषणवृत्तमकथयत् । एतां वाचमाकर्ण्य द्विगुणितरोषः कौशिको ब्राह्मणमविगणय्य पतिस्त्वया सेवितो न जानीषेऽग्निकल्पानां ब्राह्मणानां प्रभावमित्युक्त्वा विरराम । एतन्निशम्य भाषितं कौशिक नाहं बलाका रुष्टोऽपि त्वं किं करिष्यसि पतिदेवताया मे परन्त्विममपराधं क्षमस्व यस्मात्पतिशुश्रूषणात्त्वया दग्धा बलाका मया ज्ञाता त्वं तु विद्वानपि तत्त्वतो धर्मं न जानासि ज्ञातुमिच्छसि चेन्मिथिलां पुरीं गत्वा धर्मव्याधं पृष्ट्वा धर्मांस्तत्त्वतो ज्ञास्यसि मयोक्तं च सर्वं क्षमस्वेत्युवाच । तदनु सोऽयं कौशिकः स्वस्त्यस्तु इत्युक्त्वातीव संतप्तः स्वभवनं ययौ । एतत्सर्वं पतिशुश्रूषणाज्जातम् ।

एवं[1] सावित्री गतप्राणं स्वपतिं सत्यवन्तमजीवयत्स्वमाहात्म्येनैव । तथा हि ।

आसीत्किल पुरा समस्तक्षमार्जवादिगुणगणनिधिर्मद्रदेशेष्वश्वपतिर्नाम राजा । अयं चातिकालं राज्यभारं वहन्ननपत्यतया दूयमानमानसः पुत्रोत्पादने कृतनियमः सावित्र्या ऋचा तीव्रं होमादिकं कृत्वा षष्ठे काले मितभोजनोऽभवत् । इति तपस्यतोऽस्याष्टादशसु वर्षेषु गतेषु प्रसन्नाऽग्निहोत्रात्समुत्थाय सावित्री दृष्टिपथमाजगामावादीच्च । भो अश्वपते तपसा तव तुष्टाहं यथेप्सितं वरं वृणीष्वेति । इति गिरं निशम्य देवि तुष्टासि चेत्कुलरक्षकान्बहून् पुत्रान्देहीत्ययाचत । इत्यभ्यर्थनां श्रुत्वा राजन्पूर्वमेव मया तवाभिप्रायं बुद्ध्वोक्तस्य भगवतः पिताम-

१ इयं कथा वनपर्वणि २९१ अध्यायप्रभृति ।

हस्य प्रसादात्त्वं तेजस्विनीं कन्यां प्राप्स्यसीत्युक्त्वान्तरधात् । तदनन्तरमश्वपतिः स्वनगरं प्राप्य चिरं प्रजाः पालयन् ज्येष्ठायां महिष्यामादधे गर्भम् । तदनु प्रतिदिनं शुक्लपक्षे उपचीयमानं तारापतिमिव गर्भं यथोचितकाले प्रासूत देवी । राजा चातिहर्षसमन्वितः सावित्रीप्रसादलब्धाया दुहितुः सावित्रीत्येव नाम चकार । सा मूर्त्तिमती श्रीरिव वर्द्धमाना बाल्यात्परामवस्थां प्राप । तस्यास्तेजसा निवारितः कोपि तां परिणेतुं नाशकत् । सा कदा चिदुपोष्य शिरःस्नाता देवान् द्विजांश्च पूजयित्वाग्निं च संतर्प्य तत्प्रसादं परिगृह्य पितुश्चरणौ नत्वा कृताञ्जलिस्तस्यैव पार्श्वे स्थिताऽभवत् । राजा च तां यौवनोपेतां वरैरयाच्यमानां सुतां निरीक्ष्य पुत्रि स्वयमेवात्मनोऽनुरूपं पतिं संप्रार्थ्य निवेद्य च मह्यं वरयेत्युक्त्वानुयात्रार्थं तस्याः स्थविरान्सचिवांश्च प्रेषयामास । साभिवाद्य पितुश्चरणौ हैमं रथमास्थाय वनादूनं प्रविशन्त्याश्रमांस्तीर्थानि च जगाम । गत्वा च सा बहूनि वनानि मनसा वरं च निश्चित्य पुनरपि पितुः सदेशमागत्य नारदेन सह संभाषमाणं तमभिवाद्य क्व गतेयमस्याश्च विवाहः कथं न कृत इति नारदपृष्टेन पित्रानेनैव कार्येण प्रेषितेयमद्यैवागतेत्यभिधाय कः पतिस्त्वया वृत इति पृष्टेयमुदाजहार गिरम् । अभूच्छाल्वेष्वतिधर्मात्मा द्युमत्सेन इति ख्यातो राजा । सोयं जातपुत्रोन्धो भूत्वा शत्रुभिर्हृतराज्यः सन् बालवत्सलया स्वपत्न्या सह वनानि प्रविश्य तप आचचार । तेषु वनेषु संवृद्धस्य पुत्रः सत्यवान्मेनुरूपः पतिरिति । अस्या वचनमाकर्ण्य राज्ञास्य गुणदोषान्वर्णयेति पृष्टो नारदो नृप सर्वगुणालङ्कृतोप्ययमेकेनाद्यप्रभृतिवत्सरान्त मरणरूपेण महादोषेणाक्रान्त इत्युवाच । इति वचनं निशम्य राज्ञा पुत्र्ययं वत्सरान्ते देहन्यासं करिष्यतीत्युक्तेयं महाराज

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥

तस्मात्सकृद्वृतोयं नान्यं वृणोमीत्युवाच । नारदेनापि वाचमेनामनुमन्यस्व राजन्नेवा कथं चन वार्येत्युक्तो राजा तथेति प्रतिश्रुत्य नारदे गते सति

वैवाहिकं सज्जं कृत्वातिशुद्धान्सपुरोहितान्ब्राह्मणानाहूय पुण्यदिने कन्यया तैश्च सह पद्भ्यामेव द्युमत्सेनाश्रमं मेध्यारण्यं जगाम । तत्र शालवृक्षमुपाश्रितं कुशासनोपविष्टं चक्षुर्विहीनं नृपमवलोक्य यथार्हं संपूज्य भो राजर्षे कन्यां मम स्नुषार्थे गृहाणेत्यभाषत । सोपि द्युमत्सेनोऽङ्गीकृत्य तत्रत्यान्द्विजानाहूय विवाहं कारयामास । अश्वपतिश्च यथार्हं वधूवरयोर्हर्षसमन्वितो भूषणादीनि दत्त्वा स्वराज्यं प्रति ययौ । गते पितरि सावित्र्याभरणान्यवमुच्य वल्कलान्येव धृत्वा पर्यतोषयत्परिचर्यया सर्वानेव । एवं बहुले काले गते सर्वदा दिनानि गणयन्ती सावित्री मरणदिवसेषु चतुर्ष्ववशिष्टेषु त्रैरात्रिकं व्रतं कृत्वा मरणदिवसे समायाते दीप्तमनलं हुत्वा सर्वान्द्विजातींश्चाभिवाद्य तैर्दीयमाना अवैधव्याशिषो मनसा प्रतिगृह्य भर्त्तरि वनं गन्तुं समुपस्थिते सति तस्याज्ञया श्वशुरयोश्चाज्ञया स्वयमपि विविधानि वनानि नदीश्चावलोकमाना पतिमनुजगाम । तदनु सत्यवान्कानि चित्फलानि प्रतिगृह्य काष्ठानि पाटयन् जातशिरोवेदनस्तत्रैव भूतले निषीदन्त्याः सावित्र्या उत्सङ्गे शिरः कृत्वाऽस्वपत् । सावित्री च तस्य पार्श्वभागे स्थितं रक्ताक्षं कमपि पुरुषं दृष्ट्वा चकितहृदया भर्त्तुः शिरो भूतले शनैर्न्यस्य सहसोत्थाय कृताञ्जलिर्देवेश कस्त्वं किं चिकीर्षसीति जगाद । स च पुरुषः हे सावित्रि पतिव्रतासीत्यभिभाषे मां यमं विद्धि भृत्यैर्ग्रहीतुमशक्यस्य क्षीणायुषस्तव पत्युर्नयनमेव मम चिकीर्षितमित्युक्त्वा पाशेन तच्छरीरान्तःस्थितमङ्गुष्ठमात्रं पुरुषं बलादाचकर्ष । तदनु निर्गतश्वासं हतप्रभं देहं विहायान्तःस्थितं पुरुषं बद्ध्वा यान्तमन्तकं सावित्र्यनुजगाम । तां दृष्ट्वा यमोऽपि गच्छ कुरुष्वास्यौर्ध्वदैहिकीं क्रियामित्युक्त्वा विरराम । सावित्र्यपि श्रवणकटुभूतां तां गिरमाकर्ण्य यत्र मे नीयते भर्ता तत्रैव मया गन्तव्यमेष एव सनातनो धर्मो गुरुशुश्रूषया पतिभक्त्या च तव प्रसादात्कुत्रापि मम गतिर्न प्रतिहता परं च साप्तपदीनं सख्यं भवतीति मित्रतां पुरस्कृत्य कथ्यमानां वाचं शृण्वित्युक्त्वाऽवादीत् ।

नानात्मवन्तस्तु वने चरन्ति[1] धर्मं च वासं च परिश्रयं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥
एकस्य धर्मेण सतां मतेन सर्वे स्म तं मार्गमनुप्रपन्नाः[2] ।
मा वै द्वितीयं मा तृतीयं च वाञ्छे तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥

यमश्चैव तुष्टात्माऽस्य जीवितं विना वरं वृणीष्वेत्यवदत् । सापि श्वशुरस्य नष्टे चक्षुषी अयाचतावादीच्चातिधर्म्यां पुनरपि गिरम् । तामाकर्ण्य पुनः प्रसन्नेन वैवस्वतेन वरं वृणीष्वेत्यनुज्ञातेयं श्वशुरस्य राज्यं वव्रेऽभाषत च ॥

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥
एवं प्रायश्च लोकोऽयं मनुष्याः शक्तिपेशलाः[3] ।
सन्तस्ते चाप्यमित्रेषु दयां प्राप्तेषु कुर्वते[4] ॥

तदनु गिरमिमामाकर्ण्य पुनरपि वरयेत्युक्ता सावित्री पितुः पुत्रशतं संप्रार्थ्यावादीत् ॥

आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः ।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ।

इत्याकर्ण्य पुनस्तुष्टेन तेन वरं चतुर्थं वरयेत्युक्ता स्वात्मनः सत्यवत औरसं पुत्रशतमयाचत । पुनरपि जगाद गिरम् ॥

---

१ अजितेन्द्रियाः वने यज्ञादिरूपं धर्मं गुरुकुलवासं परित्यागरूपं तुर्याश्रमं प्रतिनिवृत्तः कर्मफलाश्रयो यत्र तादृशं वा न चरन्ति । सन्तश्च विज्ञानाय धर्मं वदन्त्यत एव तं प्रधानमाहुः । अहं च तादृक्त्वादनुग्राह्येति भावः ।

२ सतामिष्टेनैकस्याश्रमस्य धर्मेण सर्वे वयं तं ज्ञानमार्गं प्राप्ताः । अतः गृहस्थाश्रमाद्द्वितीयं तृतीयं वा न वाञ्छामि तद्भर्तृहरणेन मम धर्मं मा नाशयेति भावः ।

३ मनुष्याः शक्तिकौशलहीना इत्यर्थः । संधिरार्षः ।

४ तादृशा अपि सन्तो मनुष्याः शरणं प्राप्तेषु शत्रुष्वपि दयां कुर्वते किं पुनस्त्वादृशा इति भावः ।

सतां सदा शाश्वतधर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ति ।
सतां सद्भिर्नाफलः संगमोऽस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥
सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति ।
सन्तो गतिर्भूतभव्यस्य राजन्त्सतां मध्ये नावसीदन्ति सन्तः ।इति॥

इति च निशम्यातिहृष्टेन यमेन पुनरपि यदिच्छसि तत्सर्वं वरं वृणीष्वेत्युक्ता पत्युर्जीवितमाचकाङ्क्ष । सोऽपि तथैवेति प्रतिश्रुत्यायं मुक्तस्ते पतिस्त्वयि शतं पुत्राणामुत्पाद्य त्वया सह चतुर्वर्षशतायुरवाप्स्यतीत्युक्त्वा जगाम स्वपुरम् । सा च पतिकलेवरसमीपमागत्य यदि शक्यं तर्हुत्तिष्ठेत्युक्त्वा विरराम । सोऽपि संज्ञां लब्ध्वा तं कालपुरुषमपश्यन्सहसोत्थायातिगाढां रजनीं च पश्यन्नपि पितृविरहेण तत्र स्थातुमशक्तस्तया सहाश्रमं प्रविश्य तत्र स्वानागमनदुःखितयोः पित्रोश्चरणयोः प्रणिपपात । सा च श्वशुरौ नमस्कृत्योपाविशत् । एतदन्तरे राजाऽपि लब्धचक्षुर्ब्राह्मणैः सह विस्मितः सन्किमिति विलम्बः कृत इति पप्रच्छ स्नुषाम् । सापि यथातत्त्वं सर्वमेव न्यवेदयत् । तद्वाक्यात्सर्वे तुष्टाः प्रशस्य सावित्रीं यथागतं जग्मुः । तदनु अपरेऽह्नि सर्वाः प्रकृतयो राज्यादागत्य शत्रून्निहतानाचख्युः स्वेनामात्येन । तच्छ्रुत्वा लब्धचक्षू राज्यलाभादतिहृष्टः सन्स्वराज्यं सर्वैः पुत्रादिभिर्द्युमत्सेनः प्रतिजगाम । तत्र पुरोहितेनाभिषिक्तः पुत्रं च यौवराज्येऽभिषिच्य परां मुदमवापत् । ततश्च बहुतिथे काले गते सति सावित्र्याः पुत्रशतं भ्रातृशतं च जज्ञे । एतत्सर्वं पातिव्रत्येन लब्धमिति निश्चितमेव ।

धीश्च शास्त्रादितत्त्वज्ञानम् । तच्च स्वस्ववर्णाश्रमाद्युचितानुष्ठाननिदानतया ऽऽवश्यकमेव । यथाह मनुः ।

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै ॥ इति ।

विद्या चात्मज्ञानम् । एतच्च सकलप्रयोजनमौलिभूतं स्वप्राप्तिक्षणएव निरस्तसमस्तदुःखमिति महानुद्घोषः सर्वतन्त्रेष्विति प्रसिद्धमेव ।

सर्वेषां च धर्माणां साक्षात्परंपरया वात्मज्ञानोपयोगित्वादिदमवश्यसंपाद्यमित्यप्यभिव्यक्तमेव । यथार्थाभिधानरूपं सत्यं सर्वत्रैव नितरां प्रशस्यते ।

मो॰ अ॰ १९९

न यज्ञफलदानानि नियमास्तारयन्ति हि ।
यथा सत्यं परे लोके तथेह पुरुषर्षभ ॥ ६२ ॥
तपांसि यानि चीर्णानि चरिष्यन्ति च यत्तपः ।
शतैः शतसहस्रैश्च तैः सत्यान्न विशिष्यते ॥ ६३ ॥
तुलामारोपितो धर्मः सत्यं चैवेति नः श्रुतम् ।
समकक्षां तुलयतो यतः सत्यं ततोऽधिकम् ॥ ६६ ॥
यतो धर्मस्ततः सत्यं सर्वं सत्येन वर्धते । इति ।

मार्कण्डेयेनापि । आनु॰ अ॰ २२

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयादिति ॥ १४ ॥

स्वमतमुपवर्णयता सत्यस्य सर्वेभ्य उत्कर्षः प्रख्यापितः ।
दमयन्त्या च । वनप॰ अ॰ ६३ ।

चत्वार एकतो वेदाः साङ्गोपाङ्गाः सविस्तराः ।
स्वधीता मनुजव्याघ्र सत्यमेकं किलैकत इति ॥

सर्वेभ्यो वेदेभ्यः सत्यस्योत्कर्ष उदघुष्यत । स्वयमवोचच्च ।
वनप॰ अ॰ ७३ ।

न स्मराम्यनृतं किंचिन्न स्मराम्यपकारिताम् ।
न च पर्युषितं वाक्यं स्वैरेष्वपि कदा चनेति ।

अत एव सा शेपे सत्येनैव । वनप॰ ७६ ।

स्पृशेयं तेन सत्येन पादावेतौ महीपते ।
यथा नासत्कृतं किं चिन्मनसापि चराम्यहम् ॥

एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै ।
विब्रुवन्तु यथा सत्यमेतद्देवास्त्यजन्तु माम् ॥

एवं भीष्मवचनमपि ।

परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाप्यधिकमेताभ्यां न तु सत्यं कथं चन ॥

आप॰ अ॰ ३२ ।

सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः ।
सत्यमेव नमस्येत सत्यं हि परमा गतिः ॥
सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम् ।
सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम् ॥
आचारानिह सत्यस्य यथावदनुपूर्वशः ।
लक्षणं च प्रवक्ष्यामि सत्यस्येह यथाक्रमम् ॥
प्राप्यते च यथा सत्यं तच्च श्रोतुमिहार्हसि ।
सत्यं त्रयोदशविधं सर्वलोकेषु भारत ॥
सत्यं च समता चैव दमश्चैव न संशयः ।
अमात्सर्यं क्षमा चैव ह्रीस्तितिक्षानसूयता ॥
त्यागो ध्यानमथार्यत्वं धृतिश्च सततं दया ।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश ॥ इति ।

एतन्मूलकमेवोक्तम् । आदिप॰ अ॰ ७४ ।

अन्यानन्यरिवदन् साधुर्यथा हि परितप्यते ।
तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥
अभिवाद्य यथा वृद्धान्सन्तो गच्छन्ति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥

सुखं जीवन्त्यदोषज्ञा[1] मूर्खा दोषानुदर्शिनः ।
यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥
अतो हास्यतरं लोके किं चिदन्यन्न विद्यते ।
यत्र दुर्जनमित्याह दुर्जनः सज्जनं स्वयम् ॥
सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
अनास्तिको[2]ऽप्युद्विजते जनः किं पुनरास्तिकः ॥ इति ।

यद्यपि दमप्रशंसायां दमस्यैवेति सत्यादयोऽवयवा इत्युक्तं तथापि सर्वेषामेषामवश्यानुष्ठेयत्वे तात्पर्यादेषां परस्पराश्रयत्वाच्चाविरोधः । आप॰ १६२

नान्तः शक्यो गुणानां हि वक्तुं सत्यस्य पार्थिव ।
अतः सत्यं प्रशंसन्ति विप्राः सपितृदेवताः ॥
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् ।
स्थिति[3]र्हि सत्यं धर्मस्य तस्मात्सत्यं न लोपयेत् ॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यतइति च ॥

तत्र च ।

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातन इति स्मर्यते ।

एतेषां च सत्याहिंसादीनां कार्यतारतम्यपर्यालोचनया गुरुलघुभावो युधिष्ठिरसर्पसंवादे स्पष्टः । वनप॰ अ॰ १८१

पात्रे दत्वा प्रियाण्युक्त्वा सत्यमुक्त्वा च भारत ।
अहिंसानिरतः स्वर्गं गच्छेदिति मतिर्मम ॥

---

१ आत्मदोषानज्ञानन्तः । २ आस्तिकभिन्नोऽपि । ३ धर्मश्चयश्यमपि सत्यमेवेत्यर्थः ।

युधिष्ठिर उवाच ।

दानाद्वा सर्प सत्याद्वा किमतो गुरु दृश्यते ।
अहिंसाप्रिययोश्चैव गुरुलाघवमुच्यताम् ॥

सर्प उवाच ।

दानं च सत्यं तत्वं वा अहिंसा प्रियमेव च ।
एषां कार्यगरीयस्त्वाद्दृश्यते गुरुलाघवम् ॥
कस्माच्चिद्दानयोगाद्धि सत्यमेव विशिष्यते ।
सत्यवाक्याच्च राजेन्द्र किं चिद्दानं विशिष्यते ॥
एवमेव महेष्वास प्रियवाक्यान्महीपते ।
अहिंसा दृश्यते गुर्वी ततश्च प्रियमिष्यते ॥
एवमेतद्भवेद्राजन् कार्यापेक्षमनन्तरम् ।
यदभिप्रेतमन्यत्ते ब्रूहि यावद्ब्रवीम्यहम् ॥

यत्र च सत्येन परपीडा स्यादसत्येन च तत्त्राणं तत्र सत्यादप्यनृतमेव विशिष्यतइति निश्चीयते युधिष्ठिरभीष्मसंवादेन। राज० अ० १०९

युधिष्ठिर उवाच ।

कथं धर्मे स्थातुमिच्छन्नरो वर्त्तेत भारत ।
विद्वञ्जिज्ञासमानाय प्रब्रूहि भरतर्षभ ॥
सत्यं चैवानृतं चोभे लोकानावृत्य तिष्ठतः ।
तयोः किमाचरेद्राजन्पुरुषो धर्मनिश्चितः ॥
किं स्वित्सत्यं किमनृतं किंस्विद्धर्मं सनातनम् ।
कस्मिन्काले वदेत्सत्यं कस्मिन्काले ऽनृतं वदेत् ।

भीष्म उवाच ।

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
यत्तु लोकेषु दुर्ज्ञानं तत्प्रवक्ष्यामि भारत ॥

भवेत्सत्यं न वक्तव्यं वक्तव्यमनृतं भवेत् ।
यत्रानृतं भवेत्सत्यं सत्यं वाप्यनृतं भवेत्[1] ॥

तादृशो बध्यते बालो यत्र सत्यमनुष्ठितम् ।
सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥

अप्यनार्योऽकृतप्रज्ञः पुरुषोऽप्यतिदारुणः ।
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ॥

किमाश्चर्यं च यन्मूढो धर्मकामोऽप्यधर्मवित् ।
सुमहत्प्राप्नुयात्पापं गङ्गायामिव कौशिकः ॥

तादृशोऽयमनुप्रश्नो यत्र धर्मः सुदुर्लभः ।
दुष्करः प्रतिसंख्यातुं तत्केनात्र[2] व्यवस्यति ॥

प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः ॥

धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥

अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम् ।
यः स्यादहिंसया युक्तः स धर्म इति निश्चयः ॥

श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।
न च तत्प्रत्यसूयामो न हि सर्वं विधीयते ॥

ये ऽन्यायेन जिहीर्षन्तो धनमिच्छन्ति कस्य चित् ।
तेभ्यस्तु न तदाख्येयं स धर्म इति निश्चयः ॥

१ यत्र सत्येन परस्य सुजनस्य पीडास्यात्तत्र ।
२ धर्मविषये केन कारणेन निश्चिनोति ।

अकूजनेन चेन्मोक्षो नावकूजेत्कथं चन ।
अवश्यं कूजितव्यं वा शङ्केरन्वाप्यकूजनात् ॥
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारित[1]म् ।
यः पापैः सह संबन्धान्मुच्यते शपथादपि ॥
न तेभ्योऽपि धनं देयं शक्ये सति कथं चन ।
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ॥
स्वशरीरोपरोधेन धनमादातुमिच्छतः ।
सत्यसंप्रतिपत्त्यर्थं यद् ब्रूयुः साक्षिणः क्व चित् ।
अनुक्त्वा तत्र तद्वाच्यं सर्वे तेऽनृतवादिनः ॥
प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत् ।
अर्थस्य रक्षणार्थाय परेषां धर्मकारणात् ॥
परेषां सिद्धिमाकाङ्क्षन्नीचः स्याद्धर्मभिक्षुकः ।
प्रतिश्रुत्य प्रदातव्यः स्वकार्यस्तु बलात्कृतः ॥
यः कश्चिद्धर्मसमयात्प्रच्युतो धर्मसाधनः ।
दण्डेनैव स हन्तव्यस्तं पन्थानं समाश्रितः ॥
च्युतः सदैव धर्मेभ्यो मानवं धर्ममास्थितः ।
शठः स्वधर्ममुत्सृज्य तमिच्छेदुपजीवितुम् ॥
सर्वोपायैर्निहन्तव्यः पापो निकृतिजीवनः ।
धनमित्येव पापानां सर्वेषामिह निश्चयः ॥
अविषह्या ह्यसंभोज्या निकृत्या पतनं गताः ।
च्युता देवमनुष्येभ्यो यथा प्रेतास्तथैव ते ॥
निर्यज्ञास्तपसा हीना मा स्म तैः सह संगमः ।
धननाशाद्दुःखतरं जीविताद्विप्रयोजनम् ॥

[1] निश्चितम् ।

अयं ते रोचतां धर्म इति वाच्यः प्रयत्नतः ।
न कश्चिदस्ति पापानां धर्म इत्येष निश्चयः ॥
तथागतं च यो हन्यान्नासौ पापेन लिप्यते ।
स्वकर्मणा हतं हन्ति हत एव स हन्यते ॥
तेषु यः समयं कश्चित्कुर्वीत हतबुद्धिषु ।
यथा काकाश्च गृध्राश्च तथैवोपधिजीविनः ॥
ऊर्ध्वं देहविमोक्षान्ते भवन्त्येतासु योनिषु ।
यस्मिन्यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्त्तितव्यं स धर्मः ।
मायाचारो मायया बाधितव्यः साध्वाचारः साधुना प्रत्युपेयः॥

इत्यन्तेन । एतच्च राजधर्ममात्रस्यैव प्रदर्शनं दण्डाद्यधिकारस्य तत्रैव सत्त्वेन दण्डादेस्तन्मात्रधर्मत्वे सिद्धे तत्सहचरितानामसत्यादीनामपि तन्मात्रधर्मत्वसिद्धेः प्रकरणाच्चेत्याहुः ।

अत एव सत्यस्य सर्वधर्मनिदानत्वं प्रपञ्चितं युधिष्ठिराय भीष्मेण । शा० अ० १६२

युधिष्ठिर उवाच ।

सत्यं धर्मं प्रशंसन्ति विप्रर्षिपितृदेवताः ।
सत्यमिच्छाम्यहं श्रोतुं तन्मे ब्रूहि पितामह ॥
सत्यं किंलक्षणं राजन् कथं वा तदवाप्यते ।
सत्यं प्राप्य भवेत्किं च कथं चैव तदुच्यताम् ॥

भीष्म उवाच ।

चातुर्वर्ण्यस्य धर्माणां संकरो न प्रशस्यते ।
अविकारितमं सत्यं सर्ववर्णेषु भारत ॥
सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः ।
सत्यमेव नमस्येत सत्यं हि परमा गतिः ॥

सत्यं धर्मस्तपो योग: सत्यं ब्रह्म सनातनम् ।
सत्यं यज्ञ: पर: प्रोक्त: सर्वं सत्ये प्रतिष्ठितम् ॥
आचारानिह सत्यस्य यथावदनुपूर्वश: ।
लक्षणं च प्रवक्ष्यामि सत्यस्येह यथाक्रमम् ॥
प्राप्यते च यथा सत्यं तच्च श्रोतुमिहार्हसि ।
सत्यं त्रयोदशविधं सर्वलोकेषु भारत ॥
सत्यं च समता चैव दमश्चैव न संशय: ।
अमात्सर्यं क्षमा चैव ह्रीस्तितिक्षानसूयता ॥
त्यागो ध्यानमथार्यत्वं धृतिश्च सततं दया ।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश ।
सत्यं नामाव्ययं नित्यमविकारि तथैव च ॥
सर्वधर्माविरुद्धेन योगेनैतदवाप्यते ।
आत्मनीष्टे तथानिष्टे रिपौ च समता तथा ।
इच्छा द्वेषं क्षयं प्राप्य कामक्रोधक्षयं तथा ॥
दमो नान्यस्पृहा नित्यं गाम्भीर्यं धैर्यमेव च ।
अभयं रोगशमनं ज्ञानेनैतदवाप्यते ।
अमात्सर्यं बुधा: प्राहुर्दाने धर्मे च संयम: ।
अवस्थितेन नित्यं च सत्येनामत्सरी भवेत् ॥
अक्षमाया: क्षमायाश्च प्रियाणीहाप्रियाणि च ।
क्षमते संमत: साधु: साध्वाप्नोति च सत्यवान् ॥
कल्याणं कुरुते बाढं धीमान्न ग्लायते क्वचित् ।
प्रशान्तवाङ्मना नित्यं ह्रीस्तु धर्मादवाप्यते ॥
धर्मार्थहेतो: क्षमते तितिक्षा क्षान्तिरुच्यते ।
लोकसंग्रहणार्थं वै सा तु धैर्येण लभ्यते ।

त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च ।
रागद्वेषप्रहीणस्य त्यागो भवति नान्यथा ॥
आर्यता नाम भूतानां यः करोति प्रयत्नतः ।
शुभं कर्म निराकारो वीतरागस्तथैव च ।
धृतिर्नाम सुखे दुःखे यथा नाप्नोति विक्रियाम् ।
तां भजेत सदा प्राज्ञो य इच्छेद्भूतिमात्मनः ।
सर्वथा क्षमिणा भाव्यं तथा सत्यपरेण च ॥
वीतहर्षभयक्रोधो धृतिमाप्नोति पण्डितः ।
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ॥
अनुग्रहश्च दानं च सतां धर्मः सनातनः ।
एते त्रयोदशाकाराः पृथक्सत्यैकलक्षणाः ॥
भजन्ते सत्यमेवेह बृंहयन्ते च भारत ।
नान्तः शक्यो गुणानां च वक्तुं सत्यस्य भारत ॥
अतः सत्यं प्रशंसन्ति विप्राः सपितृदेवताः ।
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् ॥
श्रुतिर्[1]हि सत्यं धर्मस्य तस्मात्सत्यं न लोपयेत् ।
उपैति सत्याद्दानं हि यथा यज्ञाः सदक्षिणाः ॥
त्रेताग्निहोत्रं वेदाश्च ये चान्ये धर्मनिश्चयाः ।
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ॥
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते । इति ।

अक्रोधश्च क्षमारूपो ऽपि निरपराधे ऽपि वृत्तिविशेषानुत्पादनरूपः प्रशस्यः । क्रोधेनैव वाग्दण्डपारुष्ययोः संभवात् । यथाह ।

---

१ धर्मश्रवणं सत्यमेवेत्यर्थः ।

सर्वोपायात्तु कामस्य क्रोधस्य च विनिग्रहः ।
कार्यः श्रेयोऽर्थिना तौ हि श्रेयोघातार्थमुद्यतौ ॥
नित्यं क्रोधात्तपो रक्षेच्छ्रियो रक्षेच्च मत्सरात् ।
विद्यां मानावमानाभ्यामात्मानं तु प्रमादत इति ॥

अत एव द्रौपदीं प्रति धर्मराजवाक्यम् । वनप० २९

क्रोधो हन्ता मनुष्याणां क्रोधो भावयिता पुनः ।
इति विद्धि महाप्राज्ञे क्रोधमूलौ भवाभवौ ॥
यो हि संहरते क्रोधं भवस्तस्य सुशोभने ।
यः पुनः पुरुषः क्रोधं नित्यं न सहते शुभे ॥
तस्याभावाय भवति क्रोधः परमदारुणः ।
क्रोधमूलो विनाशो हि प्रजानामिह दृश्यते ॥
तत्कथं मादृशः क्रोधमुत्सृजेल्लोकनाशनम् ।
क्रुद्धः पापं नरः कुर्यात्क्रुद्धो हन्याद्गुरूनपि ॥
क्रुद्धः परुषया वाचा श्रेयसोप्यवमन्यते ।
वाच्यावाच्यौ हि कुपितो न प्रजानाति कर्हिचित् ॥
नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते तथा ।
हिंस्यात्क्रोधादवध्यांस्तु वध्यान्संपूजयीति च ॥
आत्मानमपि च क्रुद्धः प्रेषयेद्यमसादनम् ।
एतान्दोषान्प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः ॥
इच्छद्भिः परमं श्रेय इह चामुत्र चोत्तमम् ।
तं क्रोधं वर्जितं धीरैः कथमस्मद्विधश्चरेत् ॥
एतद्द्रौपदि संधाय न मे मन्युः प्रवर्द्धते ।
आत्मानं च परांश्चैव त्रायते महतो भयात् ॥

क्रुध्यन्तमप्रतिक्रुध्यन्द्वयोरेव चिकित्सकः ।
मूढो यदि क्लिश्यमानः क्लिश्यते शक्तिमान्नरः ॥
बलीयसां मनुष्याणां त्यजत्या[१]त्मानमात्मना ।
तस्यात्मानं संत्यजतो लोका नश्यन्त्यनात्मनः ॥
तस्माद्द्रौपद्यशक्तस्य मन्योर्नियमनं स्मृतम् ।
विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति ॥
अनाशयित्वा क्लेष्टारं परलोके च नन्दति ।
तस्माद्बलवता चैव दुर्बलेन च नित्यदा ॥
क्षन्तव्यं पुरुषेणाहुरापत्स्वपि विजानता ।
मन्योर्हि विजयं कृष्णे प्रशंसन्तीह साधवः ॥
क्षमावतो जयो नित्यं साधोरिह सतां मतम् ।
सत्यं चानृततः श्रेयो नृशंसाच्चानृशंसता ॥
तमेवं बहुदोषं तु क्रोधं साधुविवर्जितम् ।
मादृशः प्रसृजेत्कस्मात्सुयोधनवधादपि ॥
तेजस्वीति यमाहुर्वै पण्डिता दीर्घदर्शिनः ।
न क्रोधोऽभ्यन्तरस्तस्य भवतीति विनिश्चितम् ॥
यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते ।
तेजस्विनं तं विद्वांसो मन्यन्ते तत्वदर्शिनः ॥
क्रुद्धो हि कार्यं सुश्रोणि न यथावत्प्रपश्यति ।
न कार्यं न च मर्यादां नरः क्रुद्धोऽनुपश्यति ॥
हन्त्यवध्यानपि क्रोधो गुरून् क्रुद्धस्तुदत्यपि ।
तस्मात्तेजसि कर्त्तव्यः क्रोधो दूरे प्रतिष्ठितः ॥

१ बलीयसां मनुष्याणामुपरि क्लिश्यते तर्हि आत्मनैवात्मानं देहं त्यजतीत्यर्थः ।

दाक्ष्यं ह्यमर्षः शौर्यं च शीघ्रत्वमिति तेजसः ।
गुणाः क्रोधाभिभूतेन न शक्याः प्राप्तुमञ्जसा ॥
क्रोधं त्यक्त्वा तु पुरुषः सम्यक् तेजोऽभिपद्यते ।
कालयुक्तं महाप्राज्ञे क्रुद्धैस्तेजः सुदुःसहम् ॥
क्रोधस्तु पण्डितैः शश्वत्तेज इत्यभिनिश्चितम् ।
रजस्तल्लोकनाशाय विहितं मानुषं प्रति ॥
तस्माच्छश्वत्त्यजेत्क्रोधं पुरुषः सम्यगाचरन् ।
श्रेयान्स्वधर्मानपगो न क्रुद्ध इति निश्चितम् ॥
यदि सर्वमबुद्धीनामतिक्रान्तमचेतसाम् ।
अतिक्रमो मद्विधस्य कथं स्वित्स्यादनिन्दिते ॥
यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमाः ।
न स्यात्सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रहः ॥
अभिषक्तो ह्यभिषजेदाहन्याद्गुरुणा हतः ।
एवं विनाशो भूतानामधर्मः प्रथितो भवेत् ॥
आक्रुष्टः पुरुषः सर्वं प्रत्याक्रोशेदनन्तरम् ।
प्रतिहन्याद्धतश्चैव तथा हिंस्याच्च हिंसितः ॥
हन्युर्हि पितरः पुत्रान् पुत्राश्चापि तथा पितॄन् ।
हन्युश्च पतयो भार्याः पतीन्भार्यास्तथैव च ॥
एवं संकुपिते लोके जन्म कृष्णे न विद्यते ।
प्रजानां सन्धिमूलं हि जन्म विद्धि शुभानने ॥
ताः क्षिपेरन्प्रजाः सर्वाः क्षिप्रं द्रौपदि तादृशे ।
तस्मान्मन्युर्विनाशाय प्रजानामभवाय च ॥
यस्मात्तु लोके दृश्यन्ते क्षमिणः पृथिवीसमाः ।
तस्माज्जन्म च भूतानां भवश्च प्रतिपद्यते ॥

क्षन्तव्यं पुरुषेणेह सर्वापत्सु सुशोभने ।
क्षमावतो हि भूतानां जन्म चैव प्रकीर्त्तितम् ॥
आक्रुष्टस्ताडितः क्रुद्धः क्षमते यो बलीयसः ।
यश्च नित्यं जितक्रोधो विद्वानुत्तमपूरुषः ॥
प्रभाववानपि नरस्तस्य लोकाः सनातनाः ।
क्रोधनस्त्वल्पविज्ञानः प्रेत्य चेह च नश्यति ॥
अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावतां कृष्णे काश्यपेन महात्मना ॥
क्षमा धर्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेवं जानाति स सर्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतं च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥
अति यज्ञविदां लोकान्क्षमिणः प्राप्नुवन्ति च ।
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ॥
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमाश्रमः ।
तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत् ॥
यस्यां ब्रह्म च सत्यं च यज्ञा लोकाश्च धिष्ठिताः ।
क्षन्तव्यमेव सततं पुरुषेण विजानता ॥
यदा हि क्षमते सर्वं ब्रह्म संपद्यते तदा ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥
इह सन्मानमर्च्छन्ति परत्र च शुभां गतिम् ।
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ॥
तेषां परतरे लोकास्तस्मात्क्षान्तिः परा मता । इति ।

तर्हि दुर्योधन एव कुतो न क्षमां करोतीत्यत आह ।

सुयोधनो नार्हतीति क्षमामेवं न विन्दति ॥
अर्हस्तथाहमित्येव तस्मान्मां विन्दते क्षमा ।
एतदात्मवतां वृत्तमेष धर्मः सनातनः ॥
क्षमा चैवानृशंस्यं च तस्मान्मां विन्दते क्षमा । इति ।

अत एवोक्तं वनप॰ अ॰ ३११

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः । ६० । इति ।

शा॰ अ॰ ८४

किं च । शक्र उवाच ।

किं स्विदेकपदं ब्रह्मन्पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ॥

बृहस्पतिरुवाच ।

सान्त्वमेकपदं शक्र पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ॥
एतदेकपदं शक्र सर्वलोकसुखावहम् ।
आचरन्सर्वभूतेषु प्रियो भवति सर्वदा ॥
यो हि नाभाषते किंचित्सर्वदा भ्रुकुटीमुखः ।
द्वेष्यो भवति भूतानां स सान्त्वमिह नाचरन् ॥
यस्तु सर्वमभिप्रेक्ष्य पूर्वमेवाभिभाषते ।
स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ॥
दानमेव हि सर्वत्र सान्त्वेनानभिजल्पितम् ।
न प्रीणयति भूतानि निर्व्यञ्जनमिवाशनम् ॥

आदाय[1] नादपि भूतानां मधुरामीरयन्गिरम् ।
सर्वलोकमिमं शक्र सान्त्वेन कुरुते वशे ॥
तस्मात्सान्त्वं प्रयोक्तव्यं दण्डमाधित्सतापि हि ।
फलं च जनयत्येवं न चास्योद्विजते जनः ॥
सुकृतस्य हि सान्त्वस्य श्लक्ष्णस्य मधुरस्य च ।
सम्यगासेव्यमानस्य तुल्यं जातु न विद्यते ॥

इति शक्रबृहस्पतिसंवादेन स्मितपूर्वाभिभाषणस्य सकललोकप्रीतिजनकतायां व्यवस्थितायां पूर्वादाहृतवचननिचयेन परप्रीत्युत्पादने धर्मप्राप्तिश्रवणादपूर्वोत्पादकत्वं नीतिरूपत्वं च लभ्यते ।

अत एव शक्रं प्रति ययातिवचनम् । आदि प० अ ८७

अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषश्च प्रधानो विद्वांस्तथैवाविदुषः प्रधानः ॥
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्द[2]ति ॥
नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत[3] ।
ययास्य वाचा पर उद्विजेत न तां वदेदुष[4]तीं पापलोक्याम् ॥
अरुंतुदं परुषं तीक्ष्णवाचं वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धां निर्ऋतिं वहन्तम् ॥
सद्भिः पुरस्तादभिपूजितः स्यात्सद्भिस्तथा पृष्ठतो रक्षितः स्यात् ।
सदाऽसतामतिवादांस्तितिक्षेत्सतां वृत्तं चाददीतार्यवृत्तः ॥
वाक्सायका वदनान्निष्पतन्ति यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति तान्पण्डितो नावसृजेत्परेषु ॥

१ वश्यं गृहीत्वापि । २ आक्रुश्यमान इति शेषः । ३ हीनकर्मणा शत्रुं न वशे कर्तुमिच्छेत् । योग्यताहीनाद्वस्तु न गृह्णीयादिति केचित् । ४ अमंगलस्याम् ।

न ह्रीदृशं संवननं त्रिषु लोकेषु विद्यते ।
दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥
तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् ।
पूज्यान्त्संपूजयेद्दद्यान्न च याचेत्कदा चन ॥ इति ।

दानस्य च क्रोधादिपूर्वकं कृतस्य महतोऽपि न तादृक्फलदातृत्वं यथा स्तोकस्यापि सान्त्वपूर्वं कृतस्येति सक्तुप्रस्थाख्यानेन स्फुटी भविष्यति ।

क्रोधादीनां स्वरूपं तदुत्पत्तिवृद्धी तन्नाशोपायाश्चोपपादिताः पितामहेन धर्मात्मजपृष्टेन । आप॰ अ॰ ३३

युधिष्ठिर उवाच ।
यतः प्रभवति क्रोधः कामो वा भरतर्षभ ।
शोकमोहौ विधित्सा च परासुत्वं च तद्वद ॥
लोभो मात्सर्यमीर्ष्या च कुत्सा ऽसूया कृपा भयम् ।
एतत्सर्वं महाप्राज्ञ याथातथ्येन मे वद ॥

भीष्म उवाच ।
त्रयोदशैते ऽतिबलाः शत्रवः प्राणिनां स्मृताः ।
उपासन्ते महाराज समन्तात्पुरुषानिह ॥
एते प्रमत्तं पुरुषमप्रमत्ता स्तुदन्ति च ।
वृकाइव विलुम्पन्ति दृष्ट्वैव पुरुषं बलात् ॥
एभ्यः प्रवर्तते दुःखमेभ्यः पापं प्रवर्तते ।
इति मर्त्यो विजानीयात्सततं पुरुषर्षभ ॥
एतेषामुदयं स्थानं क्षयं च पृथिवीपते ।
हन्त ते कथयिष्यामि क्रोधस्योत्पत्तिमादितः ॥

लोभात्क्रोधः प्रभवति परदोषैरुदी[1]र्यते ।
क्षमया ति[2]ष्ठते राजन् क्षमया विनिवर्तते ॥
संकल्पाज्जायते कामः सेव्यमानो विवर्धते ।
यदा प्राज्ञो विरमते तदा सद्यः प्रणश्यति ॥
परासूया क्रोधलोभावन्तरा प्रतिमु[3]च्यते ।
दयया सर्वभूतानां निर्देशा[4]द्विनिवर्तते ॥
अवद्यदर्शनादेति तत्त्वाज्ञानाच्च धीमताम् ।
अज्ञानप्रभवो मोहः पापाभ्यासात्प्रवर्धते ॥
यदा प्राज्ञेषु रमते तदा सद्यः प्रणश्यति ।
विरुद्धानीह शास्त्राणि पश्यन्तीह कुरूद्वह ॥
विधित्सा जायते तत्र तत्त्वज्ञानान्निवर्तते ।
प्रीत्या शोकः प्रभवति वियोगात्तस्य देहिनः ॥
यदा निरर्थकं वेत्ति तदा सद्यः प्रणश्यति ।
परासु[5]ता क्रोधलोभादभ्यासाच्च प्रवर्धते ॥
दयया सर्वभूतानां निर्देशा[6]द्विनिवर्तते ।
सत्यत्यागात्तु मात्सर्यमहितानां च सेवया ॥
एतत्तु क्षीयते तात साधूनामुपसेवनात् ।
कुलाज्ज्ञानात्तथैश्वर्यान्मदो भवति देहिनाम् ॥
एभिरेव तु विज्ञा[7]तैः स च सद्यः प्रणश्यति ।
ईर्ष्या कामात्प्रभवति संघर्षाच्चैव जायते ॥
इतरेषां तु सत्त्वानां प्रज्ञया सा प्रणश्यति ।
विभ्रमाल्लोकबाह्यानां द्वेष्यैर्वाक्यैरसंमतैः ॥

---

१ वर्धते । २ निरुध्यते निवर्तते च । ३ क्रोधाल्लोभाद्वा भवतीत्यर्थः । ४ निर्वेदादित्यपि पाठः । ५ अकार्ये प्रवृत्तिः । ६ निर्वेदादित्यपि पाठः । क्रोधजा दयया लोभजा निर्वेदादिति भावः । ७ कुलोत्कर्षप्रयोजकत्वेनेति शेषः ।

कुत्सा संजायते राजल्लोकान्प्रेक्ष्याभिशाम्यति ।
इति कर्तुं न शक्ता ये बलस्यायापकारिणे ॥
असूया जायते तीव्रा कारुण्याद्विनिवर्त्तते ।
कृपणान्सततं दृष्ट्वा ततः संजायते कृपा ॥
धर्मनिष्ठां यदा वेत्ति तदा शाम्यति सा कृपा ।
अज्ञानप्रभवो लोभो भूतानां दृश्यते सदा ॥
अस्थिरत्वं च भोगानां दृष्ट्वा ज्ञात्वा निवर्त्तते ॥
एतान्येव जितान्याहुः प्रशमाच्च त्रयोदश ।
एते हि धार्त्तराष्ट्राणां सर्वे दोषास्त्रयोदश ॥
त्वया सत्यार्थिना नित्यं विजिता ज्येष्ठसेवनात् ।

इति ग्रन्थेन । अहिंसाया एव च सर्वधर्मोत्तमत्वं युधिष्ठिरबृहस्पतिसंवादेनोपबृंहितम् आनु॰ अ॰ ११३

युधिष्ठिर उवाच ।

अहिंसा वैदिकं कर्म ध्यानमिन्द्रियसंयमः ।
तपोथ गुरुशुश्रूषा किं श्रेयः पुरुषं प्रति ॥

बृहस्पतिरुवाच ।

सर्वाण्येतानि धर्म्याणि पृथग्द्वाराणि सर्वशः ।
शृणु संकीर्त्यमानानि षडेव भरतर्षभ ॥
हन्त निःश्रेयसं जन्तोरहं वक्ष्याम्यनुत्तमम् ।
अहिंसापाश्रयं धर्मं यः साधयति वै नरः ॥
त्रीन्दोषान्त्सर्वभूतेषु निधाय पुरुषः सदा ।
कामक्रोधौ च संयम्य ततः सिद्धिमवाप्नुते ॥
अहिंसकानि भूतानि दण्डेन विनिहन्ति यः ।
आत्मनः सुखमन्विच्छन् स प्रेत्य न सुखी भवेत् ॥

आत्मोपमस्तु भूतेषु यो वै भवति पूरुषः ।
न्यस्तदण्डो जितक्रोधः स प्रेत्य सुखमेधते ॥
सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः[1] ॥
न तत्परस्य संदध्यात्प्रतिकूलं यदात्मनः ।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥
यथा परः प्रक्रमते परेषु तथा परे प्रक्रमन्ते परस्मिन् ।
तथैव तेऽस्तूपमा जीवलोके यथा धर्मो नैपुणेनोपदिष्टः ॥

वैशम्पायन उवाच ।
इत्युक्त्वा तं सुरगुरुर्धर्मराजं युधिष्ठिरम् ।
दिवमाचक्रमे धीमान्पश्यतामेव नस्तदा । इति

इत्थमभिधायान्तर्हितेन सुरगुरुणा सर्वेषां समक्षमेवाहिंसायाः सकलधर्ममूलत्वं व्यवास्थापि । प्रसिध्यति चात्र महाभारतइतिहासः । पुरा किल कश्चन मुनिश्चिरं तपस्यंस्तत्तपसा निजपदच्युतिं शङ्कमानैः सुरैर्विज्ञापितेन महेन्द्रेणाभिमतं वरं याचस्वेति मुहुरनुबध्यमानोऽपि वरमनिच्छंस्तं प्रत्याचख्यौ । अथेन्द्रो निराशश्चिरं विचार्य तदाश्रमादनतिदूरवर्त्तितरुतले विकोशं निशातमसिं संस्थाप्य यथागतमगच्छत् । अथ मुनिः कदा चन कुशसमिदाद्याहरणाय पर्यटन्वृक्षतले खड्गमालक्ष्य तेन समिदादिच्छेदं सुकरमुद्वीक्ष्य तमसिं संजग्राह । अनन्तरं च कुतुकाविष्टो मुहुस्तेन विविधा वीरुधो वृक्षांश्च छिन्दन्नहीयत तपसइति । अनेन चेतिहासेन जङ्गमहिंसाया अपि पापप्रयोजकत्वे स्थिते पश्वादीनां हिंसायाः पापजनकत्वमर्थादेव सिध्यति, विशेषतश्च विवेकवन्मनुष्यादि-

१ अनिकेतस्य परं पदमभिलष्यतः ।

कर्मिकायास्तस्यास्तथाविधत्वम् । प्रपञ्चितं चेदं पूर्वमेव । एवं स्थिते उपकर्त्तर्यपि ये ऽपकारकारिणस्तेषां कृतघ्नपदाभिधेयानामतीव शास्त्रेषु लोके च निन्दा युक्तैव । उक्तं च कृतघ्ने नास्ति निष्कृतिरिति ।

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेदिति ॥

प्रसिध्यति चात्रेतिहा[१]सः । मित्रद्रोहिकृतघ्नयोः कथं परिहार्यता तद्विषयमितिहासं कथयेति युधिष्ठिरेण सविनयं पृष्टः शान्तनवो ऽवादीत् । पुरा किल कश्चिन्मध्यदेशीयो ब्रह्मकर्मणा परिवर्जितो गौतमो नाम द्विजन्मा ऽऽसीत् । सो ऽयमतिदरिद्रो व्यतीतेषु कतिपयेषु दिवसेषु समृद्धं कं चिच्छबरनगरं निरीक्ष्य भिक्षार्थे प्राविशत् । तत्र च धनयुतं कर्मदानादिषु निरतं शबरमवलोक्याच्छनिवासादर्थमयाचत । सो ऽप्येनमवलोक्य करुणापूरतरङ्गितहृदयो ऽन्नादिकं कां चिद्विधवां स्त्रियं चादात् । तदनन्तरमयमतिहृष्टात्मा तस्यैव गृहे तया सह रममाणो बाणवेधे परं यत्नमकरोत् । प्रत्यहं च वनाद्वनं प्रविश्य तत्रत्यानेकविधपशुपत्यादीनतिनिर्घृणः शबरइव जघान । एवं शबरालये वसतस्तस्य सुखेन बहवो मासा व्यतीयुः । अथ कश्चिद्द्विजन्मा सकलागमपारदृश्वा शूद्रान्नादिषु घृणी ब्राह्मणगृहमेव मृगयमाणो द्विजगृहमगमत् । निरीक्ष्य चैनं चापपाणिं रुधिरावसिक्ततनुं कुत्सयन्निदमवोचत् । रे द्विजोत्पन्नस्त्वं विप्रकुले शबरालये वस्तुं नार्हसि । इति स्वहितकारिणा तेनेरितां गिरं निशम्य सन्तापाकुलहृदयः सन् भो द्विज निर्धनतया शबरालये वसामि परं चावामिमां शर्वरीमत्रैव विनीय श्वः सह यास्याव इत्यब्रवीत् । सोपि तथेति प्रतिश्रुत्य क्षुधया पीडितोप्यपवित्रमन्नादिकमस्पृशन्नवसत् । तदनन्तरमयं प्रभाते तस्मिन्विप्रे गते सति समुद्रं प्रति गच्छन्पथि स्थितान्त्समुद्रोपान्तगतान्वणिजः पश्यंस्तैः सह समुद्रमभ्यगच्छत् । सोयं वणिक्समूहः कस्मिंश्चिद्गिरिगह्वरे मत्तमतङ्गजेन निहतोभवत् । अयं विप्रोपि कथं चित्तस्माद्भयाद्विमुक्तः कां दिशं प्रयामीत्याकुलचेता उत्तरां दिशं जगाम ।

१ अथमापद्धर्मे ३८ अध्यायप्रभृति ।

तत्र वने भ्रमन्नेकाकी किंचिदेव चरन्नन्यानमासाद्य शालतालतमालादिभिः पादपैरुपशोभितमतिप्रल्हादकरं किंचिद्वनं प्रविश्यातिरमणीयानि पक्ष्यादीनां विरुतानि शृण्वन्नतिसुखावहं न्यग्रोधमूलमुपाजगाम । तत्र च सौरभादिगुणयुतेन मातरिश्वना सेव्यमानोयं सुखेन सुष्वाप । तदनु नीरजबन्धौ रवावस्तं याते सति ब्रह्मसखः कश्यपपुत्रो राजधर्मेति ख्यातो बकपतिरभजत् स्वकीयं गृहं तमेव न्यग्रोधम् । आगते च तस्मिन्विहगराजे ऽतिचकितोयं तं दृष्ट्वा तुत्पीडितो हिंसार्थमुदयुङ्क्त । राजधर्मा तमवलोक्य भो विप्र ममातिथिस्त्वमसि त्वां पूजयामीत्यवोचत् । इति हृदयाह्लादिनीं राजधर्मणो गिरं निशम्य विस्मितः सन्नैक्षत । सोपि राजधर्मणा काश्यपदाक्षायणीभ्यां मे जन्मेत्युक्त्वा पाद्यादिकैरतिथिसत्कारैः पूजयित्वा गोत्रमागमनकारणं च वदेत्युक्तो ब्राह्मणो गौतमोऽहमतिदरिद्रो धनार्थं पर्यटन्नागत इत्यब्रवीत् । इति विप्रेरितां वाचमाकर्ण्य धनार्थमहं यतिष्य इत्युक्त्वा विरराम । तदनु भानावुदयाचलमधिरूढे सति भो गौतमानेन पथेतस्त्रियोजनं गत्वा मम सखायं राक्षसाधिपतिं विरूपाक्षनामानं गच्छ स च ते सर्वकामान्पूरयिष्यतीत्युवाच । इति वाचं श्रुत्वा गौतमोतिशीघ्रं मेरुव्रजं नाम विरूपाक्षनगरमगमत् । विरूपाक्षेण च सुहृत्प्रेषितमेनं विज्ञायानीयतां गौतम इति आज्ञप्तैस्तैर्दूतैराहूतोयं द्रुततरं जगाम तस्य पार्श्वम् । स चैनमागतमवलोक्य यथार्हं संपूज्य गोत्रनिवासदारादीन् समपृच्छत् । पृष्टोयं गौतमः स्वस्य मध्यदेशप्रसूतिं शबरावसथे निवासं पुनर्भूं भार्यां चाकथयत् । इति सर्वमाकर्ण्य विरूपाक्षः किंचिद्विमृश्य द्विजन्मतयैनमन्नधनादिकैरपूपुजत् । तत्रापरानपि ब्राह्मणानागतान्पूजयामास । सर्वे ब्राह्मणा अन्नधनादिलाभेन हृष्टाः स्वं स्वं भवनं प्रतीयुः । अयं द्विजन्मापि अधिकां रत्नराशिमावहन्कथं चिन्न्यग्रोधमूलमुपागत्य दूरदेशगमनार्थं पाथेयमलभमान एनमेव पक्षिराजं निहत्य द्रुततरं गृहीत्वा यास्यामीति चिन्तयित्वा चिरमुचितोपचारेण परिचर्य पार्श्वे स्वपन्तमेनमलातेन निहत्य स्वगृहं प्रति ययौ । तदनु अपरे ऽह्नि स्वगृहं प्रत्यनागतं राजधर्माणं विचार्य सुतं विरूपाक्षो ऽवदत् । अयि पुत्र न दृष्टो

मयाद्य राजधर्मा मन्ये च पापीयसा ब्रह्मवर्जितेन तेन गौतमेनैव हत इति । तस्मात्तत्र गत्वा विचार्यतामनागमनकारणमिति । एवमाज्ञप्तः पित्रा शीघ्रं तत्र गत्वा ऽनवलोकितराजधर्मातिविषादाकुलो गत्वा स्वनगरं धावद्भिर्भृत्यैश्च गृहीतं विप्रसमीपे तं दृष्ट्वा पक्षास्थिचरणादिरहितं राज्ञो दर्शयामास । राजाप्यतिसंतापाकुलः सन् वध्यतामयं कृतघ्नो ब्राह्मणोस्य मांसेन तृप्ता भवन्तु भवन्त इत्युवाच । आज्ञप्ता भृत्याः क्रव्यादा अपि नैच्छन्नत्तुं तन्मांसम् । तदनु शबरेभ्यो दीयतामित्यादिष्टास्तं खण्डशश्छित्वा शबरेभ्यो ऽदुः । ते ऽपि तं कृतघ्नं भोक्तुं नैवैच्छन् । किं बहुना पक्षिणो ऽपि न बुभुजिरे तस्य मांसम् । ततश्चिरं विलप्य विरूपाक्षो रत्नवस्त्राद्यैरलंकृतां चितां कारयित्वा तस्य प्रेतकार्याणि कारयितुं प्रववृते । तस्मिन्काले चिताया उपरि पयस्विनी सुरभिराजगाम । तस्या मुखाच्च दुग्धमिश्रः फेनश्चितायामपतत् । तदा तेन लब्धजीवितो ऽयं विहगपतिरगमद्विरूपाक्षपार्श्वम् । एतदन्तरे देवराजो विरूपाक्षनगरमागत्य तमवादीत् । पुरा ब्रह्मसभायामयं यदा न गतस्तदा ऽचिरादेव वधं प्राप्स्यसीति विधात्रा शप्तः पक्षिराट् । पुनश्च तेनैव दयालुना जीवित इति । सो ऽपि राजधर्मा देवराजं प्रणिपत्यावोचत् । मयि चेद्दयसे प्रभो गौतमं तर्हि जीवयेति । ततः शक्रे सुधासेकेन तमुज्जीव्य गते तं पापं परिष्वज्य स पक्षी सधनं व्यसर्जयत् । देवाश्च तं शेपुस्त्वं पुनर्भूकुक्षावुत्पादितापत्यो देहावसाने दुःसहमनन्तं निरयमेष्यसीति सैव चास्यासीद्दशा । राजधर्मा च ब्रह्मलोकं यथापूर्वमासाद्य ब्रह्मणा बहुमानितश्चिरमभ्यनन्ददिति ।

एवमानृशंस्यस्य शुकाख्यानेन परमश्रेयस्साधनत्वं स्पष्टं दर्शितम् । आनु॰ अ॰ ५ कश्चिच्छुको वनस्पतौ जातो जन्मतः प्रभृति तत एव लब्धसकलजीवनसाधनः कालक्रमेण च तस्मिन् शुष्यति तमत्यजन् क्षीणतमकायो भगवता महेन्द्रेण स्वयमागत्य तं वनस्पतिं मोक्तुमाश्रयितुं च देशान्तरमतीवोपदिशता भृशं प्रलोभितो ऽपि ।

अनुक्रोशो हि साधूनां महद्धर्मस्य लक्षणम् ।
अनुक्रोशश्च साधूनां सदा प्रीतिं प्रयच्छति ॥
नार्हसे मां सहस्राक्ष द्रुमं त्याजयितुं चिरात् ।
समर्थमुपजीव्येमं त्यजेयं कथमद्य वै ॥

इत्यादि वदतानृशंस्यमेव दधत्प्रसीदता तेन पुनर्वनस्पत्युज्जीवनपूर्वकं परितोषित इति ।

युधिष्ठिरेणापि क्षपितप्रायद्वादशवार्षिकवनवासेन पानीयानयनार्थं गतेषु चतुर्ष्वपि भ्रातृषु यक्षेण शमितेषु तानुपसर्पन् यक्षमालोक्य तदुदितांश्च प्रश्नानुत्तरयता प्रसीदता तेनैकभ्रात्रुज्जीवनं वरं दातुकामेनाभिहितेन विहाय भीमार्जुनौ नकुलं जीवन्तमभिलष्यता ऽऽनृशंस्यं महान्धर्म इति ख्यापितमभिहितं च । वनप॰ अ॰ ३११

आनृशंस्यं परो धर्मः परमार्थाच्च मे मतम् ।
आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ॥ १२२ इति ॥

तेनैव च ।

कश्च धर्मः परो लोके कश्च धर्मः सदाफलः ।
किं नियम्य न शोचन्ति कैश्च संधिर्न जीर्यते ॥ ७२ ॥

इति यक्षपृष्ठेन ।

आनृशंस्यं परो धर्मस्त्रयीधर्मः सदाफलः ।
मनो यम्य न शोचन्ति संधिः सद्भिर्न जीर्यते ॥ ७४ ॥

इत्युत्तरितम् । अत एव नलमुद्दिश्य दमयन्तीवाक्यम् ।

आनृशंस्यं परो धर्मस्त्वत्त एव हि मे श्रुतः ॥ इति ।

एवमानृशंस्याभावे ऋणनिवृत्तिर्न भवतीत्याह पाण्डुः । आदि॰अ॰ १२०

ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि ।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः ॥

एतानि तु यथाकालं यो न बुध्यति मानवः ।
न तस्य लोकाः सन्तीति धर्मविद्भिः प्रतिष्ठितम् ॥
यज्ञैस्तु देवान्प्रीणाति स्वाध्यायतपसा मुनीन् ।
पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान् ॥ इति ।

एवं गुरुशुश्रूषाया धर्म्यत्वमुद्घुष्यते । रा० अ० १०८

महानयं धर्मपथो बहुशाख[1]श्च भारत ।
किं स्विदेवेह धर्माणामनुष्ठेयतमं मतम् ॥
किं कार्यं सर्वधर्माणां गरीयो भवतो मतम् ।
यथाहं परमं धर्ममिह च प्रेत्य चाप्नुयां ॥

इति युधिष्ठिरप्रश्ने ।

मातापित्रोर्गुरूणां च पूजा बहुमता मम ।
इह युक्तो नरो लोकान् यशश्च महदश्नुते ॥
यच्च ते ऽभ्यनुजानीयुः कर्म तात सुपूजिताः ।
धर्माधर्मविरुद्धं वा तत्कर्त्तव्यं युधिष्ठिर ॥
न च तैरननुज्ञातो धर्ममन्यं समाश्रयेत् ।
यं च तेऽभ्यनुजानीयुः स धर्म इति निश्चयः ॥

इति प्रभृति शान्तनवीयोत्तरसंदर्भात् । एतदेव विमातुरप्याज्ञया चतुर्दशसमा वनं प्रवसता दाशरथिना प्रकाशितम् । तथैव । वनप० अ० ३११

दाक्ष्यमेकपदं स्वर्ग्यं दानमेकपदं यशः ।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम् ॥ ६८ ॥
मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति ।
कामं हित्वार्थवान् भवति लोभं हित्वा सुखी भवेत् ॥

१ बहुप्रकारः ।

तपः स्वधर्मवर्त्तित्वं मनसो दमनं दमः ।

क्षमा द्वन्द्वासहिष्णुत्वं ह्रीरकार्यनिवर्त्तनम् ॥

इत्यादिना दानयदानालोभित्वक्षमाह्रीप्रभृतीनामवश्यानुष्ठेयत्वं फलप्रदर्शनद्वारोक्तम् । मनुना च ।

मङ्गलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः ।

जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ॥

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।

जपतां जुह्वतां चैव विनिपातो न विद्यते ॥

इति वदता माङ्गलिकैः शान्त्यादिभिराचरणैर्युक्तता सुखसाधनतया संकीर्तिता ।

दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च ।

इत्यादिना मनुना कृपणस्याभोज्यान्नत्वेन गणनात् ।

श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्द्धुषेः ।

मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ॥

तान्प्रजापतिराहैत्य मा कृध्वं विषमं समम् ।

श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ॥

इत्यादिना कदर्यस्य श्रोत्रियस्यापि निन्द्यमपि वार्द्धुषिकमपेक्ष्य निन्द्यतायास्तेनैवाभिधानात्कार्पण्यस्य सर्वथैव हेयता परिग्राह्यता चौदार्यस्य स्पष्टमेव प्रादर्शि । तथा च लोभस्य सर्वात्मना हेयता सार्वजनीनाऽपि दृष्टान्तेनोपोद्बलिता पितामहेन । पुरा किल सप्तर्षयस्तपस्यन्तश्चेरुर्महीम् । अरुन्धती च वसिष्ठमनुययौ तां सेवमाना गण्डा नाम शूद्रा तत्पतिश्च शूद्रसखो नाम तानेव परिचचार । अथ दैववशेन महती बभूवानावृष्टिः । तस्यां च क्षुधाकुलानन्नार्थं परिक्लिश्यमानानेतान्वृषादर्भिर्नाम राजा भूरिधनं प्रतिग्राहयितुं प्रार्थयत प्रत्याचख्ये च प्रतिग्रहं परिहरद्भिरेतैः[1]

१ इयं कथा ऽऽनुशासनिके ९३ अध्याये ।

राजन्प्रतिग्रहो राज्ञां मध्वास्वादो विषोपमः ।
तज्जान[1]मानः कस्मात्त्वं कुरुषे नः प्रलोभनम् ॥

इत्यादि वदद्भिः । अथ तेषु प्रत्याख्यायाहारान्वेषणाय वनं गतेषु राज्ञा चोदितास्तन्मन्त्रिणः फलेषु सुवर्णं छद्मना निक्षिप्य तेभ्यः प्रदातुं भृशमयाचन्त ते तु तान्यादायालोच्य गुरुतराणि सुवर्णपूरितानि वृषादर्भिणा दित्सितानि निश्चित्य ।

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
सर्वं तन्नालमेकस्य तस्माद्विद्वांच्छमं चरेत् ॥
प्रतिग्रहे संय[2]मो वै तपो धारयते ध्रुवम् ।
तद्धनं ब्राह्मणस्येह लुभ्यमानस्य विस्रवेत् ॥

इत्याद्युक्त्वा मन्त्रिणः प्रत्याचख्युः । अथैतदुपश्रुत्य राजा कुपितस्तद्वधाय हुत्वा जातवेदसं कृत्यामुदपादयद्यातुधानीं नाम । तां चाज्ञापयेति वदन्तीमादिदेश सप्तर्षीन्विज्ञाय घातयेति । सा तु तथेत्युक्त्वा ताननुययौ । अथेन्द्रस्तेषां रिरक्षिषया स्थूलकायः परिव्राजको भूत्वा श्वानं चैकमादाय तदन्तिकमुपाययौ तैः सहैव च व्यचरत्तीर्थयात्राम् । अथैकदा शुचिजलां सरसीमालोक्य तेवतितीर्षन्तस्तद्रक्षिकां यातुधानीमपश्यन्का त्वमित्यपृच्छँश्चैनाम् । सा तु या का चनास्मि नानुयोज्या भवद्भिः सरसीमिमां रक्षामीत्यवोचत् । अथासौ क्षुधार्त्तैर्जलं विसखण्डांश्च जिघृक्षद्भिस्तैरर्थ्यमाना स्वस्वनामानि निरुच्यावतरत सरसीमित्यादिदेश तांस्तथा चक्रुश्च ते । अथ परिव्राजं नामनिर्वचनं पृच्छन्ती तेन सकृत्स्वनाम्नि शुनःसखसखायं मां यातुधान्युपधारयेति निरुक्ते ऽपि तत्तत्वमनवबुध्य पुनर्वदेति वदन्ती ।

सकृदुक्तं मया नाम न गृहीतं त्वया यदि ।
तस्मात्त्रिदण्डाभिहता गच्छ भस्मेति मा चिरम् ॥

१ जानन् । २ प्रतिग्रहनियमः ।

इति तेन शप्ता सद्य एव भस्मसादभवत् । अथ ते मुनयः सरसीमवगाह्य यथेष्टं बिसान्याहृत्य निक्षिप्य च तीरे कृताह्निकास्तीरे बिसान्यनवलोक्य श्रान्ताः क्षुधार्त्ताः परस्परं चौर्यमाशङ्कमानाः शपथायोपचक्रमिरे । तथैषु शपथैः शुद्धेषु परिव्राडपि ।

अध्वर्यवे दुहितरं ददातु च्छन्दोगे वा चरितब्रह्मचर्ये ।

आथर्वणं वेदमधीत्य विप्रः स्नायीत वा यो हरते बिसानि ॥

इति शपथं कुर्वन्निष्टमेवैतद्द्विजानामतस्त्वमेव चोर इत्युक्तः सत्यमहं चोर इन्द्रोऽहं यातुधानीमिमां हत्वा भवद्रक्षणार्थमागतोऽस्मीत्युक्त्वा तैः सहैव स्वर्गमगच्छत् ।

एवमेते महात्मानो भोगैर्बहुविधैरपि ।

क्षुधा परमया युक्ताश्छन्द्यमाना महात्मभिः ॥

नैव लोभं तदा चक्रुस्ततः स्वर्गमवाप्नुवन् ।

तस्मात्सर्वास्ववस्थासु नरो लोभं विवर्जयेत् ॥

एष धर्मः परो राजंस्तस्माल्लोभं विवर्जयेत् । इति ।

अतश्च वदान्येन श्रद्धापूतेन दत्तमल्पमपि भूरिफलदमिति प्रजापतेरभिप्रायः । अत एव श्रद्धया दत्तमसूयाविरहितेन स्तोकमपि भूरिफलदमिति सक्तुप्रस्थदृष्टान्तेन स्पष्टमेवावगम्यते ।

पु[१]रा किल निःशेषितारिचक्रेण युधिष्ठिरेण कृते ऽश्वमेधे साधु संतर्पितेषु चतुर्षु वर्णेषु कश्चिन्नकुल आगत्य नायं सदृशो यज्ञः सक्तुप्रस्थदानस्येत्युच्चैरुदघोषयत् । तन्निशम्य तत्रत्या जनाश्चित्रीयमाणा इतस्ततः शब्दहेतुमन्विष्यन्तः सुवर्णमयैकपार्श्वं नकुलं नायं यज्ञः सदृशो ब्राह्मणसक्तुदानस्येति वदन्तमपश्यन्नपृच्छंश्च । कथमनन्तस्वर्णदक्षिणो ऽयं यज्ञो न सदृशः सक्तुप्रस्थदानस्येति । सो ऽब्रवीत् । पुरा किल कुरुक्षेत्रे बहुषु स्वधर्मतत्परेषु विप्रेषु वसत्सु चिरमनावृष्टिरजनि । तस्यां च महतायासेनाशनमलभमाना ब्राह्मणाः कदा चिच्चतुर्थे कदा चित् षष्ठे कन्द-

१ इयं कथा ऽश्वमेधिके ९० अध्याये ।

मूलादिकमासाद्य विभज्यावर्तयन् । एकदा तु तैः कुतो ऽप्याढकं यवानामलभ्यत व्यभजंश्च ते तत् । तेष्वेको ब्राह्मणो लब्धयवप्रस्थो भार्यया पुत्रस्नुषाभ्यां च संयुतस्तान् सक्तूकृत्य विभज्य यथोचितं निजकुटुम्बाय गृहीतस्वांशो माध्याह्निकं विधिमन्वतिष्ठत् । तदैव कश्चनातिथिरतीव बुभुक्षितस्तदन्तिकमेत्य क्षुधितो ऽस्मीत्यवादीत् । स एनं पाद्यार्घ्यादिभिरभ्यर्च्य प्रत्यग्राहयत्स्वमंशम् । भुक्त्वैनमपरितुष्टमालोक्य विचिन्तयन्भार्यया सविनयमूचे ममांशो ऽस्मै दीयतामिति । तां क्षुधया वेपमानामतीव दुर्बलामालक्ष्य तदंशग्रहणायानिच्छन् मुहुरभ्यर्थ्यमानया प्रसह्य सपादपतनं ब्राह्मणार्थे स्वांशमग्राह्यत । अशित्वैनमप्यपरितुष्टे तस्मिन्पुत्र आह ममांशो ऽस्मै दीयतामिति । तं तु बालो ऽसि त्वं न शक्यसि क्षुधार्तः स्थातुमिति निषेधन्नाहमीदृश उदरंभरिः पितुरर्थे दद्यामपि स्वजीवितमतो मा ते धर्मापरोधो ऽभूदिति भाषमाणेन ग्राहितः स्वांशमार्पयदेनमतिथये । अथाप्यतृप्ताय तस्मै दातुमलब्धाशनो विचिन्तयन् स्नुषयोचे ममाप्यंशो ऽस्मै दीयतामिति । तां तु चिरमुपोषितां स्थातुमप्यपारयन्तीमवलोक्य बह्वाश्वासयन् विविधानि धर्म्याणि वचांसि भाषमाणया न स्वल्पोप्यायासः साम्प्रतं क्षुधाजनित इति प्रसादपूर्वकमेतया ऽर्पितं स्वांशं प्रत्यपादयदमुष्मै । अथासौ तृप्तो धर्मरूपेण प्रादुर्भूय तं द्विजं बहु प्रशस्य

न चाश्वमेधैर्बहुभिः समं फलमिदं तव ।
सक्तुप्रस्थेन विजितो ब्रह्मलोकस्त्वया ऽक्षयः ॥
विरजो ब्रह्मसदनं गच्छ विप्र यथासुखम् ।
सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुपस्थितम् ॥

इत्याद्युक्त्वाऽन्तरधात् । तत्र तेन सक्तुगन्धेन दिव्येन पुष्पवर्षेण तदीयदानजललेशेन च ममायमेको भागः सुवर्णीकृतः । ततः प्रभृति पार्श्वान्तरस्यापि काञ्चनीभावाशया बहूनि तीर्थानि भ्रमन्स्वेष्टमलभमानो यज्ञमिममुपश्रुत्य प्राप्तवानस्मि न च सिद्धं मदिष्टमतो ऽहं ब्रवीमि नैष यज्ञस्तेन तुल्य इति । इत्युक्त्वा च स ततो ऽगादिति । उपसंहृतं चैतत् ।

अद्रोहः सर्वभूतेषु संतोषः शीलमार्जवम् ।
तपो दमश्च सत्यं च प्रदानं चेति संमितम् ॥ इति ।

एवं लोभस्य विविधपापनिदानत्वं युधिष्ठिरभीष्मसंवादमुखेन दर्शितम् । आपद्धर्मे अ. २८

युधिष्ठिर उवाच ।

पापस्य यदधिष्ठानं यतः पापं प्रवर्तते ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन भरतर्षभ ॥

भीष्म उवाच ।

पापस्य यदधिष्ठानं तच्छृणुष्व नराधिप ।
एको लोभो महा[१]ग्राहो लोभात्पापं प्रवर्तते ॥
अतः पापमधर्मश्च तथा दुःखमनुत्तमम् ।
निकृत्या[२] मूलमेतद्धि येन पापकृतो जनाः ॥
लोभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते ।
लोभान्मोहश्च माया च मानः स्तम्भः परासुता ॥
अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः ।
अभि[३]ध्याऽप्रख्य[४]ता चैव सर्वं लोभात्प्रवर्तते ॥
अत्यागश्चातितर्षश्च विकर्मसु च याः क्रियाः ।
कुलविद्यामदश्चैव रूपैश्वर्यमदस्तथा ॥
सर्वभूतेष्वभिद्रोहः सर्वभूतेष्वसत्कृतिः ।
सर्वभूतेष्वविश्वासः सर्वभूतेष्वनार्जवम् ॥
हरणं परवित्तानां परदाराभिमर्शनम् ।
वा[५]ग्वेगो मनसो वेगो निन्दावेगस्तथैव च ॥

१ ग्राह इव ग्रासकर्ता । २ शाठ्यस्य । ३ चिन्ता । ४ अकीर्तिः । ५ वेगोऽविचारपूर्वा प्रवृत्तिः ।

उपस्थोदरयोर्वेगो मृत्युवेगश्च दारुण: ।
ईर्ष्यावेगश्च बलवान् मिथ्यावेगश्च दुर्जय: ॥
रसवेगश्च दुर्वार्य: श्रोत्रवेगश्च दु:सह: ।
कुत्सा विकत्था मात्सर्यं पापं दुष्करकारिता ॥
साहसानां च सर्वेषामकार्याणां क्रियास्तथा ।
जा[1]तौ बाल्ये च कौमारे यौवने चापि मानवा: ॥
न संत्यजन्त्यात्मकर्म यो न जीर्यति जीर्यत: ।
यो न पूरयितुं शक्यो लोभ: प्राप्त्या कुरूद्वह ॥
नित्यं गम्भीरतोयाभिरापगाभिरिवोदधि: ।
न प्रहृष्यति यो लाभै: कामैर्यश्च न तृप्यति ॥
यो न देवैर्न गन्धर्वैर्नासुरैर्न महोरगै: ।
ज्ञायते नृप तत्त्वेन सर्वैर्भूतगणैस्तथा ॥
स लोभ: सह मोहेन विजेतव्यो जितात्मना ।
दम्भो द्रोहश्च निन्दा च पैशुन्यं मत्सरस्तथा ॥
भवन्त्येतानि कौरव्य लुब्धानामकृतात्मनाम् ।
सुमहान्त्यपि शास्त्राणि धारयन्ति बहुश्रुता: ॥
छेतार: संशयानां च क्लिश्यन्तीहाल्पबुद्धय: ।
द्वेषक्रोधप्रसक्ताश्च शिष्टाचारबहिष्कृता: ॥
अन्त: क्रूरा वाङ्मधुरा: कूपाश्छन्नास्तृणैरिव ।
धर्मवैतंसि[2]का: क्षुद्रा मुष्णन्ति ध्वजि[3]नो जगत् ॥
कुर्वते च बहून्मार्गांस्तान्हेतुबलमाश्रिता: ।
सतां मार्गान्विलुम्पन्ति लोभज्ञानेष्ववस्थिता: ॥

१ जन्मनीति टी० । २ शोभार्थं धर्मचारिण: । ३ धर्मप्रख्यापका: ।

धर्मस्य ह्रियमाणस्य लोभग्रस्तैर्दुरात्मभिः।
या या विक्रियते संस्था ततः सापि प्रप[1]द्यते॥
दर्पः क्रोधो मदः स्वप्नो हर्षः शोको ऽतिमानिता।
एतएव हि कौरव्य दृश्यन्ते लुब्धबुद्धिषु॥
एतानशिष्टान्बुध्यस्व नित्यं लोभसमन्वितान्।
शिष्टांस्तु परिपृच्छेथा यान् वक्ष्यामि शुचिव्रतान्॥
येष्वावृत्तिभयं नास्ति परलोकभयं नहि।
नामिषेषु प्रसङ्गो ऽस्ति न प्रियेष्वप्रियेषु च॥
शिष्टाचारः प्रियो येषु दमो येषु प्रतिष्ठितः।
सुखं दुःखं समं येषां सत्यं येषां परायणम्॥
दातारो न ग्रहीतारो दयावन्तस्तथैव च।
पितृदेवातिथेयाश्च नित्योद्युक्तास्तथैव च॥
सर्वोपकारिणो वीराः सर्वधर्मानुपालकाः।
सर्वभूतहिताश्चैव सर्वदेया[2]श्च भारत॥
न ते चालयितुं शक्या धर्मव्यापारचारिणः।
न तेषां भिद्यते वृत्तं यत्पुरा साधुभिः कृतम्॥
न त्रासिनो न चपला न रौद्राः सत्पथे स्थिताः।
ते सेव्याः साधुभिर्नित्यं येष्वहिंसा प्रतिष्ठिता॥
कामक्रोधव्यपेता ये निर्ममा निरहंकृताः।
सुव्रताः स्थिरमर्यादास्तानुपास्व च पृच्छ च॥
न धनार्थं यशोर्थं वा धर्मस्तेषां युधिष्ठिर।
अवश्यं कार्य इत्येव शरीरस्य क्रियास्तथा॥

१ यथा विक्रियते तथैव प्रथां याति। २ सर्वं देयं येषां ते।

न भयं क्रोधचापल्ये न शोकस्तेषु विद्यते ।
न धर्मध्वजिनश्चैव न गुह्यं कं चिदास्थिताः ॥

येष्वलोभस्तथा ऽमोहो ये च सत्यार्जवे स्थिताः ।
तेषु कौन्तेय सज्जेथा येषां न भ्रश्यते पुनः ॥

ये न हृष्यन्ति लाभेषु नालाभेषु व्यथन्ति च ।
निर्ममा निरहंकाराः सत्वस्थाः समदर्शिनः ॥

लाभालाभे सुखदुःखे च तात प्रियाप्रिये मरणं जीवितं च ।
समानि येषां स्थिरविक्रमाणां बुभुत्सतां सत्वपथे स्थितानाम् ॥
धर्मप्रियांस्तान्सुमहानुभावान् दान्तो ऽप्रमत्तश्च समर्चयेथाः ।
देवान्सर्वे गुणवन्तो भवन्ति शुभाशुभे वाक्प्रलापास्तथान्ये ॥ २६ ॥

युधिष्ठिर उवाच ।

अनर्थानामधिष्ठानमुक्तो लोभः पितामह ।
अज्ञानमपि वै तात श्रोतुमिच्छामि तत्वतः ॥

भीष्म उवाच ।

करोति पापं यो ऽज्ञानान्नात्मनो वेत्ति च क्षयम् ।
प्रद्वेष्टि साधुवृत्तांश्च स लोकस्यैति वाच्य[1]ताम् ॥

अज्ञानान्निरयं याति तथा ऽज्ञानेन दुर्गतिम् ।
अज्ञानात्क्लेशमाप्नोति तथा ऽपत्सु निमज्जति ॥

युधिष्ठिर उवाच ।

अज्ञानस्य प्रवृत्तिं च स्थानं वृद्धिक्षयोदयौ ।
मूलं यो[2]गं गतिं कालं कार[3]णं हेतु[4]मेव च ॥

१ निन्द्यताम् । २ संगतिम् । ३ कारकहेतुम् । ४ ज्ञापकहेतुम् ।

श्रोतुमिच्छामि तत्त्वेन यथावदिह पार्थिव ।
अज्ञानप्रसवं हीदं यद् दुःखमुपलभ्यते ॥

भीष्म उवाच ।

रागो द्वेषस्तथा मोहो हर्षः शोको ऽभिमानिता ।
मानः क्रोधश्च दर्पश्च तन्द्री चालस्यमेव च ॥
इच्छा द्वेषस्तथा तापः परवृद्ध्युपतापिता ।
अज्ञानमेतन्निर्दिष्टं पापानां चैव याः क्रियाः ॥
एतस्य वा प्रवृत्तेश्च वृद्ध्यादीन्यांश्च पृच्छसि ।
विस्तरेण महाराज शृणु तच्च विशेषतः ॥
उभावेतौ समफलौ समदोषौ च भारत ।
अज्ञानं चापि लोभश्चाप्येकं जानीहि पार्थिव ॥
लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्द्धते ।
स्थाने स्थाने भवेत्क्षीणमुपैति विविधां गतिम् ॥
मूलं लोभस्य मोहो वै काला[१]त्मगतिरेव च ।
छिन्ने भिन्ने तथा लोभे कारणं काल एव च ॥
तस्याज्ञानाद्धि लोभो हि लोभादज्ञानमेव च ।
सर्वदोषास्तथा लोभात्तस्माल्लोभं विवर्जयेत् ॥
जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् ।
लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये नराधिपाः ॥
प्रत्यक्षं तु कुरुश्रेष्ठ त्यज लोभमिहात्मना ।
त्यक्त्वा लोभं सुखं लोके प्रेत्य चानुचरिष्यसि ॥ इति

अत एव दमादीनां स्वर्गसाधनतया तत्प्रतिबन्धकक्रोधादिनाशकतया च तद्वतां शूरत्वं प्रपञ्चितमानुशासनिके युधिष्ठिरभीष्मसंवादमुखेन आनु॰ अ॰ ७५

१ कालेन विपरीतेनात्मनि गतिः प्राप्तिः ।

व्रतानां किं फलं प्रोक्तं कीदृशं वा महाद्युते ।
नियमानां फलं किं च स्वधीतस्य च किं फलम् ॥
दत्तस्येह फलं किं च वेदानां धारणे च किम् ।
अध्यापने फलं किं च सर्वमिच्छामि वेदितुम् ॥
अप्रतिग्राहके किं च फलं लोके पितामह ।
तस्य किं च फलं दृष्टं श्रु[१]तं यस्तु प्रयच्छति ॥
स्वकर्मनिरतानां च शूद्राणां चापि किं फलम् ।
शौचे च किं फलं प्रोक्तं ब्रह्मचर्ये च किं फलम् ॥
पितृशुश्रूषणे किं च मातृशुश्रूषणे तथा ।
आचार्यगुरुशुश्रूषास्वनु[२]क्रोशानुकम्पने ॥
एतत्सर्वमशेषेण पितामह यथातथम् ।
वेत्तुमिच्छामि धर्मज्ञ परं कौतूहलं हि मे ॥

भीष्म उवाच ।

यो व्रतं वै यथोद्दिष्टं तथा संप्रतिप[३]द्यते ।
अखण्डं सम्यगारभ्य तस्य लोकाः सनातनाः ॥
नियमानां फलं राजन्प्रत्यक्षमिह दृश्यते ।
नियमानां क्रतूनां च त्वयावाप्तमिदं फलम् ॥
स्वधीतस्यापि च फलं दृश्यते ऽमुत्र चेह च ।
इह लोके ऽथ वा नित्यं ब्रह्मलोके च मोदते ॥
दमस्य तु फलं राजञ्छृणु त्वं विस्तरेण मे ।
दान्ताः सर्वत्र सुखिनो दान्ताः सर्वत्र निर्वृताः ॥
यत्रेच्छागामिनो दान्ताः सर्वशत्रुनिषूदनाः ।
प्रार्थयन्ति च यद्दान्ता लभन्ते तन्न संशयः ॥

१ शास्त्रम् । २ दयायामुपकारे च । ३ करोति ।

युज्यन्ते सर्वकामैर्हि दान्ताः सर्वत्र पाण्डव ।
स्वर्गे यथा प्रमोदन्ते तपसा विक्रमेण च ॥
दानैर्यज्ञैश्च विविधैस्तथा दान्ताः क्षमान्विताः ।
दानाद्दमो विशिष्टो हि ददत्किं चिद् द्विजातये ॥
दाता कुप्यति नो दान्तस्तस्माद्दानात्परं दमः ।
यस्तु दद्यादकुप्यन्हि तस्य लोकाः सनातनाः ॥
क्रोधो हन्ति हि यद्दानं तस्माद्दानात्परं दमः ।
अदृश्यानि महाराज स्थानान्ययुतशो दिवि ॥
ऋषीणां सर्वलोकेषु यानि ते यान्ति देवताः ।
दमेन यानि नृपते गच्छन्ति परमर्षयः ॥
कामयाना महत्स्थानं तस्माद्दानात्परं दमः ।
अध्यापकः परिक्लेशादक्षयं फलमश्नुते ॥
विधिवत्पावकं हुत्वा ब्रह्मलोके नराधिप ।
अधीत्यापि हि यो वेदान्न्यायविद्भ्यः प्रयच्छति ॥
गुरुकर्मप्रशंसी तु सोपि स्वर्गे महीयते ।
क्षत्रियोऽध्ययने युक्तो यजने दानकर्मणि ॥
युद्धे यश्च परित्राता सोऽपि स्वर्गे महीयते ।
वैश्यः स्वकर्मनिरतः प्रदानाल्लभते महत् ॥
शूद्रः स्वकर्मनिरतः स्वर्गं शुश्रूषयर्च्छति ।
शूरा बहुविधाः प्रोक्तास्तेषामर्थांस्तु मे शृणु ॥
शूरान्वयानां निर्दिष्टं फलं शूरस्य चैव हि ।
यज्ञशूरा दमे शूराः सत्यशूरास्तथापरे ॥
युद्धशूरास्तथैवोक्ता दानशूराश्च मानवाः ।
सांख्यशूराश्च बहवो योगशूरास्तथापरे ॥

अरण्ये गृहवासे च त्यागे शूरास्तथापरे ।
आर्जवे च तथा शूराः शमे वर्त्तन्ति मानवाः ॥
तैस्तैश्च नियमैः शूरा बहवः सन्ति चापरे ।
वेदाध्ययनशूराश्च शूराश्चाध्यापने रताः ॥
गुरुशुश्रूषया शूराः पितृशुश्रूषयापरे ।
मातृशुश्रूषया शूरा भैक्ष्यशूरास्तथापरे ॥
अरण्ये गृहवासे च शूराश्चातिथिपूजने ।
सर्वे यान्ति परांल्लोकान्स्वकर्मफलनिर्जितान् ॥
धारणं सर्ववेदानां सर्वतीर्थावगाहनम् ।
सत्यं च ब्रुवतो नित्यं समं वा स्यान्न वा समम् ॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
सत्येन सूर्यस्तपति सत्येनाग्निः प्रदीप्यते ।
सत्येन मरुतो वान्ति सर्वं सत्ये प्रतिष्ठितम् ॥
सत्येन देवाः प्रीयन्ते पितरो ब्राह्मणास्तथा ।
सत्यमाहुः परो धर्मस्तस्मात्सत्यं न लङ्घयेत् ॥
मुनयः सत्यनिरता मुनयः सत्यविक्रमाः ।
मुनयः सत्यशपथास्तस्मात्सत्यं विशिष्यते ॥
सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ ।
दमः सत्यफलावाप्तिरुक्ता सर्वात्मना मया ॥
असंशयं विनीतात्मा स वै स्वर्गे महीयते ।
ब्रह्मचर्यस्य च गुणं शृणु त्वं वसुधाधिप ॥
आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किं चिदप्राप्यमिति विद्धि नराधिप ॥

बह्व्यः कोट्यस्त्वृषीणां तु ब्रह्मलोके वसन्त्युत ।
सत्ये रतानां सततं दान्तानामूर्ध्वरेतसाम् ॥
ब्रह्मचर्यं दहेद्राजन् सर्वपापान्युपासितम् ।
ब्राह्मणेन विशेषेण ब्राह्मणो ह्यग्निरुच्यते ॥
प्रत्यक्षं हि तथा ह्येतद्ब्राह्मणेषु तपस्विषु ।
बिभेति हि यथा शक्रो ब्रह्मचारिप्रधर्षितः ॥
तद्ब्रह्मचर्यस्य फलमृषीणामिह दृश्यते ।
मातापित्रोः पूजने यो धर्मस्तमपि मे शृणु ॥
शुश्रूषते यः पितरं न चासूयेत्कदा चन ।
मातरं भ्रातरं वापि गुरुमाचार्यमेव च ॥
तस्य राजन्फलं विद्धि स्वर्लोके स्थानमर्चितम् ।
न च पश्येत नरकं गुरुशुश्रूषयात्मवान् ॥

इति सन्दर्भेण दमस्य सर्वार्थसाधनत्वं दानापेक्षया ऽऽधिक्यं च दर्शितम् । अध्यापनाग्निहोत्रयोः स्वर्गसाधनत्वं च । सत्यस्य च सकलजगत्स्थितिप्रयोजनत्वं प्रधानसूर्यादिप्रकाशनादिकार्यनिर्वहणमुखेन परमत्वं व्यवस्थापितम् । ब्रह्मचर्यस्य चोपासितस्य निखिलपापनाशकत्वं देवताभ्यो ऽप्युत्कर्षाधायकत्वं च शक्रादीनामपि भीतिसंपादकत्वद्वारा निरूपितम् । गुरुशूश्रूषायाश्च स्वर्गसाधनत्वं नरकनाशकत्वं च प्रकाशितम् ।

धर्मे वर्त्तमानस्य स्वर्गे निश्चिते धार्मिकस्य यावत्कालं यशः पृथिव्यां दिवि वा गीयते तावदसौ स्वर्गे तिष्ठत्यन्यथा पततीतीन्द्रद्युम्नाख्यानेन स्पष्टम् ।

वैशम्पायन उवाच * ।

मार्कण्डेयमृषयः पाण्डवाः पर्यपृच्छन्नस्ति कश्चिद्भवतश्चिरजाततर इति । स तानुवाचास्ति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीणपुण्यस्त्रिदिवा-

* वनपर्वणि अष्टनवत्युत्तरशततमाध्यायो ऽयं तथैवोद्धृतः ।

त्मच्युतः कीर्त्तिस्ते व्युच्छिन्नेति स मामुपातिष्ठदथ प्रत्यभिजानाति मां भवानिति । तमहमब्रुवं कार्यचेष्टाकुलत्वान्न वयं वासार्यनिका ग्रामैकरात्रवासिनो न प्रत्यभिजानीमो ऽप्यात्मनो ऽर्थानामनुष्ठानं न शरीरोपतापेनात्मनः समारभामो ऽर्थानामनुष्ठानम् । अस्ति खलु हिमवति प्राकारकर्णो नामोलूकः प्रतिवसति । स मत्तश्चिरजातो भवन्तं यदि जानीयादितः प्रकृष्टे चाध्वनि हिमवांस्तत्रासौ प्रतिवसतीति । ततः स मामश्वो भूत्वा तत्रावहद्यत्र बभूवोलूकः । अथैनं स राजा पप्रच्छ प्रतिजानाति मां भवानिति । स मुहूर्त्तमिव ध्यात्वा ऽब्रवीदेनं नाभिजानामि भवन्तमिति । स एव मुक्त इन्द्रद्युम्नः पुनस्तमुलूकमब्रवीद्राजर्षिः । अथास्ति कश्चिद्भवतः सकाशाच्चिरजात इति स एवमुक्तोऽब्रवीदस्ति खल्विन्द्रद्युम्नं नाम सरस्तस्मिन्नाडीजङ्घो नाम बकः प्रतिवसति सो ऽस्मत्तश्चिरजाततरस्तं पृच्छेति तत इन्द्रद्युम्नो मां चोलूकमादाय तत्सरो ऽगच्छद्यत्रासौ नाडीजङ्घो नाम बको बभूव । सोऽस्माभिः पृष्टो भवानिममिन्द्रद्युम्नं राजानमभिजानातीति । स एष मुहूर्त्तं ध्यात्वा ऽब्रवीन्नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति । ततः सो ऽस्माभिः पृष्टः कश्चिद्भवतो ऽन्यश्चिरजाततरोऽस्तीति स नो ऽब्रवीदस्ति खल्वस्मिन्नेव सरस्यकूपारो नाम कच्छपः प्रतिवसति । स मत्तश्चिरजाततरः स यदि कथं चिदभिजानीयादिमं राजानं तमकूपारं पृच्छध्वमिति । ततः स बकस्त्वकूपारं कच्छपं विज्ञापयामास । अस्त्यस्माकमभिप्रेतं भवन्तं कं चिदर्थं प्रष्टुं साध्वागम्यतां तावदिति । तच्छ्रुत्वा कच्छपस्तस्मात्सरस उत्थायाभ्यगच्छद्यत्र तिष्ठामो वयं तस्य सरसस्तीरे । आगतं चैनं वयमपृच्छाम । भवानिन्द्रद्युम्नं राजानमभिजानाति । स मुहूर्त्तं ध्यात्वा बाष्पसंपूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत् । किमहमेनं न प्रत्यभिज्ञास्यामि । इह ह्यनेकसहस्रकृत्वश्चितिषु यूपा आहिताः । सरश्चेदमस्य दक्षिणाभिर्दत्ताभिर्गोभिरतिक्रममाणाभिः कृतमत्र चाहं प्रतिवसामीति । अथैतत्सकलं कच्छपेनोदाहृतं श्रुत्वा तदनन्तरं देवलोकाद्दिव्यरथः प्रादुरासीत् । वाचश्चाश्रूयन्त इन्द्रद्युम्नं प्रति प्रस्तुतस्ते स्वर्गो यथोचितं स्थानं प्रतिपद्यस्व कीर्त्तिमानस्यव्यग्रो याहीति । भवन्ति चात्र श्लोकाः ।

दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः ।
यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥
अकीर्त्तिः कीर्त्यते लोके यस्य भूतस्य कस्य चित् ।
स पतत्यधमांल्लोकान्यावच्छब्दः प्रकीर्त्यते ॥
तस्मात्कल्याणवृत्तःस्यादनन्ताय नरः सदा ।
विहाय वित्तं पापिष्ठं धर्ममेव समाश्रयेत् ॥ इति ।

अत एव युधिष्ठिरं प्रति धर्मेण यशसः स्वतनुत्वमुक्तम् । वनप॰ अ॰ ३१४

यशः सत्यं दमः शौचं मार्दवं ह्रीरचापलम् ।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम‍ेति ॥ ८ ।

दानस्य धर्मतनुत्वं च दानधर्मप्रकरणपर्यालोचनेन स्पष्टमेव । किंचित्तु निबध्यते ।

नन्दिपुराणे ।

दानं परं प्रशंसन्ति दानमेव परायणम् ।
दानं बन्धुर्मनुष्याणां दानं कोशो ह्यनुत्तमः ॥
दानं पुत्रः परं द्रव्यं दानं माता पिता तथा ।
न दानेन विना किं चित्प्रार्थितं फलमाप्यते ॥
अपि वालाग्रमात्रस्य तुला तस्य न विद्यते ।
न दानशीलिनामापत्तस्माद्दानं समाश्रयेत् ॥
हारनूपुरसंघोषपूरितोत्तममन्दिरा ।
लावण्यगुणसंपत्तिर्दानादेव हि लभ्यते ॥

सौरपुराणे ।

न दानादधिकं किंचिद्दृश्यते भुवनत्रये ।
दानेन प्राप्यते स्वर्गः श्रीर्द्दानेनैव लभ्यते ॥

दानेन शत्रून् जयति व्याधिर्दानेन नश्यति ।
दानेन लभ्यते विद्या दानेन युवतीजनः ॥
धर्मार्थकाममोक्षाणां साधनं परमं स्मृतम् ।

उशनाः ।

दानादृते नोपचारो विद्यते धनिनोऽपरः ।
दीयमानं हि तत्तस्य भूय एवाभिवर्द्धते ॥

वेदव्यासः ।

यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥
यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥

बृहस्पतिः ।

तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्मृतम् ।
द्वापरे चाध्वराः प्रोक्ताः कलौ दानं दया दमः ॥
दानेन योगी भवति मेधावी वृद्धसेवया ।
अहिंसया च दीर्घायुरिति प्राहुर्मनीषिणः ॥

यमः ।

यतीनां परमो धर्मस्त्वनाहारो वनौकसाम् ।
दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् ॥
पापकर्मसमायुक्तं पतन्तं नरके नरम् ।
त्रायते दानमेकं तु पात्रभूते द्विजे कृतम् ॥
न्यायेनार्जनमर्थानां वर्धनं चाभिरक्षणम् ।
सत्पात्रप्रतिपत्तिश्च सर्वशास्त्रेषु पठ्यते ॥

महाभारते ।

आयासशतलब्धस्य प्राणेभ्यो ऽपि गरीयसः ।
गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥
ब्राह्मणायाभिरूपाय यो दद्यादर्थमर्थिने ।
निदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः ॥

व्यासः ।

अहन्यहनि याचन्तमहं मन्ये गुरुं यथा ।
मार्जनं दर्पणस्येव यः करोति दिने दिने ॥
किं धनेन करिष्यन्ति देहिनो भङ्गुराश्रयाः ।
यदर्थं धनमिच्छन्ति तच्छरीरमशाश्वतम् ॥
यदि नाम न धर्माय न कामाय न कीर्तये ।
यत्परित्यज्य गन्तव्यं तद्धनं किं न दीयते ॥
स्वल्पं स्वल्पतरं वापि ग्रासं ग्रासार्द्धमेववा ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
अदाता पुरुषस्त्यागी धनं संत्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोप्यर्थं न मुञ्चति ॥

मनुः ।

दानं धर्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः ॥

इष्टौ यज्ञे यद्दीयते दक्षिणादि तद्दानमैष्टिकम् । बहिर्वेदि च यद्दानं तत्पौर्त्तिकम् ।

स्वर्गायुर्भूतिकामेन तथा पापोपशान्तये ।
मुमुक्षुणा च दातव्यं ब्राह्मणेभ्यो युधिष्ठिर ॥

याज्ञवल्क्यः ।

दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः ॥

मार्कण्डेयः ।

कुटुम्बं पीडयित्वापि ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवेऽप्यन्नमात्मनो भूतिमिच्छता ॥

अगस्त्यः ।

गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः ।
अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यते मही ॥
येन भुक्तं न च हुतं सुतीर्थे मज्जनं कृतम् ।
हिरण्यमन्नमुदकं ब्राह्मणेभ्यो न चार्पितम् ॥
दीना विवसना रूक्षाः कपालाङ्कितपाणयः ।
दृश्यन्ते ते महाराज जायमानाः पुनः पुनः ॥

विष्णुधर्मे ।

सीदते द्विजमुख्याय योऽर्थिने न प्रच्छयति ।
सामर्थ्ये सति दुर्बुद्धिर्नरकायोपपद्यते ॥

कूर्मपुराणे ।

यस्तु द्रव्यार्जनं कृत्वा नार्चयेद् ब्राह्मणान् सुरान् ।
सर्वस्वमपहृत्यैनं राजा राष्ट्रात्प्रवासयेत् ॥

व्यासः ।

अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा ।
तदिदं देहि देहीति विपरीतमुपस्थितम् ॥

स्कन्दपुराणे ।

बोधयन्ति न याचन्ते देहीति कृपणं नरः ।
अवस्थेयमदानस्य मा भूदेवं भवानपि ॥
देहीत्येवं ब्रुवन्नर्थी जनं बोधयतीव सः ।
यदिदं कष्टमर्थित्वं प्रागदानफलं हि तत् ॥
दीयमानं तु यो मोहाद् गोविप्राग्निनरेषु च ।
निवारयति पापात्मा तिर्यग्योनिं व्रजेत्तु सः ॥

महाभारते ।

अर्हतामनुरूपाणां नादेयं चास्ति किं चन ।
उच्चैःश्रवसमप्यश्वं प्रापणीयं सतां विदुः ॥

अथ दानस्वरूपम् । तत्र देवलः ।

अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यते ॥
द्विहेतु षडधिष्ठानं षडङ्गं षड्विपाकयुक् ।
चतुष्प्रकारं त्रिविधं त्रिनाशं दानमुच्यते ॥

द्विहेतुत्वं च ।

नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम् ।
श्रद्धा भक्तिश्च दानानां वृद्धिक्षयकरे स्मृते इति ॥

षडधिष्ठानत्वं च ।

धर्ममर्थं च कामं च व्रीडाहर्षभयानि च ।
अधिष्ठानानि दानानां षडेतानि प्रचक्षते ॥
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं त्यागबुद्ध्या यद्धर्मदानं तदुच्यते ॥
प्रयोजनमपेक्ष्यैव प्रसङ्गाद्यत्प्रदीयते ।

अनर्हेषु च रागेषु कामदानं तदुच्यते ॥
संसदि व्रीडया स्तुत्या चार्थार्थिभ्यः प्रयाचितः ।
प्रदीयते च यद्दानं व्रीडादानमिति स्मृतम् ॥
दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवद्यत्प्रदीयते ।
हर्षदानमिति प्राहुर्दानं तद्धर्मचिन्तकाः ॥
आक्रोशनार्थं हिंस्राणां प्रतीकाराय यद्भवेत् ।
दीयते तापकर्तृभ्यो भयदानं तदुच्यते । इति ॥

षडङ्गत्वं च ।

दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥

दाता च ।

अपापरोगी धर्मात्मा दित्सुरव्यसनः शुचिः ।
अनिन्द्याजीवकर्मा च षड्भिर्दाता प्रशस्यते ॥
त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः ।

प्रतिग्रहीतेति शेषः ।

सौमुख्याद्यभिसंप्रीतिरर्थिनां दर्शने सदा ॥
सत्कृतिश्चानसूया च सदा श्रद्धेति कीर्त्यते ।
अनापराधमक्लेशं स्वयं तेनार्जितं धनम् ॥
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ।
यत्र यद्दुर्लभं भद्रं यस्मिन्कालेपि वा पुनः ॥
दानार्हौ देशकालौ तौ श्रेष्ठौ स्यातां न चान्यथा ।
अवस्था देशकालानां पात्रदात्रोश्च संपदा ॥
हीनं वापि भवेत् श्रेष्ठं श्रेष्ठं वाप्यन्यथा भवेत् ।

षड्विपाकत्वं च।

दुष्फलं निष्फलं हीनं तुल्यं विपुलमक्षयम्।
षड्विपाकं समुद्दिष्टं षडेतानि विपाकतः॥ इति।

तथा हि।

नास्तिकस्तेनहिंस्रेभ्यो जाराय पतिताय च।
पिशुनभ्रूणहन्तृभ्यः प्रदत्तं दुष्फलं भवेत्॥
महदप्यफलं दानं श्रद्धया परिवर्जितम्।
परबाधाकरं दानं परमप्यूनतां व्रजेत्॥
यथोक्तमिति यद्दत्तं चित्तेन कलुषेण तु।
तत्तु संकल्पदोषेण दानं तुल्यफलं भवेत्॥
युक्ताङ्गैः सकलैः षड्भिर्दानं स्याद्विपुलोदयम्।
अनुक्रोशवशाद्दत्तं दानमक्षयतां व्रजेत्॥

अथ पात्रस्वरूपम्। भविष्यपुराणे।

क्षान्तिः स्पृहा दया सत्यं दानं शीलं तपः श्रुतम्।
एतदष्टाङ्गमुद्दिष्टं परमं पात्रलक्षणम्॥

स्पृहा च प्रकृतदीयमानद्रव्यविषयिणी। अन्यथा दानस्यैवासंभवाच्च तु लोभरूपा। तस्या अकार्पण्यास्पृहत्वं चेत्यनेन हानएव धर्मत्वाभिधानात्।

महाभारते।

साङ्गांस्तु चतुरो वेदान् योधीते वै द्विजर्षभः।
षड्भ्यो निवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः॥

उत्तमतमं पात्रमित्यर्थः।

याज्ञवल्क्योपि।

न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम्॥

पात्रविशेषेण फलविशेषश्च ।

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
सहस्रगुणमाचार्ये अनन्तं वेदपारगे ॥ इति वचनाद् ॥
शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतम् ।
क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतम् ॥
श्रोत्रिये चैव साहस्रमाचार्ये द्विगुणं ततः ।
आत्मने शतसाहस्रमनन्तं वेदपारगे ॥

इति बृहस्पतिवचनाच्च ।

वृथा जन्मानि चत्वारि वृथा दानानि षोडश ।
वृथा जन्म ह्यपुत्रस्य ये च धर्मबहिष्कृताः ॥
परपाकेषु येऽश्नन्ति आत्मार्थं तु पचेत्तु यः ।
पर्यश्नन्ति वृथा यच्च तदसत्यं प्रकीर्त्तितम् ॥
आरूढपतिते दत्तमन्यायोपहृतं च यत् ।
व्यर्थं तु पतिते दानं ब्राह्मणेतरके तथा ॥
गुरौ चानृतिके पापे कृतघ्ने ग्रामयाजके ।
वेदविक्रयिणे दत्तं तथा वृषलयाजके ॥
ब्रह्मबन्धुषु यद्दत्तं यद्दत्तं वृषलीपतौ ।
स्त्रीजनेषु च यद्दत्तं व्यालग्राहे तथैव च ॥
परिचारकेषु यद्दत्तं वृथा दानानि षोडश ।
तमोवृतस्तु यो दद्याद्भयात्क्रोधात्तथैव च ॥
भुङ्क्ते च दानं तत्सर्वं गर्भस्थस्तु नरः सदा ।
ददद्दानं द्विजातिभ्यो वृद्धभावेन मानवः ॥
तस्मात्सर्वास्ववस्थासु सर्वदानानि पार्थिव ।
दातव्यानि द्विजातिभ्यः स्वर्गमार्गजिगीषया ॥ इति ।

अत्रेदं बोध्यम् । पूर्वोदाहृतेषु फलाधिक्यबोधकेषु वचनेषु शूद्रादीनां पात्रत्वकथनमन्नदानविषयम् । तद्व्यतिरिक्तविषये चापात्रत्वकथनम् ।

सर्वेषामेव दानानामन्नदानं विशिष्यते ।
अन्नदानात्परं दानं भूतं न न भविष्यति ॥
नात्र पात्रपरीक्षा स्यान्न कालनियमस्तथा ।
न च देशः परीक्ष्योऽत्र देयमन्नं सदैव तत् ॥
श्वभ्यश्च श्वपचेभ्यश्च पतितेभ्यस्तथैव च ।
कृमिकीटपतङ्गेभ्यो देयमन्नं सदैव तु ॥
अन्नं हि जीवितं लोके प्राणाश्चान्ननिबन्धनाः ।
अन्नदः प्राणदो लोके सर्वदश्च तथान्नदः ॥

इति मोक्षधर्मोत्तरात् ।

अन्नाद्भूतानि जायन्ते देवा ह्यन्नाद्यकाङ्क्षिणः ।
न तस्य पात्रादिविधिर्विना श्राद्धं प्रकीर्तितम् ॥

इति नन्दिपुराणाच्च ।

अन्ये चात्र बहवो गवादीनां दानविशेषास्तेषां फलविशेषाश्च विधयश्च महानिबन्धेषु विस्तरेण निरूपितास्तत एवावगन्तव्याः ।

सर्वस्य चास्य क्षमादेर्धर्मस्य राजदण्डभयाद्दम्भाद्वाऽऽचर्यमाणस्य नास्ति परलोकसाधनता । यथाऽऽह मनुः ।

धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः ।
बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः ॥
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः ॥
ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः ।
ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥ इति ।

अत एव भावस्यैव सर्वधर्मनिदानत्वमुक्तं युधिष्ठिरं प्रति मार्कण्डेयेन । वनप॰ अ॰ २०६

प्राकारैश्च पुरद्वारैः प्रासादैश्च पृथग्विधैः ।
नगराणि न शोभन्ते हीनानि ब्राह्मणोत्तमैः ॥ ६० ॥
वेदाढ्या वृत्तसंपन्ना ज्ञानवन्तस्तपस्विनः ।
यत्र तिष्ठन्ति वै विप्रास्तन्नाम नगरं नृप ॥
व्रजे वाप्यथ वारण्ये यत्र सन्ति बहुश्रुताः ।
तत्तन्नगरमित्याहुः पार्थ तीर्थं च तद्भवेत् ॥
रक्षितारं च राजानं ब्राह्मणं च तपस्विनम् ।
अभिगम्याभिपूज्याथ सद्यः पापात्प्रमुच्यते ॥
पुण्यतीर्थाभिषेकं च पवित्राणां च कीर्तनम् ।
सद्भिः संभाषणं चैव प्रशस्तं कीर्त्यते बुधैः ॥
साधुसंगमपूतेन वाक्सुभाषितवारिणा ।
पवित्रीकृतमात्मानं सन्तो मन्यन्ति नित्यशः ॥
त्रिदण्डधारणं मौनं जटाभारोऽथ मुण्डनम् ।
वल्कलाजिनसंवेष्टं व्रतचर्याऽभिषेचनम् ॥
अग्निहोत्रं वने वासः शरीरपरिशोषणम् ।
सर्वाण्येतानि मिथ्या स्युर्यदि भावो न निर्मलः ॥
न दुष्करमनाशित्वं सुकरं ह्यशनं विना ।
विशुद्धिश्चक्षुरादीनां षण्णामिन्द्रियगामिनाम् ॥
विकारि तेषां राजेन्द्र सुदुष्करतरं मनः ।
ये पापानि न कुर्वन्ति मनोवाक्कायकर्मभिः ॥
ते तपन्ति महात्मानो न शरीरस्य शोषणम् ।
न ज्ञातिभ्यो दया यस्य शुक्लदेहो विकल्मषः ॥

हिंसा सा तपसस्तस्य नानाशित्वं तपः स्मृतम्।
आत्मानं विन्दते येन सर्वभूतगुहाशयम्॥
श्लोकेन यदि वा ऽर्धेन क्षीणं तस्य प्रयोजनम्।
ह्यक्षरादभिसंधाय के चिच्छ्लोकपदाङ्कितैः॥
शतैरन्यैः सहस्रैश्च प्रत्ययो मोक्षलक्षणम्।
नायं लोको ऽस्ति न परो न सुखं संशयात्मनः॥
ऊचुर्ज्ञानविदो वृद्धाः प्रत्ययो मोक्षलक्षणम्।
विहितार्थस्तु वेदानां परिवेद प्रयोजनम्॥
उद्विजेत्स तु वेदेभ्यो दावाग्नेरिव मानवः।
शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिं स्मृतिम्। इति॥

अतश्च मनसा संकल्पितस्यैव क्षमादेः सुखसाधनत्वमिति सर्वधर्माणां धर्मत्वस्य संपादकं शीलमेवेति पर्यवस्यति। यथा हि विवधभूषणभूषिता सुरूपा ऽपि वनिता चेद् व्यभिचारिणी सा न पतिं सुखाकरोति तथा विद्वानपि धनिको ऽपि पुरुषश्चेच्छीलविहीनस्त्याज्य एव स्याद्बुद्धिमताम्। अत एव मनुः।

गायत्रीमात्रसारो ऽपि वरं विप्रः सुयन्त्रितः।
नायन्त्रितस्त्रिवेदो ऽपि सर्वाशी सर्वविक्रयी॥ इत्याह।

मुनीनामप्याचारस्य शीलानुगुणस्यैव धर्मप्रमापकत्वमिति दर्शयति स एव।

वेदो ऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति॥

अत्र च शीलस्य स्मृत्या समं पाठादाचारस्य पृथगुपादानाच्च तस्याचारापेक्षया प्राबल्यं स्मृतितौल्यं च स्वरसतः प्रतीयते। तच्च शीलं सद्वृत्तरूपम्। शीलं स्वभावे सद्वृत्तइति कोशात्। तच्च हारीतेन प्रदर्शि-

तम् । ब्रह्मण्यता देवपितृभक्तता सौम्यता ऽपरोपतापिता ऽनसूयता मृदुता ऽपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलमिति । अस्य च प्राधान्यमैहिकामुष्मिकसकलसुखसाधनत्वं च । उ० अ० ३४ ।

जिता सभा वस्त्रवता मिष्टाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ४७ ॥

शीलं प्रधानं पुरुषे तद्यस्येह विनश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥ ४८ ॥

इति वदता विदुरेण दर्शितम् ।

एवं शीलस्यैव कुलोत्कर्षाधायकत्वं न तु धनादेरिति स एवाह । उ० अ० ३६ ।

येषां न वृत्तं व्यथते न योनिश्चित्तप्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां त्यक्तानृतास्तानि महाकुलानि ॥ २४ ॥

कुलानि समुपेतानि गोभिः पुरुषतो ऽर्थतः ।
कुलसंख्यां न गच्छन्ति यानि हीनानि वृत्ततः ॥ २५ ॥

वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि ।
कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥ २६ ॥

वृत्तं यत्नेन संरक्ष्यं वित्तमेति च याति च ।
अक्षीणो वित्ततःक्षीणो वृत्ततस्तु हतो हतः ॥ इति ।

उ० अ० ३४ ।

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ३९ ॥ इति च ।

उ० अ० ३९

दुष्कुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्धीमान् स कुलीनशताद्वरः ॥ ४० ॥

इति वृत्तवत एव कुलीनादुत्कर्ष उद्घुष्यते ।
शास्त्राध्ययनस्यापि शीलमेव फलमित्याह । उ॰ अ॰ ॥ ३९ ॥

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतमिति ॥ ६६ ॥

युधिष्ठिरेणापि यक्षेण सह प्रश्नोत्तरं कुर्वता वनप॰ ३११ ।

राजन् कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा ।
ब्राह्मण्यं केन भवति प्रब्रूह्येतत्सुनिश्चितम् ॥ १०५ ॥

इति पृष्टेन ।

शृणु यक्ष कुलं तात न स्वाध्यायो न च श्रुतम् ।
कारणं हि द्विजत्वे च वृत्तमेव न संशयः ॥ १०६ ॥

वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।
अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ॥

पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥

इत्युत्तरयता वृत्तमेव ब्राह्मण्यसाधनमिति सिद्धान्तितम् ।
इदमेवोपपादयितुं प्रवर्तते भरद्वाजभृगुसंवादः । मोक्षधर्म अ॰१८७

भृगुरुवाच ।

असृजद्ब्राह्मणानेवं पूर्वं ब्रह्मा प्रजापतीन् ।
आत्मतेजोऽभिनिर्वृतान् भास्कराग्निसमप्रभान् ॥

ततः सत्यं च धर्मं च तपो ब्रह्म च शाश्वतम् ।
आचारं चैव शौचं च स्वर्गाय विदधे प्रभुः ॥

देवदानवगन्धर्वा दैत्यासुरमहोरगाः ।

यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।
ये चान्ये भूतसंघानां वर्णास्तांश्चापि निर्ममे ॥
ब्राह्मणानां सितो वर्णः क्षत्रियाणां च लोहितः ।
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥

भरद्वाज उवाच ।

चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभिद्यते ।
सर्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्वेषां नः प्रभवति कस्माद्वर्णो विभज्यते ॥
स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितम् ।
तनुः क्षरति सर्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसंख्येयाः स्थावराणां च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

भृगुरुवाच ।

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसाऽनृतप्रिया लुब्धाः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥
इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।

धर्मो यज्ञक्रिया तेषां नित्यं न प्रतिषिध्यते ॥
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ।
विहिता ब्रह्मणा पूर्वं लोभात्त्वज्ञानतां गताः ॥
ब्राह्मणा ब्रह्मतन्त्रस्थास्तपस्तेषां न नश्यति ।
ब्रह्म धारयतां नित्यं व्रतानि नियमास्तथा ॥
ब्रह्म चैव परं सृष्टं ये न जानन्ति तेऽद्विजाः ।
तेषां बहुविधास्त्वन्यास्तत्र तत्र हि जातयः ॥
पिशाचा राक्षसाः प्रेता विविधा म्लेच्छजातयः ।
प्रनष्टज्ञानविज्ञानाः स्वच्छन्दाचारचेष्टिताः ॥
प्रजा ब्राह्मणसंस्काराः स्वकर्मकृतनिश्चयाः ।
ऋषिभिः स्वेन तपसा सृज्यन्ते चापरे परैः ॥
आदिदेवसमुद्भूता ब्रह्ममूला ऽक्षया ऽव्यया ।
सा सृष्टिर्मानसी नाम धर्मतन्त्रपरायणा ॥

भरद्वाज उवाच ।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ।
वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर ॥

भृगुरुवाच ।

जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः ॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्रजं सेवते कर्म वेदाध्ययनसङ्गतः ।

दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
वणिज्या पशुरक्षा च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः ॥
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ इति ॥

अत्रेदं बोध्यम् । वेदसंस्कारादिविहीनस्य ब्राह्मणत्वाभावकथनं सत्यादिसंपन्नस्य शूद्रस्यापि ब्राह्मणत्वकथनं च ब्रह्म जानातीति ब्राह्मण इत्यर्थमनुसृत्य ब्रह्मज्ञानोपयोगियोग्यताप्राप्तिपरं मोक्षधर्मोपक्रमाद् ब्राह्मणत्वादेर्जातिरूपतायाः सकललोकतन्त्रप्रसिद्धत्वेन यावद्द्रव्यभावित्वावश्यकत्वाच्च वनपर्वणि १८० अध्याये सर्पयुधिष्ठिरसंवादेऽपि तथैव वेद्यं यच्चाव निर्दुःखमसुखं च नराधिपेति ब्रह्मविषयक प्रश्नसाहचर्यात् । ब्राह्मणो न हन्तव्यः ब्राह्मणाय दद्यादित्यादौ तु जातेरेव निमित्तत्वं ।

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते दशसाहस्रमनन्तं वेदपारगे ॥

इत्यादिवचनात् जातिमात्रब्राह्मणवधेऽपि ब्रह्महत्याप्रायश्चित्तोपदेशाच्च । वृत्तस्य तु जातिसामानाधिकरण्ये न दाने फलातिशयं प्रति वधे पातकातिशयं प्रति च प्रयोजकत्वमात्रमिति ।

एवं शीलस्य सकलधर्मादिनिदानत्वं शक्रप्रह्लादसंवादमुखेन प्रदर्शितम् । युधिष्ठिरेण शीलस्य सर्वोत्कृष्टतायां कारणं किमिति ।

इमे जना नरश्रेष्ठ प्रशंसन्ति सदा भुवि ।
धर्मस्य शीलमेवादौ ततो मे संशयो महान् ॥
यदि तच्छक्यमस्माभिर्ज्ञातुं धर्मभृतां वर ।
श्रोतुमिच्छामि तत्सर्वं यथैतदुपलभ्यते ॥

कथं तत्प्राप्यते शीलं श्रोतुमिच्छामि भारत।
किंलक्षणं च तत्प्रोक्तं ब्रूहि मे वदतां वर॥

इति पृष्टः शान्तनवो ऽवदत्। दुर्योधनं तप्यमानं युधिष्ठिरराज्यवृध्या किमिति संतप्यसे तवापि विपुलं वसु वर्तते इति पृच्छन् धृतराष्ट्रस्तेन च मदपेक्षया युधिष्ठिरस्य संपदधिकेति शोचामीत्युक्तः।

यदीच्छसि श्रियं तात यादृशी सा युधिष्ठिरे।
विशिष्टां वा नरव्याघ्र शीलवान्भव पुत्रक॥

इत्यभिधाय।

शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः।
न हि किं चिदसाध्यं वै लोके शीलवतां भवेत्॥
एकरात्रेण मान्धाता त्र्यहेण जनमेजयः।
सप्तरात्रेण नाभागः पृथिवीं प्रतिपेदिरे॥
एते हि पार्थिवाः सर्वे शीलवन्तो दयान्विताः।
अतस्तेषां गुणक्रीता वसुधा स्वयमागता॥

इति शीलं प्रशस्य।

कथं तत्प्राप्यते शीलं श्रोतुमिच्छामि भारत।
येन शीलेन तैः प्राप्ता क्षिप्रमेव वसुंधरा॥

इति पुनः पृच्छन्तं तमितिहासं वर्णयां बभूव। प्रह्लादेन हृतराज्यः शक्रो बृहस्पतिमुपातिष्ठत। तेन च नैश्रेयसज्ञानवर्णनपुरस्सरमेतावदेव श्रेय इत्युक्तः पुनर्विशेषं पप्रच्छ। तेनापि भार्गवो विशेषं वेत्तीति बोधितो भार्गवमासाद्य ततो ज्ञानमाप्याप्यतोऽपि विशेषः कोऽस्तीति पृष्टवान्। ततश्च तेनातोऽपि विशेषतो ज्ञानं प्रह्लादस्यास्तीत्युक्तो द्विजरूपेण प्रह्लादान्तिकमाजगाम। तं च शिष्यवत् परिचरन् श्रेयः साधनं किमिति पृष्ट्वा तेन सम्प्रति त्रैलोक्यरक्षाधिकृतस्य ममोपदेशावकाशो नास्तीति प्रत्याख्यातो ऽपि विविक्ते ऽवकाशे समुपचरन् प्रीतेन तेन किं पृच्छसि

पृच्छेत्यनुज्ञातस्त्वया त्रैलोक्यराज्यं कथं प्राप्तमित्यप्राक्षीत् । तेन च राजास्मीति गर्वेण विदुषो नासूयामि तेषां च वचांसि शृणोम्यनुतिष्ठामि चेति दत्तोत्तरः शुश्रूषमाणः प्रसीदता तेन वरं याचस्वेति अभिहितस्त्वयि स्थितं शीलं मम भूयादित्ययाचत । तेन च विस्मितेन सत्यपाशबद्धेन दत्ते शीले संतुष्टो दिवमयासीत् । गते चेन्द्रे प्रह्लादशरीरात्तेजोरूपे शीले निर्याते क्रमेण धर्मसत्यवृत्तबलानि निर्जग्मुः । ऊचुश्च वयं शीलाश्रया इत्यशीले न तिष्ठाम इति । ततश्च श्रीरपि निर्यान्ती कुतः प्रयासीति प्रह्लादेन पर्यनुक्ता ।

शीलेन हि त्रयो लोकास्त्वया धर्मज्ञ निर्जिताः ।
तद्विज्ञाय सुरेन्द्रेण तव शीलं हृतं प्रभो ॥
धर्मः सत्यं तथा वृत्तं बलं चैव तथाप्यहम् ।
शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः ॥

इत्यवोचदिति । अनेन च सन्दर्भेण सकलधर्मादिसाधनं शीलमेवेति विशदं पर्यवस्यति । अग्रे च कीदृशं शीलमिति पृष्टवन्तं दुर्योधनं प्रति ।

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते ॥
यदन्येषां हितं न स्यादात्मनः कर्म पौरुषम् ।
अपत्रपेत वा येन न तत्कुर्यात्कथं च न ॥
तत्तु कर्म तथा कुर्याद्येन श्लाघ्येत संसदि ।
शीलं समासेनैतत्ते कथितं कुरुसत्तम ॥ इति ॥

धृतराष्ट्रः शीलस्य संक्षेपतः स्वरूपमभिधाय दुःशीलैः प्राप्तापि श्रीराशु नश्यतीति ।

यद्यप्यशीला नृपते प्राप्नुवन्ति श्रियं क्व चित् ।
न भुञ्जते चिरं तात समूलाश्च न सन्ति ते ॥

इत्युपसंहृतवान् । अत एव युधिष्ठिरलोमशसंवादः युधिष्ठिर उवाच ।

न वै निर्गुणमात्मानं मन्ये देवर्षिसत्तम ।
तथास्मि दुःखसंतप्तो यथा नान्यो महीपतिः ॥ १ ॥
परांश्च निर्गुणान्मन्ये न च धर्मगतानपि ।
ते च लोमश लोकेऽस्मिन् वर्धन्ते केन हेतुना ॥ २ ॥

लोमश उवाच ।

नात्र दुःखं त्वया राजन्कार्यं पार्थ कथं चन ।
यदधर्मेण वर्धेयुरधर्मरुचयो जनाः ॥ ३ ॥
वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥ ४ ॥
मया हि दृष्टा दैतेया दानवाश्च महीपते ।
वर्द्धमाना ह्यधर्मेण क्षयं चोपगताः पुनः ॥ ५ ॥
पुरा देवयुगे चैव दृष्टं सर्वं मया विभो ।
अरोचयन्सुरा धर्मं धर्मं तत्यजिरेऽसुराः ॥ ६ ॥
तीर्थानि देवा विविशुर्नाविशन्भारतासुराः ।
तानधर्मकृतो दर्पः पूर्वमेव समाविशत् ॥ ७ ॥
दर्पान्मानः समभवन्मानात्क्रोधो ऽभ्यजायत ।
क्रोधादह्रीस्ततो लज्जा वृत्तं तेषां ततो ऽनशत् ॥ ८ ॥
तानलज्जान् गतह्रीकान् हीनवृत्तान्वृथाव्रतान् ।
क्षमा लक्ष्मीश्च धर्मश्च न चिरात्प्रजहुस्ततः ॥ ९ ॥
लक्ष्मीस्तु देवानगमदलक्ष्मीरसुरान्नृप ।
तानलक्ष्मीसमाविष्टान् दर्पोपहतचेतसः ॥ १० ॥

दैतेयान्दानवांश्चैव कलिरप्याविशत्ततः ।
तानलक्ष्मीसमाविष्टान् दानवान् कलिना हतान् ॥ ११ ॥
दर्पाभिभूतान्कौन्तेय क्रियाहीनानचेतसः ।
मानाभिभूतानचिराद्विनाशः समपद्यत ॥ १२ ॥
निर्यशस्कास्तथा दैत्याः कृत्स्नशो विलयं गताः ।
देवाश्च सागराश्चैव सरितश्च सरांसि च ॥ १३ ॥
अभ्यगच्छन्धर्मशीलाः पुण्यान्यायतनानि च ।
तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पाण्डव ॥ १४ ॥
प्रजहुः सर्वपापानि श्रेयश्च प्रतिपेदिरे ।
एवमादानवन्तश्च निरादानाश्च सर्वशः ॥ १५ ॥
तीर्थान्यगच्छन्विबुधास्तेनापुर्भूतिमुत्तमाम् ।
तथा त्वमपि राजेन्द्र स्नात्वा तीर्थेषु सानुजः ॥
पुनर्वेत्स्यसि तां लक्ष्मीमेष पन्थाः सनातनः ॥ इति ।

एतावता प्रबन्धेन सिद्धे शीलस्य धर्मसुखसाधनत्वे तत्स्वरूपे चाद्रोहः सर्वभूतेष्वित्यादिना संक्षेपतो ज्ञाते विशेषतो ज्ञानं शीलस्यावश्यकम् । इतरथा केन कर्मणा परदुःखोत्पादनं भवति केन वा परहितं विहन्यते केन वा सज्जनसंसदि निन्द्यते श्लाघ्यते वेति दुर्विज्ञानमल्पमतीनाम् । अतश्च शीलवत्तामात्मनि चिकीर्षुभिः किं कार्यं येन संपदायतनता स्यात्किमनुष्ठाय च विनश्येल्लक्ष्मीरिति बोधयितुं शक्रलक्ष्मीसंवादमुखेनोपदिदेश शान्तनवो युधिष्ठिरम् । पुरा किल लक्ष्मीर्धार्मिकेषु दैत्येषु वर्तमाना तेषु धर्मं जहत्सु तानपहाय शक्रसमीपमुपसरन्ती कीदृशेषु दैत्येषु पुरा त्वमवात्सीरिदानीं च कीदृग्विधास्ते यत्तांस्त्यक्तवत्यसीति महेन्द्रेण पृष्टा ।

स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च ।
स्वर्गमार्गाभिरामेषु सत्वेषु निरता ह्यहम् ॥

दानाध्ययनयज्ञेज्यापितृदैवतपूजनम् ।
गुरूणामतिथीनां च तेषां सत्यमवर्तत ॥
सुसंमृष्टगृहाश्चासन् जितस्त्रीका हुताग्नयः ।
गुरुशुश्रूषका दान्ता ब्रह्मण्याः सत्यवादिनः ॥
श्रद्दधाना जितक्रोधा दानशीलानसूयवः ।
भृतपुत्रा भृतामात्या भृतदारा ह्यनीर्षवः ॥
अमर्षेण न चान्योन्यं स्पृहयन्ते कदा चन ।
न च जातूपतप्यन्ति धीराः परसमृद्धिभिः ॥
दातारः संग्रहीतार आर्याः करुणवेदिनः ।
महाप्रसादा ऋजवो दृढभक्ता जितेन्द्रियाः ॥
संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः ।
यथार्हमानार्थकरा ह्रीनिषेवा यतव्रताः ॥
नित्यं पर्वसु सुस्नाताः स्वनुलिप्ताः स्वलंकृताः ।
उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ॥
नैतानभ्युदियात्सूर्यो न चाप्यासन् प्रगेशयाः ।
रात्रौ दधि च सक्तूंश्च नित्यमेव व्यसर्जयन् ॥
कल्यं घृतं चान्ववैक्षन्प्रयता ब्रह्मवादिनः ।
मङ्गल्यान्यपि चापश्यन् ब्राह्मणांश्चाप्यपूजयन् ॥
सदा हि वदतां धर्मं सदा चाप्रतिगृह्णताम् ।
अर्धं च रात्र्याः स्वपतां दिवा चास्वपतां तथा ॥
कृपणानाथवृद्धानां दुर्बलातुरयोषिताम् ।
दयां च संविभागं च नित्यमेवानुमोदताम् ॥
त्रस्तं विषण्णमुद्विग्नं भयार्तं व्याधितं कृशम् ।

हृतस्वं व्यसनार्ते च नित्यमाश्वासयन्ति ते ॥
धर्ममेवान्ववर्तन्त न हिंसन्ति परस्परम् ।
अनुकूलाश्च कार्येषु गुरुवृद्धोपसेविनः ॥
पितृदेवातिथींश्चैव यथावत्तेष्वपूजयन् ।
अवशेषाणि चाश्नन्ति नित्यं सत्यतपोधृताः ॥
नैकेऽश्नन्ति सुसंपन्नं न गच्छन्ति परस्त्रियः ।
सर्वभूतेष्ववर्तन्त यथात्मनि दयां प्रति ॥
नैवाकाशे न पशुषु वियोनौ न च पर्वसु ।
इन्द्रियस्य विसर्गं ते रोचयन्ति कदा च न ॥
नित्यं दानं तथा दाक्ष्यमार्जवं चैव नित्यदा ।
उत्साहो ऽथानहंकारः परमं सौहृदं क्षमा ॥
सत्यं दानं तपः शौचं कारुण्यं वागनिष्ठुरा ।
मित्रेषु चानभिद्रोहः सर्वं तेष्वभवत्प्रभो ॥
निद्रा तन्द्रीरसंप्रीतिरसूयाथानवेक्षिता ।
अरतिश्च विषादश्च स्पृहा चाप्यविशन्न तान् ॥
इति तेषां सुशीलतां स्वनिवासहेतुमभिधाय ।
ततः कालविपर्यासे तेषां गुणविपर्ययात् ॥
अपश्यं निर्गतं धर्मं कामक्रोधवशात्मनाम् ।
सभासदानां वृद्धानां सतां कथयतां कथाः ॥
प्राहसन्नभ्यसूयंश्च सर्ववृद्धान् गुणावराः ।
युवानश्च समासीना वृद्धानपि गतान्सतः ॥
नाभ्युत्थानाभिवादाभ्यां यथापूर्वमपूजयन् ।
वर्तयत्येव पितरि पुत्रः प्रभवते तथा ॥
अभृत्या भृत्यतां प्राप्य ख्यापयन्त्यनपत्रपाः ।

तथा धर्मादपेतेन कर्मणा गर्हितेन ये ॥
महतः प्राप्नुवन्त्यर्थांस्तेषां तत्राभवत्स्पृहा।
उच्चैश्चाभ्यवदन् रात्रौ नीचैस्तत्राग्निरज्वलत् ॥
पुत्राः पितॄनत्यचरन्नार्यश्चात्यचरन् पतीन्।
मातरं पितरं वृद्धमाचार्यमतिथिं गुरुम् ॥
गुरुत्वान्नाभ्यनन्दन्त कुमारान्नान्वपालयन्।
भिक्षां बलिमदत्त्वा च स्वयमन्नानि भुञ्जते ॥
अनिष्ट्वा संविभज्याथ पितृदेवातिथीन् गुरून्।
न शौचमन्वरुध्यन्त तेषां सूदजनास्तथा ॥
मनसा कर्मणा वाचा भक्ष्यमासीदनावृतम्।
विप्रकीर्णानि धान्यानि काकमूषिकभोजनम् ॥
अपावृतं पयोऽतिष्ठदुच्छिष्टाश्चास्पृशन् घृतम्।
कुद्दालं दातृपिटकं प्रकीर्णं कांस्यभाजनम् ॥
द्रव्योपकरणं सर्वं नान्ववैक्षत्कुटुम्बिनी।
प्राकारागारविध्वंसान्न स्म ते प्रतिकुर्वते ॥
नाद्रियन्ते पशून्बध्वा यवसेनोदकेन च।
बालानां प्रेक्षमाणानां स्वयं भक्ष्यमभक्षयन् ॥
तथा भृत्यजनं सर्वमसंतर्प्य च दानवाः।
पायसं कृसरं मांसमपूपानथ शष्कुलीः ॥
अपाचयन्नात्मनोऽर्थे वृथा मांसान्यभक्षयन्।
उत्सूर्यशायिनश्चासन् सर्वे चासन्प्रगेशयाः ॥
अवर्तन्कलहाश्चात्र दिवारात्रं गृहे गृहे।
अनार्याश्चार्यमासीनं पर्युपासन्न तत्र ह ॥

आश्रमस्थान् विधर्मस्थाः प्राद्विषन्त परस्परम् ।
संकराश्चाभ्यवर्तन्त न च शौचमवर्तत ॥
ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ।
निरन्तरविशेषास्ते बहुमानावमानयोः ॥
हारमाभरणं वेषं गतं स्थितमवेक्षितम् ।
असेवन्त भुजिष्या वै दुर्जनाचरितं विधिम् ॥
स्त्रियः पुरुषवेषेण पुंसः स्त्रीवेषधारिणः ।
क्रीडारतिविहारेषु परां मुदमवाप्नुवन् ॥
प्रभवद्भिः पुरा दायानर्हेभ्यः प्रतिपादितान् ।
नाभ्यवर्तन्त नास्तिक्याद्वर्तन्तः संभवेष्वपि ॥
मित्रेणाभ्यर्थितं मित्रमर्थसंशयिते क्व चित् ।
बालकोट्यग्रमात्रेण स्वार्थेनाघ्नत तद्वसु ॥
परस्वादानरुचयो विपण्व्यवहारिणः ।
अदृश्यन्तार्यवर्णेषु शूद्राश्चापि तपोधनाः ॥
अधीयते ऽव्रताः के चिद्वृथाव्रतमथापरे ।
अशुश्रूषुर्गुरोः शिष्यः कश्चिच्छिष्यसखो गुरुः ॥
पिता चैव जनित्री च श्रान्तौ वृत्तोत्सवाविव ।
अप्रभुत्वे स्थितौ वृद्धावन्नं प्रार्थयतः सुतान् ॥
तत्र वेदविदः प्राज्ञा गाम्भीर्ये सागरोपमाः ।
कृष्यादिष्वभवन्सक्ता मूर्खाः श्राद्धान्यभुञ्जत ॥
प्रातः प्रातश्च सुप्रश्नं कल्पनं प्रेषणक्रिया ।
शिष्या न प्रहितास्तेषामकुर्वन् गुरवः स्वयम् ॥
श्वश्रूश्वशुरयोरग्रे वधूः प्रेष्यानशासत ।

अन्वशासच्च भर्तारं समाहूयाभिजल्पति ।
प्रयत्नेनापि चारक्षच्छिन्नं पुत्रस्य वै पिता ॥
व्यभजच्चापि संरम्भाद्दुःखवासं तथावसत् ।
अग्निदाहेन चौरैर्वा राजभिर्वा हृतं धनम् ॥
दृष्ट्वा द्वेषात्प्राहसन्त सुहृत्संभाविता ह्यपि ।
कृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्षिणः ॥
अभक्ष्यभक्षणरता निर्मर्यादा हतत्विषः ।
तेष्वेवमादीनाचारानाचरत्सु विपर्यये ॥
नाहं देवेन्द्र वत्स्यामि दानवेष्विति मे मतिः ।
तन्मा स्वयमनुप्राप्तामभिनन्द शचीपते ॥

इत्यन्तेन तेषां स्ववैराग्यहेतुं दुराचारमभिधाय तान् परित्यज्य शक्रान्तिकं प्राप्ता शक्रेण प्रसादपूर्वकं परिगृहीतेति । अतश्च पूर्वप्रकरणपठितानामवश्यमनुष्ठानार्हता परत्र पठितानां सर्वथा त्यागयोग्यता स्पष्टमेव लभ्यते । अत एवैतादृशशीलवतां दुर्गेऽपि क्लेशाभावः प्रदर्शितः ।

युधिष्ठिर उवाच ।

क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः ।
दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः ।
वर्तन्ते संयतात्मानो दुर्गाण्यतितरन्ति ते ॥
प्रत्याहुर्नोच्यमाना ये न हिंसन्ति च हिंसिताः ।
प्रयच्छन्ति न याचन्ते दुर्गाण्यतितरन्ति ते ॥
वासयन्त्यतिथीन्नित्यं नित्यं ये चानसूयकाः ।
नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरन्ति ते ॥

मातापित्रोश्च ये वृत्तिं वर्तन्ते धर्मकोविदाः ।
वर्जयन्ति दिवा स्वप्नं दुर्गाण्यतितरन्ति ते ॥
ये वा पापं न कुर्वन्ति कर्मणा मनसा गिरा ।
निक्षिप्तदण्डा भूतेषु दुर्गा० ॥
ये न लोभान्नयन्त्यर्थान् राजानो रजसान्विताः ।
विषयान् परिरक्षन्ति दुर्गा० ॥
स्वेषु दारेषु वर्तन्ते न्यायवृत्तिमृतावृतौ ।
अग्निहोत्रपराः सन्तो दुर्गा० ॥
आहवेषु च ये शूरास्त्यक्त्वा मरणजं भयम् ।
धर्मेण जयमिच्छन्ति दुर्गाण्यतितरन्ति ते ॥
ये वदन्तीह सत्यानि प्राणत्यागेप्युपस्थिते ।
प्रमाणभूता भूतानां दुर्गा० ॥
कर्माण्यकुहकार्थानि येषां वाचश्च सूनृताः ।
येषामर्थाश्च संबद्धा दुर्गा० ॥
अनध्यायेषु ये विप्राः स्वाध्यायं नैव कुर्वते ।
तपोनिष्ठाः सुतपसो दुर्गा० ॥
ये तपश्च तपस्यन्ति कौमारब्रह्मचारिणः ।
विद्यावेदव्रतस्नाता दुर्गा० ॥
ये च संशान्तरजसः संशान्ततमसश्च ये ।
सत्वे स्थिता महात्मानो दुर्गा० ॥
येषां न कश्चित्त्रसति न त्रसन्ति हि कस्य चित् ।
येषामात्मसमो लोको दुर्गा० ॥
परश्रिया न तप्यन्ति ये सन्तः पुरुषर्षभाः ।
ग्राम्यादर्थान्निवृत्ताश्च दुर्गा० ॥

सर्वान्देवान्नमस्यन्ति सर्वधर्मांश्च शृण्वते ।
ये श्रद्दधानाः शान्ताश्च दुर्गा० ॥
ये न मानित्वमिच्छन्ति मानयन्ति च ये परान् ।
मान्यमानान्नमस्यन्ति दुर्गा० ॥
ये च श्राद्धानि कुर्वन्ति तिथ्यां तिथ्यां प्रजार्थिनः ।
सुविशुद्धेन मनसा दुर्गाण्यतितरन्ति ते ॥
ये क्रोधं संनियच्छन्ति क्रुद्धान् संशमयन्ति च ।
न च कुप्यन्ति भूतानां दुर्गाण्यतितरन्ति ते ॥
मधु मांसं च ये नित्यं वर्जयन्तीह मानवाः ।
जन्मप्रभृति मद्यं च दुर्गा० ॥
यात्रार्थं भोजनं येषां सन्तानार्थं च मैथुनम् ।
वाक्सत्यवचनार्थाय दुर्गा० ॥
ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययम् ।
भक्ता नारायणं देवं दुर्गाण्यतितरन्ति ते ॥
इति ग्रन्थेन ।

एवमस्य धृत्यादेर्धर्मकदम्बस्य शीलपर्यवसायिनो लोकेन नितरां प्रशस्यमानस्य स्वर्गसाधनस्य मोक्षफलकत्वमप्युक्तं गौतमेन । द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुत इत्युक्त्वा स एष बहुश्रुतो भवति वाकोवाक्येतिहासपुराणविदष्टचत्वारिंशता संस्कारैः संस्कृत इत्यभिधाय के तेऽष्टचत्वारिंशत्संस्कारा इत्यपेक्षायां गर्भाधानं पुंसवनमित्यादिचत्वारिंशत्संस्कारस्वरूपमभिधायाथाष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति मानसाष्टगुणानुक्त्वा यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणः सालोक्यं सायुज्यं च गच्छति यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सालोक्यं

सायुज्यं च गच्छति गच्छतीति वदता । तत्र दम्भेन क्रियमाणानामेषां धर्मत्वाभावो भगवता प्रदर्शितः ।

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

मिथ्यात्वं चाचारे फलासंपादकत्वेनैव । इन्द्रियार्थानित्युपलक्षणम् । यश्च दयादीन्स्वर्गसाधनत्वेन निश्चित्य सेवते तेषां स्वर्गोऽपि सुलभ एवोपदर्शितप्रमाणेभ्यः । यस्तु केवलं धर्मबुद्ध्या तज्जन्यफलमननुसंधायाचरति तस्य गीतमोक्तं मोक्षरूपं फलम् । अस्यैव च बुद्धिमत्त्वं प्रदर्शितं भगवता ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
यः सर्वत्रानभिष्वङ्गस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ इति ।

न चैतावता कर्ममात्रस्य हेयत्वमुक्तमिति भ्रमितव्यम् ।

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ इति ।

तेनैव ज्ञानिनोऽपि कर्मावश्यकत्वाभिधानात् । अन्ते च त्यागस्वरूपनिरूपणावसरे ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलासङ्गं प्राहुस्त्यागं विचक्षणाः ॥

इत्युक्त्वा ।

त्याज्यं कर्मवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः परिकीर्तितः ॥
यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ इति ।

स्वमतोपन्यासपूर्वकं ।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

इति कर्मत्यागं विनिन्द्य ।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥ इति ।

तत्फलाभिसन्धित्यागस्यैव प्रशंसनात् । कामक्रोधलोभानां च स्पष्टमेव पापहेतुतां भगवानेवाह ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ इति ।

अथ केन प्रयुक्तो ऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

इत्यर्जुनप्रश्ने ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।

इति प्रभृति ।

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

इत्यनेन च ग्रन्थेन । अत एव च दयादीनां दिव्यसंपत्त्वेन क्रोधादीनामसुरसंपत्त्वेन च परिगणनं स एव चकार ।

अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥
दम्भो दर्पो ऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीमिति ॥

तयोः फलं च तेनैव प्रकाशितम् ।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ॥ इति ।

बन्धमोक्षजनने क्रमश्च तेनैव दर्शितः ।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोभिजायते ॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥
रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ इति।

ईदृशदिव्यसंपत्संपन्नस्यैव च भगवत्प्रियत्वं भगवतैवोक्तम्।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयक्रोधैर्मुक्तो यः स च मे प्रियः॥
निरपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भफलत्यागी यो मद्भक्तः स मे प्रियः॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥
समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केन चित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥ इति।

एतेषामेव च फलानाकाङ्क्षया क्रियमाणानां सात्विकत्रिविधतपस्त्वमपि।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्विकं परिचक्षते ॥ इति ।

अहंकारकामक्रोधादित्यागेन च मुक्तिरित्याह ।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ इति ।

साम्यस्य चाक्षय्यसुखजनकतोक्ता ।

इहैव तैर्जितः स्वर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ इति ।

भगवत्प्रीतिप्रयोजकानामद्वेषादीनामेव मोक्षप्रयोजकज्ञानत्वमित्याह ।

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥
इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं ज्ञानतत्त्वार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ इति ।

एतादृशस्य ज्ञानस्य भगवद्भक्त्यैकलभ्यत्वं भक्तिस्वरूपं चाह स एव ।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ इति ।

इयं च भक्तिः सा परानुरक्तिरीश्वरइति शाण्डिल्येनाभिहिता । परानुरक्तिश्च परमेश्वरादभेदेनानुसंधानमिति न ज्ञानभक्तिशास्त्रयोर्विरोधः । अत एवोक्तं श्रीमद्भागवते ।

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैति त्रिक एककालः ॥ इति ।

ईदृशी च भक्तिः सकलपापनाशे सत्येव भवतीत्याह ।

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ इति ॥

अनयैव च मोक्षप्रतिबन्धकमायानिवृत्तिः । याऽविद्येति मिथ्यादृष्टिरिति प्रकृतिरिति च विविधै रूपैः शास्त्रकारैरुक्ता ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति ।

मूढानां भगवत्स्वरूपस्य यथार्थज्ञानं न भवतीत्याह ।

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् । इति ॥

तेषां च श्रद्धाविरहितानां संसारान्मुक्तिर्नास्तीत्याह ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारसागरे ॥ इति ।

श्रद्धालोश्च योग्यादपेक्षयाप्युत्कृष्टत्वमित्याह । अ० ६

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ इति ॥

दुराचारस्यापि भगवद्भक्तस्याचिरेण साधुत्वसम्पत्तिरित्याह । अ० ९

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० इति ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ इति ॥

भक्त्या दत्तस्याल्पस्यापि भगवत्प्रियत्वमित्याह । अ० ९

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ इति ॥

भगवत्प्राप्तावपुनरावृत्तिरूपो मोक्ष इति चाह । अ० ८

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य देहिनः ॥ १४ ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥
आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते । १६ इति ।

अस्यैव सकलधर्मेभ्य उत्तमत्वं व्यासशुकसंवादेन निश्चीयते । मोक्षधर्मे । अ० २४६

शुक उवाच ।

यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन ।
यो विशिष्टश्च धर्मेभ्यस्तं भवान् प्रब्रवीतु मे ॥

व्यास उवाच ।

धर्मं ते संप्रवक्ष्यामि पुराणमृषिभिः कृतम् ।
विशिष्टं सर्वधर्मेभ्यस्तमिहैकमनाः शृणु ॥

इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः ।
सर्वतो निष्पति[1]ष्णूनि पिता बालानिवात्मजान् ॥
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥
तानि सर्वाणि संधाय मनःषष्ठानि मेधया ।
आत्मतृप्त इवासीत बहु चिन्त्यमचिन्तयन् ॥
गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्म[2]नि ।
तदा त्वमात्मनात्मानं परं द्रक्ष्यसि शाश्वतम् ॥
सर्वात्मानं महात्मानं विधूममिव पावकम् ।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः ।
आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम् ॥
एवमात्मा न जानीते क्व गमिष्ये कुतस्त्वहम् ।
अन्यो ह्यात्माऽन्तरात्माऽस्ति यः सर्वमनुपश्यति ॥
ज्ञानदीपेन दीप्तेन पश्यत्यात्मानमात्मना ।
दृष्ट्वा त्वमात्मनात्मानं निरात्मा भव सर्ववित् ॥
विमुक्तः सर्वपापेभ्यो मुक्तत्वच इवोरगः ।
परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः ॥
सर्वतःस्रोतसं घोरां नदीं लोकप्रवाहिणीम् ।
पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसम् ॥
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् ।
सत्यतीर्थामृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥

१ प्रसरणशीलानि ।  २ अन्तरात्मनि ।

अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः ।
प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलाम् ॥
संसारसागरगमां योनिपातालदुस्तराम् ।
आत्मजन्मोद्भवां तात जिव्हावर्तां दुरासदाम् ॥
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः ।
तां तीर्णः सर्वतो मुक्तो विधूतात्मात्मविच्छुचिः ॥
उत्तमां बुद्धिमास्थाय ब्रह्मभूयान् भविष्यसि ।
संतीर्णः सर्वसंसारात् प्रसन्नात्मा विकल्मषः ॥
भूमिष्ठानीव भूतानि पर्वतस्थो निशामय ।
अक्रुध्यन्नप्रहृष्यंश्च न नृशंसमतिस्तथा ॥
ततो द्रक्ष्यसि सर्वेषां भूतानां प्रभवाप्ययौ ।
एवं वै सर्वभूतेभ्यो विशिष्टं मेनिरे बुधाः ॥
धर्मं धर्मभृतां श्रेष्ठा मुनयस्तत्त्वदर्शिनः ।
आत्मनो व्यापिनो ज्ञानमिदं पुत्रानुशासनम् ॥
प्रयताय प्रवक्तव्यं हितायानुगताय च ।
आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत् ॥
अब्रुवं यदहं तात आत्मसाक्षिकमञ्जसा ।
नैव स्त्री न पुमानेतन्नैव चेदं नपुंसकम् ।
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकम् ॥
नैतज्ज्ञात्वा पुमान् स्त्री वा पुनर्भवमवाप्नुते ।
अभवप्रतिपत्यर्थमेतद्धर्मं विधीयते । इति ॥

इत्थं च धृत्यादिधर्माणां चित्तशुद्ध्येकनिदानभूतानामिह लौकिक-कीर्त्तिविश्वास्यतादिसाधनतया पारलौकिकस्वर्गादिसाधनतया च भगवत्प्रीतिप्रयोजकतया च सर्वैरेव कृतदृढतरतदाश्रयणैर्यथायथं स्वर्गप्रभृति-

मोक्षावधिफलप्राप्तिस्पृहयालुभिरासादिताभिलषितैर्भूयतइति तइमे धर्मा अवश्यमाश्रयणीया निरसनीयाश्च कामादयो वैरिणः परपदप्राप्तेराश्रित्य चेमान् धर्मान् क्रमेण त्यक्ततज्जन्यफलाभिलाषैः

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।

इति भगवद्वचने विश्वस्य स्वस्वयोग्यतानुसारेण श्रुतिस्मृतिपुराणान्यतमपर्यालोचनसंपादितभगवत्स्वरूपयाथार्थ्यज्ञानैरनित्यमापातरमणीयं विस्मृत्य संसारसागरमाश्रित्याऽपारकरुणानिधानस्य परमेश्वरस्य चरणौ निरत्ययमानन्दमयं तत्पदं प्राप्तुं सर्वथा यतनीयमिति सिद्धम् ॥

इत्थं मनुप्रभृतिमान्यमुनीन्द्रसूक्तीः
संगृह्य सर्वसुलभं सुकृतं विधातुम् ।
काशीस्थसंस्कृतसमाजसभासहायो
गङ्गाधरोऽकृत सनातनधर्मदीपम् ॥ १ ॥

विलेख्यमन्यच धृतं क्व चिद्यतदेकसंदर्भवियोगभीत्या ।
उपेक्षितोऽभूत्पुनरुक्तिदोषो विबोधसौकर्यमपेक्ष्य चात्र ॥ २ ॥

प्रकाशयन्धर्मपथं निगूढं कृता[१]र्थतां यः श्रयतां तनोति ।
उदित्वरो भारतदुग्धसिन्धोः स शीलचिन्तामणिरेष जीयात् ॥ ३ ॥

अपू[२]र्वधर्मोत्सुकमानसैर्मे विनिन्द्यतां नाम खलैः प्रबन्धः ।
शशीव सद्भ्यः कुमु[३]दं विवृण्वन् दिशेदवश्यं शशिकान्तशैलीम् ॥ ४ ॥

पदा[४]दि दूष्या[५]ण्यपि मण्डयन्तो बुधा[६]वृताः प्रौढगुण[७]स्वभावाः ।
जला[८]शयोत्थानि वचांसि सन्तः पटाः पयांसीव विशोधयन्तु ॥ ५ ॥

इति शाश्वतधर्मदीपिका समाप्ता ।

१ प्राप्तेष्टप्रयोजनतां प्राप्तधनतां च । २ अधर्मोत्सुकैः अपूर्वं किमत्र प्रतिपादितमित्याक्षिपद्भिश्च । ३ कुवलयं भूसन्तोषं च । ४ सुबन्तानि तिङन्तानि च । स्थानानि च । ५ दूषणार्हाणि । वस्त्रवेश्मानि च । ६ विद्वद्भिर्युक्ताः प्रावृताश्च । ७ तन्तुमयाः । शीलवन्तश्च । ८ सरस उद्धृतानि । जडहृदयोहितानि च ।

बालानां भारतकथाबोधार्थं मङ्गलाय च ।
धर्माचारेण कल्याणप्राप्तेर्दृष्टान्तदित्सया ॥
बहुत्र भारतीयानां विषयाणां निबन्धनात् ।
इह संबन्धबोधार्थं संक्षेपेणोच्यते कथा ॥ २ ॥

---

पाण्डुर्नामाभवद्राजा कुरुवंशे गुणोज्ज्वलः ।
मुनिशापादसौ त्यक्त्वा राज्यं वनमवाप ह ॥
कुन्ती माद्री च पत्न्यौ द्वे तेन सार्द्धं वनं गते ।
पुत्रार्थं तप्यमानस्य तस्य प्रियविधित्सया ॥
कुन्ती मन्त्रैराजुहाव धर्मानिलपुरन्दरान् ।
युधिष्ठिरं भीमसेनमर्जुनं चापि तैः सुतान् ॥
नकुलं सहदेवं च लेभे माद्री तयाऽश्विनोः ।
अप्राप्तयौवनेष्वेषु कदा चित्पाण्डुभूपतिः ॥
माद्रीं कामात्परिष्वज्य ममार मुनिशापतः ।
माद्र्यामनुमृतायां तु कुन्तीं पञ्चसुतावृताम् ॥
हस्तिनापुरमानैषुस्तदाश्रमनिवासिनः ।
तत्र तेषां पितृव्येण धृतराष्ट्रेण यत्नतः ॥
वर्द्धितानां गुणवतां द्विषोऽभूवन् पितृव्यजाः ।
शतं दुर्योधनमुखा अद्रुह्यंश्च मुहुर्मुहुः ॥
भीष्मः पितामहस्तेषां धनुर्वेदाप्तये कृपम् ।
न्ययुङ्क्त कृतविद्यांस्तान्द्रोणाचार्याय चार्पयत् ॥
पाण्डवान् धार्तराष्ट्रांश्च धनुष्पारं गतान् गुरुः ।
द्रुपदं जयतेत्याह बलाज्जिग्येऽर्जुनेन सः ॥
कर्णो नाम रवेः पुत्रो दुर्योधनसखोऽभवत् ।

शकुनिर्मातुलश्चास्य पाण्डवानभ्यसूयत ॥
दुर्योधनो भीमसेनं कदा चिद्बलिनां वरम् ।
छलाद्दत्वा विषं सर्पैर्दंशयित्वा जलेऽमुचत् ।
स वासुकिगृहं प्राप्य पीत्वाऽमृतमुपागतः ।
नागायुतसमप्राणोऽधिकं तान् दुःखिनोऽकरोत् ॥
अथ पाण्डवघातार्थं धृतराष्ट्रः स्वसूनुभिः ।
नोनुद्यमानो भ्रातृव्यान् प्रैषयद्वारणावते ॥
पितृव्यो विदुरस्त्वेषां पुरोचनविनिर्मितम् ।
जातुषागारमस्तीति स्नेहाद्गूढगिराऽवदत् ॥
जागरूकोऽभवत्तच्च विज्ञायैतद्युधिष्ठिरः ।
भीमस्तु निशि कस्यां चिद्दीपयित्वा तमालयम् ॥
स भ्रातृमातृकोऽयासीद्विदुरोक्तसुरङ्गया ।
वने सुप्तानमून् रक्षन् हिडिम्बाख्येन रक्षसा ॥
युध्वैनं मारयामास तत्स्वसुश्चाभवत्पतिः ।
घटोत्कचं सुतं चास्यां जनयामास राक्षसम् ॥
ततः पुरीमेकचक्रां ययुस्ते जननीयुताः ।
कं चित्कालं च तत्रोषुर्ब्राह्मणच्छद्मसंवृताः ॥
कदा चित्तत्र शोचन्तं कुन्ती वीक्ष्य द्विजोत्तमम् ।
शोककारणमप्राक्षीदसौ चाकथयत्ततः ॥
पुरोऽस्या निकटे क्रव्याद् बकनामास्ति भीषणः ।
तस्मै नागरिकैर्देयः क्रमेण नरवान् बलिः ॥
स वारोऽद्य मम प्राप्तः सुतश्चैकोऽस्ति मे शिशुः ।
तं मोक्तुं नोत्सहे तेन सीदामि सुतरामिति ॥

कुन्ती तमाह मत्पुत्रो बलिरस्य भवेदिति ।
अस्वीकुर्वति तद्विप्रे पुनः सैनं व्यजिज्ञपत् ॥
मम सन्ति सुताः पञ्च द्वितीयो मन्त्रसिद्धिमान् ।
असंशयं बकं हन्यादिदं गोप्यं भवत्विति ॥
प्रतिपद्य प्रहृष्टेऽस्मिन्भीमसेनमुवाच सा ।
याह्यरण्यं बकं हन्तुं चातुं ब्राह्मणबालकम् ॥
युधिष्ठिरस्त्ववोचत्तां किमिदं विहितं त्वया ।
घातयित्वा सुतं रक्षा परस्याधर्मकारणम् ॥
कुन्त्यब्रवीत्तं मा वादीर्धर्म्यं विप्रस्य रक्षणम् ।
वयं सुखोषिताश्चात्र तं हत्वा भीम एष्यति ॥
इति तं बोधयित्वासौ भीमं प्रैरयदुन्मदम् ।
स गत्वा विपिनं रक्षो हतवान् नगरार्त्तिदम् ॥
अथ तत्र वसन्तस्ते श्रुत्वा द्रुपदमन्दिरे ।
वीर्यशुल्कं सुतोद्वाहं ययुर्धौम्यपुरोहिताः ॥
प्राप्य तन्नगरं गेहे कुलालस्यावसन् क्व चित् ।
आययुस्तत्र राजानो नानादिग्भ्यः सहस्रशः ॥
दुर्योधनाद्याः कृष्णाद्याः स्वयंवरदिदृक्षया ।
स्वयंवरे समेतांस्तानवादीद्द्रुपदात्मजः ॥
सज्यं कृत्वा धनुरिदं बाणैर्लक्ष्यं भिनत्ति यः ।
तस्मै देया स्वसा मेऽद्य तद्यतध्वं नृपोत्तमाः ॥
श्रुत्वैतदुत्थिताः के चिन्न शेकुश्चापकर्षणे ।
के चिदुत्थापने यत्ता जानुभ्यामवनीं गताः ॥
कर्णे तत्कृष्टुमनसि धृष्टद्युम्नोऽवदद्बवान् ।
संबन्धार्हो न सूतत्वाच्छ्रुत्वेदं स न्यवर्त्तत ॥

अथार्जुनो ब्रह्मवृन्दादुत्थाय कृतवान् धनुः ।
सज्यं विव्याध लक्ष्यं च लेभे च द्रुपदात्मजाम् ॥
युद्धाय संस्थितान् राज्ञो दुर्योधनमुखानसौ ।
सभीमोऽवारयद्रोषान्विवेक इव सागमः ॥
अथानीय द्रुपदजां स्ववेश्म कुरुपुङ्गवाः ।
मात्रेऽर्पयन्नुवाचैषा समं भुङ्ध्वमिमामिति ॥
एकस्या बहुपत्नीत्वं कथं स्यादिति संशये ।
व्यासोऽवदद्वराच्छंभोर्नात्र दोषो भवेदिति ॥
तच्छ्रुत्वा द्रुपदो वाक्यं सर्वपत्नीं चकार ताम् ।
धृतराष्ट्रोऽपि तद्राज्यमिन्द्रप्रस्थे व्यसर्जयत् ॥
तत्र तान्नारदोऽभ्येत्य कथां सुन्दोपसुन्दयोः ।
वर्णयन्नवदत्प्रेम्णा मा वो भूत्स्त्रीकृते कलिः ॥
ते प्रत्यशृण्वन्नेकैकं प्रतिवर्षं सहानया ।
तिष्ठत्स्वस्मासु यः पश्येत्स चरेद्वायनं व्रतम् ॥
श्रुत्वैतन्नारदे हृष्टे याते द्यामर्जुनो नृपम् ।
कदा चिद्वीक्ष्य सस्त्रीकं वनयानोत्सुकोऽभवत् ॥
युधिष्ठिरः स्नेहपाशैर्बद्धः सत्यमयैश्च तैः ।
न मोक्तुं न निषेद्धुं च पारयन्विह्वलोऽभवत् ॥
कृच्छ्रेण लब्धानुमतिर्वनं गत्वार्जुनोऽप्यथ ।
उलूपीं चोलतनयां चोपयेमे स्मरार्दिताम् ॥
सुभद्रां द्वारकापुर्यां जहार भगिनीं हरेः ।
चीर्णव्रतश्चाभिमन्युमलब्धास्यां समं हरेः ॥
युधिष्ठिराद्याः क्रमशो द्रौपद्यां लेभिरे सुतान् ।
स्वसमानसमांल्लोके महाभूतान् गुणा इव ॥

कदा चित्कृष्णसहितो यमुनामर्जुनो ययौ ।
ग्रीष्मे जलविहारार्थं तत्राद्राक्षीच्च तापसम् ॥
याचमानेऽशनं तस्मिन्प्रतिश्रुत्य जगाद तम् ।
को भवानिति सोप्याह खाण्डवार्थ्यस्मि पावकः ॥
ततोऽर्जुनो मुदा युक्तो गाण्डीवमिषुधी रथम् ।
प्राप्यास्मात्तं दहेत्यूचे वारयिष्यन्पुरन्दरम् ॥
वनं दहति शक्रोऽस्मिन्नवर्षत्तक्षकप्रियः ।
छत्रीकृत्य शरव्रातं तच्चावारयदर्जुनः ॥
सुरैः साकं युध्यमानं विजित्येन्द्रं सबालकाम् ।
तक्षकस्त्रीं प्रचिच्छेद बालस्तस्या व्यमुच्यत ॥
मयं शरणमापन्नमरक्षद्दाहसंकटात् ।
प्रीतो वन्हिश्च दत्तार्शौर्ययौ तौ चापतुः पुरीम् ॥
मयः सभां मणिमयीं युधिष्ठिरकृतेऽकरोत् ।
तत्र तं राजसूयेन यष्टुं प्रोवाच नारदः ॥
स च संमन्त्र्य कृष्णेन कृष्णं भीमार्जुनौ तथा ।
जरासन्धवधार्थाय मगधान्प्राहिणोन्नृपः ॥
स्नातकच्छद्मना गत्वा ते चाभिचन्त तं रणम् ।
भीमेन स चिरं युद्ध्वा हतोऽभूत्तत्सुतश्च राट् ॥
हृष्टेषु स्वपुरीं प्राप्तेष्वेषु राजा दिशां जये ।
भ्रातॄन् विससृजे ते च निर्जिग्युः सर्वराजकम् ॥
अथ राजा राजसूये सम्यक् सन्तर्प्य देवताः ।
भीष्मानुमत्या तस्यान्ते वासुदेवमपूजयत् ॥
शिशुपालोऽसहन्नेतदश्लीलं व्याहरन्वचः ।
कृष्णचक्रेण चक्रेसौ वैवस्वतपुरातिथिः ॥

दुर्योधनो मणिमयीं सभामेतां विलोकयन् ।
पपात स्खलितो भ्रान्त्या ततो द्रुपदजाऽहसत् ॥
तेन मानी दूयमानो मर्तुकामो न्यवार्यत ।
द्यूते धर्मात्मजं निःस्वं पश्येति शकुनेर्गिरा ॥
अथ पित्रा स संमन्त्र्य छलेनानाय्य धर्मजम् ।
द्यूतमारब्ध शकुनिः क्षणादस्याहरद्धनम् ॥
हृतराज्यो दैवबलाद्भ्रातॄन् पत्नीं च स ग्लहम् ।
कुर्वन्व्यजीयतात्मानं तथा कुर्वन् क्षणात्पुनः ॥
दुःशासनो द्रुपदजामथ स्त्रीधर्मिणीं सदः ।
भ्रातुर्निदेशादानिन्ये नग्नां कर्तुमियेष च ॥
अथ सभ्येषु मूकेषु सा हरिं शरणार्थिनी ।
चुक्रोश प्रादुरासीच्च वस्त्रपङ्क्तिः सहस्रशः ॥
दुःशासने चिरं हृत्वा वासांसि विरते सति ।
भीमोमुष्य रणे रक्तं पातास्मीत्याह रोषितः ॥
सहस्ततालं कर्णेन हसन्तं च सुयोधनम् ।
अत्र तिष्ठेति कृष्णां च दर्शयन्तं स्वसक्थिनी ॥
शशाप द्रौपदी मृत्युस्तत्रात्रैव भवेदिति ।
तदूरुभङ्गं च रणे प्रतिजज्ञे वृकोदरः ॥
अर्जुनश्च रणे कर्णं हन्तास्मीत्यवदन्मुहुः ।
धृतराष्ट्रोऽथ राज्यार्द्धं दत्वा साम्ना प्रसाद्य च ॥
व्यसर्जयद्धर्मसुतं शकुनिः पुनराह्वयत् ।
द्वादशाब्दान्वने वासमज्ञातैश्चैकहायनम् ॥
ग्लहं प्रकल्प्य सोऽदीव्यद्विजिग्ये च युधिष्ठिरम् ।
अथ धर्मात्मजः कुन्तीं विन्यस्य विदुरालये ॥

द्वारवत्यां सुतान् न्यस्य भ्रातृपत्नीसमन्वितः ।
वनं ययौ सत्यरतो रिपुघातक्षमोऽपि सन् ॥
सहस्रशश्चानुगतान्विप्रानापद्गतोऽप्यसौ ।
सूर्यमाराध्य तद्दत्तपात्र्युत्थान्नैरतर्पयत् ॥
भीमसात्यकिसाम्बाद्यैरनुमन्तुं रिपुक्षयम् ।
याच्यमानोऽपि तन्नैच्छत्केवलं धर्ममाश्रितः ॥
काम्यकद्वैतवनयोः सेवमानः शुचीन् मुनीन् ।
उवास धर्मभूयिष्ठाः कथाः शृण्वन्नसौ सुखम् ॥
अथ व्यासाज्ञया राज्ञाऽर्जुनो मुक्तो हिमालयम् ।
गत्वा पाशुपतास्त्राप्त्यै चिरमाराधयच्छिवम् ॥
अथ शंभुः समागत्य किरातच्छद्मसंवृतः ।
नियुध्य तोषितस्तेन स्वात्मानं समदर्शयत् ॥
दत्वा पाशुपतं याते पिनाकभृति मातलिः ।
रथेन तं दिवं निन्ये तत्र दिव्यास्त्रमाप सः ॥
उर्वशीमिन्द्रसंदेशात्कामयानां स चागताम् ।
प्रत्याख्याय तया शप्तः षण्ढः स्या इति खिन्नया ॥
समाश्वासयदिन्द्रस्तं शापोयं वत्स ते मुदे ।
अज्ञातवासे वसतः साह्यायैव भवेदिति ॥
निवातकवचान् हत्वा कालकेयांश्च दानवान् ।
इन्द्रात्प्राप्तास्त्रविद्यायाः सोकरोऽद्गुरुदक्षिणाम् ॥
एवमत्यद्भुतं वृत्तं कुर्वन्वत्सरपञ्चकम् ।
वसन् भ्रातृषु वृत्तं स्वं वक्तुं लोमशमैरयत् ॥
लोमशाद्वृत्तमाकर्ण्य तस्य राजा युधिष्ठिरः ।
तीर्थयात्रां सहानेन चक्रे भ्रातृगणायुतः ॥

बदर्याश्रममासाद्य राजर्षेर्वृषपर्वणः ।
दर्शनेन परं तुष्यन् जगाम दिशमुत्तराम् ॥
कदा चिद्द्रौपदी पद्ममालोक्यालौकिकं मुदा ।
तदानेतुं बहुविधं भीमसेनमयाचत ॥
भीमसेनस्तथेत्युक्त्वा व्रजन् पथि हनूमता ।
दृष्टः स्वरूपं संदर्श्य विसृष्टोऽयादुदङ्मुखः ॥
ततः पुष्करिणीं वीक्ष्य सौगन्धिकवतीमसौ ।
अवगाह्यालुनात्पद्मान्यरोधि स च रक्षकैः ॥
अवमत्य वचस्तेषां हरन्पद्मान्ययोधि तैः ।
जघान तांश्च गदया मदयावक्रितेक्षणः ॥
तान् विजित्य तटे तिष्ठन् ददर्श सघटोत्कचान् ।
भ्रातॄन् सजानीन् द्रौपद्यै ददौ सौगन्धिकानि च ॥
कदा चित्संगरे यक्षान् मणिभद्रं च मारयन् ।
सान्त्वपूर्वं कुबेरेण प्रीयमाणेन तुष्टुवे ॥
अथार्जुनं दिवः प्राप्तमभिनन्द्य कुरूत्तमाः ।
साकं तेन वनं द्वैतं प्रापुः श्रुतशिवाहवाः ॥
दुर्योधनः कदा चित्तान् दर्शयिष्यन् स्वसंपदम् ।
घोषयात्रामिषात्प्राप द्वैतं योधानुजैर्वृतः ॥
तत्र रन्तुं सरस्तीरं चित्रसेनः समागतः ।
तद्भटैर्वार्यमाणस्तान् जघान विशिखैः शितैः ॥
प्रद्राव्य कर्णं गन्धर्वो बद्ध्वा दुर्योधनं व्रजन् ।
आहूयतैतत्स्त्रीशोकात्सदयैरर्जुनादिभिः ॥
चिरं प्रयुध्य तैरेष जितोऽमुञ्चत्सुयोधनम् ।
भीमादयस्तमानिन्युर्ह्रीणमग्रजसन्निधिम् ॥

कृतापराधमप्येनं तादृशं रिपुमात्मनः ।
युधिष्ठिरः सान्त्वयित्वा मृदुवाक्यैर्व्यसर्जयत् ॥
स तादृशापमानेन स्थितः प्रायोपवेशने ।
शकुन्यादित्यपुत्राभ्यां प्रसाद्यानीयतालयम् ॥
नियुज्य दिग्जये कर्णं वशे कृत्वाऽखिलान्नृपान् ।
स पौण्डरीकमाहृत्य स्वं कृतार्थममन्यत ॥
कदा चित्सैन्धवो राजा मृगयार्थं गतो वनम् ।
द्रौपदीं वीक्ष्य कामार्तोऽहरदेकाकिनीं बलात् ॥
पाण्डवा मृगयां कृत्वा प्राप्य गेहं निशम्य तत् ।
दुद्रुवुः पृष्ठतस्तस्य जगृहुस्तं खलं क्षणात् ॥
भार्यापहारिणं हन्तुं तं भीमे प्रार्थयत्यपि ।
परिहर्तुं स्वसुः शोकं प्रमुमोच युधिष्ठिरः ॥
स दुष्टः शिवमाराध्य जेतुं पाण्डुसुतान् युधि ।
प्रीतादस्माद्वरान्प्राप विनार्जुनपराभवम् ॥
कदा चिदिन्द्रो द्विजवत्कर्णं प्राप्यास्य कुण्डले ।
कवचं चार्थयल्लेभे शक्तिं दत्त्वैकपातिनीम् ॥
तृणबिन्द्वाश्रमे तिष्ठन् धर्मज्ञो हरिणाहृताम् ।
अन्विष्यन्नरणीं प्राप वनं सभ्रातृको घनम् ॥
तृषितेष्वनुजेष्वद्भ्यः सरः प्राप्य पिपासुषु ।
यक्षः पप्रच्छ तान् प्रश्नानवज्ञातोऽप्यपातयत् ॥
अन्विष्यंस्तान्धर्मसूनुर्दृष्ट्वा सरसि पातितान् ।
जलमेतन्मृतौ हेतुर्निश्चित्येत्यग्रहीज्जलम् ॥
यक्षस्त्वाह मम प्रश्नानुक्त्वापः पातुमर्हसि ।
नो चेद्भ्रातृपथं याया मम शासनलङ्घनात् ॥

इत्युक्तोऽस्य बहून्प्रश्नान्सद्य उत्तरयन्नसौ ।
वृणीष्वैकमित्युक्तोऽवृणोन्नकुलजीवितम् ॥
भीमार्जुनौ रिपुवधे शक्तौ मुक्त्वा विमातृजम् ।
कथं वरयसीत्युक्तोऽवददेनं युधिष्ठिरः ॥
कुन्तीमाद्र्यौ जनन्यौ मे स्यातां पुत्रान्विते यथा ।
आनृशंस्यात्तथा याचे नकुलस्तेन जीवतु ॥
तुष्टः स तस्य वाक्येन सर्वान्भ्रातॄनजीवयत् ।
अवादीद्वत्स धर्मो ऽहं परीक्षार्थं तवागतः ॥
आनृशंस्येन तुष्टस्ते वरान् याचस्व काङ्क्षितान् ।
वर्षे त्रयोदशेऽज्ञातः सानुजश्च चरिष्यसि ॥
इत्युक्त्वान्तर्हिते धर्मे राजा स्वाश्रममाययौ ।
ब्राह्मणायारणीं दत्वा विसृज्यासौ च सेवकान् ॥
प्राप्ते त्रयोदशे वर्षे भार्याभ्रातृयुतोऽव्रजत् ।
अज्ञातवासे कृतधीर्विराटनगरं गतः ॥
कङ्काभिधो द्विजो भूत्वा विराटेनार्चितोऽभवत् ।
भीमोऽपि वल्लवः सूदोऽर्जुनः षण्ढो बृहन्नटा ॥
अश्ववारश्च नकुलः सहदेवो गवाधिपः ।
सैरन्ध्र्यभूद्द्रौपदी च राजदारोपसेविनी ॥
राष्ट्रियः कीचको नाम वसत्स्वेष्वेवमेकदा ।
राजदाराज्ञया कृष्णां स्वगृहाप्तां वचोऽब्रवीत् ॥
रतये मां भजस्वेति वारितश्चाहनद्भृशम् ।
ततो रहसि सा भीमं प्राहैनं मारयेरिति ॥
तदाज्ञया च तं व्याजादाह्वयन्नर्तनालये ।
कीचकं तत्र स प्राप्तं निशि तूष्णीममारयत् ॥

सैरन्ध्युच्चैर्विचुक्रोश गन्धर्वैः स हतस्त्विति ।
शतसंख्यास्तदनुजाः प्राप्याथोद्वीक्ष्य तं मृतम् ॥
श्मशानं सह सैरन्ध्या नीत्वा चित्यामदीपयन् ।
सैरन्ध्या रुदितैस्तत्राहूतो भीमः शतं रिपून् ॥
हत्वा विमोच्य दयितां प्रीतः प्राप पुनर्गृहम् ।
अथ वार्तामिमां श्रुत्वा धार्तराष्ट्रश्चराहृताम् ॥
निश्चित्य भीमकर्मैतत्सुशर्माणं खलोऽब्रवीत् ।
याहि वैराटनगरं हर गास्त्द्विरत्तया ॥
आगतान्पाण्डवान्दृष्ट्वा कुरु भग्नव्रतानिति ।
तथेत्येत्य स गा हृत्वा बद्ध्वा तद्रक्षकं नृपम् ॥
व्रजन् निगृह्य भीमेन धर्मवाचा व्यमुच्यत ।
ससैन्यो धार्त्तराष्ट्रश्च विराटनगरोत्तरे ॥
गा जहाराथ वैराटिर्गोपै रक्षामयाच्यत ।
स्त्रीसभे श्लाघमानोसौ सूतं कृत्वा बृहन्नलाम् ॥
गतः सेनार्णवं वीक्ष्य भीतः प्रादुद्रुवद्रुदन् ।
बृहन्नला तमाश्वास्य निश्चाय्यात्मानमर्जुनम् ॥
श्मशानस्थशमीवृक्षादवातारयदायुधम् ।
तमेव सारथिं कृत्वा धृतधैर्यं निजाश्रयात् ॥
पूर्णाज्ञातस्थितिदिनो धार्तराष्ट्रैरयुध्यत ।
रिपून्व्यस्तान् समस्तांश्च धुन्वन्प्रस्वापनास्त्रतः ॥
सुप्तान्विवासमः कृत्वा लज्जितान्दययाऽमुचत् ।
परेद्युः पाण्डवास्तीर्णप्रतिज्ञा द्रौपदीयुताः ॥
विराटस्य सदः प्रापुर्धर्मोऽतिष्ठन्नृपासने ।
विस्मितो वीक्ष्य तान् राजा श्रुत्वा तद्वृत्तमात्मजात् ॥

सुतामार्जुनये प्रादात्संमान्यैतान्प्रसाद्य च ।
अर्जुनस्तेन तनयां भार्यां कुर्विति याचितः ॥
नोपायंस्त विदञ्छिष्यां तनयार्थं ततोऽवृणोत् ।
ततः कृष्णस्सात्यकिश्च द्रुपदस्ससुतोऽभ्ययात् ॥
ससैन्यो युद्धसाहाय्ये विराटश्च स्थितोऽभवत् ।
युधिष्ठिरस्तु बन्धूनां रिपूणामपि घातने ॥
जुगुप्समानो दौत्याय प्राहिणोन्मधुसूदनम् ।
पञ्च ग्रामान्स देहीति वदन् दुर्योधनादिभिः ॥
अदित्सुभिः किं चिदपि प्रत्याख्यातोऽभवन्मुहुः ।
स बद्धुमीप्सितो दुष्टैर्भीमं स्वं दर्शयन्वपुः ॥
स्तुतो भीष्मादिभिः कृष्णः पाण्डवान्तिकमाययौ ।
युयुत्सया ययुर्वृत्वा सैनापत्ये नदीसुतम् ॥
धृष्टद्युम्नं च कौरव्याः कुरुक्षेत्रं च पाण्डवाः ।
ततोऽर्जुनं बन्धुवधाद्विरमन्तं सहेतुकैः ॥
कृष्णो वाक्यैः समाश्वास्य चक्रे रिपुवधे स्थिरम् ।
ततोऽभवद्रणो घोरः कुरूणां पाण्डवैः सह ॥
युद्ध्वा दशाहं भीष्मोऽभूदर्जुनेन निपातितः ।
द्रोणं कृत्वाथ सेनान्यं कौरव्यो युयुधे पुनः ॥
ततस्तृतीयदिवसेऽर्जुने संसप्तकान् घ्नति ।
भित्वारिसेनां सौभद्रे विशत्यन्तस्तु सिन्धुराट् ॥
भीमादीन् रुरुधेऽथाघ्नन् षड्रथाः श्रान्तमार्जुनिम् ।
अर्जुनो निशि तच्छ्रुत्वा प्रतिजज्ञे परेऽहनि ॥
सिन्धुराजं निहन्तास्मि प्रवेष्टा वा शुचाविति ।
तच्छ्रुत्वा कुरवोऽरक्षन् सैन्धवं द्रोणमाश्रिताः ॥

प्रातः पुनर्युयुधिरे कुरुपाण्डवपुङ्गवाः ।
अर्जुनोऽक्षौहिणीः सप्त हत्वा सूर्येऽस्तमेष्यति ॥
प्रविश्यन्नग्निमालोक्य सैन्धवं न्यवधीत्क्षणात् ।
ततो दुर्योधनः क्रुद्धो रात्रावारब्ध संगरम् ॥
तदा घटोत्कचो भैमिर्द्रोणादीन् साध्वयोधयत् ।
नाशयन्तं चमूमेनमशक्यं हन्तुमन्यथा ॥
मुक्त्वा शक्तिं शक्रदत्तां कर्णः प्राणैर्व्ययूयुजत् ।
विराटद्रुपदौ हत्वा द्रोणः प्रातर्महद् भयम् ॥
पाण्डवानां यदा चक्रे तदोवाच युधिष्ठिरः ।
कृष्णादिभिः प्रेर्यमाणो द्रोणं हन्तुं छलोक्तये ॥
अश्वत्थामाऽमृतेत्युच्चैर्गज इत्यथ लघ्वसौ ।
तन्निशम्य वचो द्रोणस्तं जानन्त्सत्यवादिनम् ॥
न्यस्तायुधो हतो वेगाद्धृष्टद्युम्नेन संगरे ।
अश्वत्थामाथ तच्छ्रुत्वा निहन्तुं सर्वपाण्डवान् ॥
नारायणास्त्रं मुमुचे कृष्णेनैतदशाम्यत ।
स निर्विण्णस्ततो व्यासान्नरनारायणावमू ॥
ज्ञात्वाऽनुशयमत्याक्षीत्तदहर्व्यरमन्मृधम् ।
अथ सेनापतिं कर्णं कृत्वा दुर्योधनः पुनः ॥
युयुधे तत्र भीमेन जघ्ने दुःशासनो बलात् ।
अथ कर्णं सुसंरब्धमर्जुनद्वैरथार्थिनम् ॥
शल्यः कर्तुं हतोत्साहमियेष स न चाशकत् ।
योधयन्नर्जुनं कर्णो गुरुशापेन विस्मरन् ॥
भार्गवास्त्रं भुवा चक्रं ग्रसन्त्याऽभूत्प्रपीडितः ।
तदाऽर्जुनोवधीदेनमादित्येऽस्तं प्रयास्यति ॥

शल्योऽपरेद्युर्धर्मेण हतः सेनापतीभवन् ।
नकुलः शकुनिं जघ्ने सहदेवश्च तत्सुतम् ॥
तदा दुर्योधनो भीतः प्रविश्यास्तम्भयत्सरः ।
अथ भीमादयो गत्वा निर्भर्त्स्यामुं सरःस्थितम् ॥
बहिर्निर्गमयामासुर्भीमेनास्य रणोऽभवत् ।
भीमोऽस्य गदया भङ्क्त्वोरू तं भुव्यपातयत् ॥
पदाऽवधीच्छिरस्येनं दुर्वचोभिरभर्त्सयत् ।
तथा तुदन्तं भीमं तु वारयित्वा युधिष्ठिरः ॥
दैवं विनिन्दन् स्वैर्वाक्यैर्दुर्योधनमसान्त्वयत् ।
कृतकृत्याः सुताः पाण्डोः शिबिरं प्राप्य हर्षिताः ॥
निर्ददुरथ हार्दिक्यकृपद्रोणात्मजा ययुः ।
दुर्योधनस्य श्वसतः समीपे तमसान्त्वयन् ॥
प्रतिजज्ञे तदा द्रौणिर्धृष्टद्युम्नादिपातनम् ।
रात्रौ निर्गत्य सुप्तांस्तानुत्थाप्य न्यवधीच्छरैः ॥
धृष्टद्युम्नं पाण्डवजान् सैनिकानप्यमर्षितः ।
नाशक्नोत्पाण्डवान् हन्तुं धर्षितः कृष्णतेजसा ॥
विलपन्त्यास्ततः प्रातः कृष्णाया भ्रातरं सुतान् ।
आश्वासनाय भीमाद्या ययुर्द्रौणिवधैषिणः ॥
ततोऽश्वत्थाममुक्तस्य शान्तयेऽस्त्रस्य फाल्गुनः ।
ऐषीकस्य ब्रह्मशिरोऽमुचद्भीमः शिरःस्थितम् ॥
मणिं जहार सहजमतुष्यत्तेन पार्षती ।
ततो मृतानां सर्वेषां कृत्वा निर्वपणं पृथक् ॥
तत्पत्नीश्च समाश्वास्य लेभे राज्यं युधिष्ठिरः ।
पितामहगुरुभ्रातृघातान्निर्विण्णमानसः ॥

पितामहात्स शुश्राव धर्मान्कृष्णमते स्थितः ।
राजधर्मान्बहुविधानापद्धर्मांश्च पुष्कलान् ॥
मोक्षधर्मान्दानधर्मान्सेतिहासोपपत्तिकान् ।
अथाचार्यवधोत्थैनःक्षालनायाजहार सः ॥
अश्वमेधं दिशो जित्वा भ्रातृभिः स्वमनुव्रतैः ।
ततः पुत्रशतापत्तिसंतप्तो वनमाश्रयत् ॥
पितृव्यमातृः संद्रष्टुं ययावथ युधिष्ठिरः ।
वनं तान्वीक्ष्य तत्रस्थो विदुरं दृष्टवान् मृतम् ॥
दवाग्निदग्धमाकर्ण्य धृतराष्ट्रं सह स्त्रिया ।
कुन्तीं श्रुत्वा तथा दग्धामकरोदौर्ध्वदेहिकम् ॥
पुनर्नगरमागत्य याते कतिपये दिने ।
स शुश्रावाऽर्जुनमुखात्प्रभासे यादवक्षयम् ॥
परस्परवधात्तेषामसंभाव्यं कुलक्षयम् ।
शरवंश्च कृष्णनिर्याणं स्वयं स्वर्गोत्सुकोऽभवत् ॥
विसृज्य राज्यं पौत्राय सानुजो द्रौपदीयुतः ।
आश्वास्य प्रकृतीर्मुञ्चन्प्रययावुत्तरामुखः ॥
एकः श्वाऽनुययावेनं यान्तं स्वर्गपथं प्रति ।
मध्ये मार्गमपप्तंश्च सहदेवमुखाः क्रमात् ॥
आक्रोशतस्तान्वीक्ष्यैष वदन्फलमधर्मजम् ।
स्वर्गदूतेनाभिदधे त्यक्त्वा श्वानं स्वरै[1]रिति ॥
भक्तं नाहं त्यजामीति तमुक्त्वाभिदधे पुनः ।
कर्मवैचित्र्यतो लोका विचित्रा हि शरीरिणाम् ॥

१ स्वः एैः स्वर्गं गच्छेत्यर्थः

२५